ग्रंथ सं० ८।

विषय: धर्मशास्त्रम्

नाम दायभागटीका १-६६, २-३६ 13345

पत्र सं० ~~१-६९, १-५०~~

श्लोक सं०

अक्षर सं० (पंक्तौ) ३६ पंक्ति सं० (पृष्ठे) १०

आकार: १०.२ × ४.५.

लिपि: दे.ना.

ग्रन्थकार: म.म. कृष्णतर्कालङ्कारः

आधार: का.

वि० विवरणम् अपू.

अ.

~~२४~~ २३६

पी० एम० यू० पी०--७५ एस० सी० ई०--१९५१--५०,०००

५१ पत्रा ५२ संख्यापर्यन्तं नास्ति /

Indira Gandhi National
Centre for the Arts

ई. नं. २१९

ट्रंक प. १०५

दायभागटीका पत्रे ६९
३७
७६

दायभाग॥ ॥श्रीगणेशायनमः॥ नृसिंहं भजे॥ पादांबुजद्वंद्वंजगदंबिकायाः श्रीकृष्णविप्रो हृदये निधाय करो
॥१॥ ति टीकामिह दायभागग्रंथावबोधाय सदेकरम्यां॥ ॥ग्रंथारंभे विघ्नविघाताय देवतानमोस्कार
रूपं मंगलमाचरन्॥ शिष्यप्रवृत्त्यर्थमभिधेयप्रयोजनसंबन्धांश्च प्रदर्शयन्दायभागमुद्दिश
ति॥ मन्वादीति॥ तथा चोक्तं॥ ज्ञातार्थं ज्ञातसंवन्धं श्रोतुं श्रोता प्रवर्त्तते॥ शास्त्रादौ तेन वक्तव्यः सं
बंधः प्रयोजनः॥ अत्राभिधेयो दायभागः प्रयोजनं दायभागनिर्णयः॥ स च संशयापनोदनद्वा
रा दुःखनिवृत्तिहेतुतया गौणः॥ संवन्धश्च ग्रंथस्य दायभागेन सह ज्ञाप्यज्ञापकभावः॥ तन्निश्च
येन सह जन्यजनकभावइति॥ श्लोकार्थस्तु॥ हे सुधियः यस्मिन्दायभागे येषां बुधानां बहुधा
विवादः संबंधिस्वत्वापगमानंतरं समुत्पन्नस्य सानुदायिकस्वत्वस्य विनाशेन प्रादेशिकस्व
त्वाकुलव्यापारो विभागः॥ किंवा तदानीमुत्पन्नस्य प्रादेशिकस्वत्वस्य ज्ञापनं विभागः॥ तथा च
धने प्रथमपुत्रस्यैव पितुरेव पत्न्या एवेति बहुप्रकारो विवादः तेषां बुधानां प्रबोधाय विशेष

पेण दायभागस्य संबंधिनां मध्ये व्यक्तिविशेषनिष्ठत्वेन प्राथकाधीकारस्य चावधारणाय स
दायभागो निरूपणीयः निरूपणं हि न च नाय मुद्देशः किंतु प्रतिज्ञेति वाच्यं॥ तथात्वे प्रतिज्ञातग
नुपपत्तिः॥ अतएव निरूपणीय इत्यस्य प्रतिज्ञेति सांप्रदायिकव्याख्यानमसदित्यवधेयं॥ त
स्मात्॥ शृणुध्वं अत्र निरूपणं लक्षणादिप्रकारेण ज्ञानानुकूलवचनं तदेव च निरूपणीय विशे
षणतयोपस्थिते श्रवणक्रियायाः कर्मतया॥ अन्वेति योग्यत्वात्॥ न च श्रुधातोः श्रवणवाचि
त्ववत्॥ शाद्बोधवाचितापीति निरूपणीयस्यापि तद्योग्यत्वमस्ति कथमन्यथा॥ आत्मा वारे
श्रोतव्यो मन्तव्य इत्यादिश्रुतावात्मनः श्रोतव्यतेति वाच्यं॥ सर्वत्र श्रावणबोधेनैव श्रुधातुनाशा
ब्दबोधप्रतिपादनात्॥ तत्र तस्य लाक्षणिकत्वात्॥ ननु सर्वेषामेव विरुद्धवचनानां बुधवचनत्वे न
नेप्रमाणत्वात्॥ वहुधेव दायभागोत्यत आह॥ मन्वाद्यैरिति॥ अविमृष्य अबुद्धा॥ तथा च तद्वचनानां
शास्त्राबोधमूलकत्वेनन प्रामाण्यमिति भावः॥ श्रीकरणाचार्यादि ग्रंथादरपराहत विवेकानां पण्डिता

Indira Gandhi National
Centre for the Arts

दायभाग
॥२॥

नास्ववक्तव्यनैयायिकानत्तत्सरक्ष्मार्थंग्राहकतमोस्तीति॥तेषा चाहृत्तयेस्तुधियइतिसंबोधनं॥अ
त्रमनोर्दैवरूपत्तया तन्नामोत्कीर्त्तनरूपमंगलंबोध्यं॥तथाचोक्तंएतमेकेवदन्त्यग्निंमनुमेकेप्रजा
पतिं॥आह्वरेकेपरंधर्ममपरेब्रह्मशाश्वतमिति॥स्वशब्दनिर्देशेनचमनोरादिशब्दनिर्दिष्टतत्स्मृ
तिकारेभ्यःप्राधान्यमावेदितंग्रंथकारेण॥तेनस्मृत्यंतरविरोधेमनुस्मृतिरेवग्राह्या॥अतए त
वोक्तंमन्वर्थविपरीतायासास्मृतिर्नप्रशस्यते॥विद्यार्थोपनिबंधृत्वात्प्राधान्यंहिमनोःस्मृतमि
ति॥निरूपणेशिष्यावधानायप्रतिजानीते॥अथेति॥उद्देशानंतरमित्यर्थःनिरूप्यतेलक्षणप्र
कारेण ज्ञाप्यते॥तत्रदायभागलक्षणप्रसंगेनारदइत्यैस्येकवचनातादध्याहर्त्तव्यताया
आहेतिक्रियान्वयः॥विभागोऽर्थस्येति॥विभागःस्वत्वनिर्णायान्कूलोव्यापारइत्यग्रेवक्ष्य
ते॥तथाचपित्र्यस्यार्थस्यपुत्रैर्विभागःपुत्रकर्तृकोविभागोदायभागःसयत्रधनेप्रकर्षेणक
ल्प्यते॥तद्विवादपदंइतिबुधैःप्रोक्तमित्यन्वयः॥नचाष्टादशविवादपदगणनायांस्त्रीपुंधर्म

भागश्चेत्यनेनविभागस्यैवमनुनाविवादपदत्वेनगणितत्वात्॥दायस्यचागणितत्वात्कथंदाय
स्यविवादपदत्वमितिवाच्यं॥इदंहिविवादपदंनपारिभाषिकंकिंतुयौगिकंदायभागविषयकवि
वादविषयत्वस्यदायेप्यवश्यंभावात्॥दायमविषयीकृत्यदायभागविषयकविवादासंभवादिति॥ना
रदवचनानुरोधेनमनुकृतगणनायांविभागपदस्यकृदभिहितभावतयाविभजनीयदायपरत्वे
त्वनुपपत्तिलेशाभावाच्च॥केचित्तुयत्रेतिनिमित्तसप्तमीयदर्थेश्चविवादपदंतथाचयद्विवादनिमित्तं
पित्र्यस्यार्थस्यपुत्रैर्विभागोऽक्षपातःकल्प्यतेतद्विवादपदंदायभागइत्याहुः॥यइत्यर्थेयत्रेतिसुपां
सुपासाधुरित्यन्ये।परेतुयत्विति पाठः॥यदर्थश्चविभागक्रियाविशेषणमित्युचुः॥केचनपित्र्य
स्यार्थस्येतिनिर्द्धारणेषष्ठीवर्णयंतिद्वंद्वसमासिकस्येतिवत्॥तथाचपित्र्यस्यार्थस्यमध्येय
स्मिन्नर्थेपुत्रैर्विभागःक्रियतेसदायभागइतितेषांमतेवचनार्थः।तत्रापिमतेधनस्यैवविवादपदत्वप्र
वोक्तरीत्याबोध्यंइति॥यस्त्वित्येवपाठइत्यपरे।ननुविभागात्प्रागेवपितुर्न्निधनादिनातदर्थेषुततस्वत्वा

Indira Gandhi National
Centre for the Arts

दायभागः ॥३॥

वगमात्॥ पित्र्यपदस्य पितुरिदमित्यर्थकल्पनायामयोग्यत्वमतो व्याचष्टे॥ पितृ इति॥ ननु पितृ
तद्दत्यस्यापि पितृस्वत्वनाशानन्तरमपरस्वत्ववदित्यर्थः कृत्वे पितृदत्तादो एवं पित्र्यत्वोपत्या दाय
त्वापत्तिः पितृधनविभागस्येव दायभागत्वेन पित्र्यधनस्यापि दायत्वस्यावश्याभ्युपेयत्वाद
त आह॥ तत्रेति। पितृमरणे ति॥ पितृमरणादुपजातं स्वत्वं यत्र पितृमरणाधीनस्वत्वकमित्य
र्थः॥ वस्तुतः पितृस्वत्वनाशकालेपि पितृस्वत्वोपलक्षितबोधकतया पित्र्यपदं योग्यमेव पा
करक्ते घटे श्याम इत्यादिप्रयोगवत्॥ अत एव विभज्येयुर्द्धं पितुरित्या दिवचनान्यपि संग
च्छंते॥ मरणपदं चात्र इतरस्वत्वाभिसंधानापूर्वकस्वत्वापगमहेतुभूतव्यापारस्वरूपेणापा
तित्याश्रमान्तरप्रवेशादीनामप्युपलक्षणं॥ पितृदत्तादौ तु स्वत्वं न पितुर्मरणाधीनं किंतु संप्र
दानसत्वाभिसंधानपूर्वकत्यागादेव पितुरिति नातिप्रसंगः॥ केचित्तु पितृत आगतं कित्वसं
वन्धाल्लब्धं पितापुत्रभावसंबन्धाधीनस्वत्वादिवेत्यर्थः॥ तत्रेत्यादि॥ तत्तत्परिचायकमित्याहुः॥ राम:॥ ॥३॥

पौत्रादिभिः क्रियमाणस्यापि पितामहादिधनविभागस्य दायभागत्वोपपादनाय आह पित्र्यस्येतीति॥
संबंधिमात्रेति॥ तथा च पितृपदस्य च संवन्धिलाक्षणिकतया पितामहधनस्यापि तन्मृत्यूप
रमजातस्वत्ववत्वात्॥ तद्विभागस्य संबंधिकृतत्वात् दायभागत्वमक्षतमिति भावः॥ पुत्रैरिति
वहुत्वं कर्तृत्वं चाविवक्षितं॥ तेन द्वयोर्विभागे मध्यस्थ क्रियमाणे गर्भस्थविभागे च नाव्या
प्तिः॥ ननु पितामहादिधनविभागो न दायविभागः प्रमाणाभावात्॥ तदा कथं एतत्तु संग्रहाय
लक्षणोत्यतस्तत्र प्रमाणमाह॥ संबन्धिमात्रेति॥ प्रयोगस्य मुनिविरोधात्॥ लक्षणायाप्युपप
त्तेराह॰ अत एवेति॥ मात्रादिधनविभागस्यापि दायभागत्वादेवेत्यर्थः॥ अन्यथा पितृधनविभागस्ये
व दायभागत्वे दायभागविवादपदोपक्रमे मात्रादिधनविभागकथनस्याने प्रसक्ताभिधानत्वापत्ते
रिति भावः॥ ननु नारदेन दायभागोपक्रमे पितृधनविभाग एवोक्तः॥ मात्रादिधनविभागस्य प्रास
ङ्गिकमेवाभिधानं॥ अन्यथा स्वोक्तविरोधः स्यादिति कथं मात्रादिधनविभागस्य दायभागत्वमित्यत

Indira Gandhi National
Centre for the Arts

आह॥ तथामनुरपीति॥ पित्रादिपदमदत्त्वेवेति॥ तथाचनारदेनापित्र्यधनेभागस्यपृथगुक्तत्वात्॥
मात्रादिधनविभागकथनस्यतत्प्रासंगिकत्वंसंभवेपिमनुनादायभागोपक्रमेपित्रादिपदानेतर्भा
वेनैवयावत्॥ संबंधिधनविभागस्योक्तेः संबंधिधनविभागस्यैवदायभागत्वमिति॥ नचनारदानुरो
धान्मनुस्मृतेःसंकोचाइतिवाच्यं॥ मनोर्बलवत्त्वात्॥ रतिसंगितो ऽन्योन्यानुरागयुक्तः॥ आपद्यपत्य
प्राप्तिः क्षेत्रादिपुत्रकरणं॰ ननुसंबन्धिधनविभागोदायभागइत्युक्तंतच्चनसंभवतिभावप्रकृतेदाय
शब्दस्यत्यागमात्रबोधकतयासंबंधिधनाबोधकत्वादित्यतआह॥ दायतइतीति॥ तथाचदायशब्द
स्यदीयतेयत्सदायइतिकर्मव्युत्पन्नतयाकर्मक्तैवधनबोधइतिभावः॥ ननुतथाप्यनुपपत्तिः
कर्मक्तताधात्वर्थस्यकर्मणएवबोधनात्॥ धात्वर्थश्चप्रकृतेत्यागएव॥ मृतप्रव्रजीतादिनांत
दानीत्यागाभावेनत्यागकर्मत्वेनतद्धनबोधनासंभवात्॥ अतआह॥ ददातिप्रयोगश्चेतितद्धा
तुश्चेत्यर्थः॥ चकारः पुनरर्थः॥ गौणाइति॥ शक्यस्यसादृश्यात्मकसंबंधोगुणः॥ तदधीनायालक्षणा



सागौणीतद्योगाद्गौणइत्यर्थः॥ तथाचपूर्वस्वामिस्वत्वनिवृत्तिपरस्वामिस्वत्वोत्पत्तिफलकत्याग
नरूपेणत्यागगुणोक्तस्यदाधातोःपूर्वस्वामिस्वत्वनिवृत्तिपूर्व॥ परस्वत्वानुकुलव्यापारत्वेपित्रादिमर
णप्रव्रज्यादिसाधारणरूपेणलक्षणा॥ संबंधिधनेचसंबन्धिनिधनानंतरंतादृशव्यापारजन्ययत्
पूर्वस्वामिस्वत्वनिवृत्तिपरस्वामिस्वत्वोत्पत्तिरूपंफलंदृश्यतेच्छालित्वरूपंकर्मत्वमक्षतमेवा॥ इति
नानुपपत्तिरितिभावः॥ एतेनमरणादेर्ददात्यर्थत्वेतत्रधातोर्गौणतातत्रस्वत्वस्यानवच्छेदकतयाच
धनस्यापिनकर्मत्वंधात्वर्थतावच्छेदकफलभागिनएवकर्मत्वादितिधात्वर्थजन्यफलभागित्वमात्रे
णप्रत्ययस्यापिगौणत्वा॥ चकारसमुच्चयेइत्याचार्यचूडामणिमतेप्रयुक्ते॥ धातोर्निरुक्तरूपेणलक्ष
णायास्वत्वस्यधात्वर्थतावच्छेदकत्वेनतच्छालित्वरूपेणकर्मत्वस्यनिष्प्रत्यूहत्वादिति॥ गुणमाह॥ मृत
प्रव्रजितादीति॥ साम्यादिति॥ शक्यलक्ष्ययोरुक्तरूपत्यागतथाविधव्यापारयोर्मृतप्रव्रजितादिस्वत्वनि
वृत्तिपरस्वत्वोत्पत्तिफलानुकूलव्यापारत्वरूपसादृश्यादित्यर्थः॥ लक्षणाहेतुंमुख्यार्थबाधमाह॥ ननु

Indira Gandhi National Centre for the Arts

मृतादीनामिति॥ तत्र॥ धने॥ ससम्यर्थो विषयित्वं तस्य त्यागेऽन्वयः॥ त्यागो न ममेदमिति इच्छारूपः दायश
ब्दस्य पर्यवसितार्थमाह॥ ततश्चेति॥ क्रीतादावतिव्याप्तिवारणाय धीनां तेन तत्र च पूर्वस्वामी त्यविवक्षितं
संबंधाधीनत्वस्यैव व्यावर्तकत्वात्॥ संबन्धश्च शास्त्रप्राप्तपुत्रत्वादन्यतमः। न तु क्रेतृत्वादिः॥ विद्यमा
नपतिस्वत्वके दाके दाम्पत्यसंबंधाधीनपत्नीस्वत्वाश्रये अतिव्याप्तिवारणाय तत्र स्वाम्योपरमे इति॥ तथा
च तावदन्यतमसंबंधाधीनं सत् यत् पूर्वस्वामिस्वत्वनाशजन्यस्वत्वं तद्दृति धने निरूढो दायशब्द इति॥
न च स्वत्वनाशानन्तरं चेत् स्वत्वोत्पत्तिस्तदा तत्क्षणे ऽस्वामिकतया निध्यादिवदुदासीनस्याप्युपाद
नात् स्वत्वापत्तिः॥ तत्र पुत्रादिसत्तायाः एव विरोधित्वस्य पुत्राद्यधिकारबोधकशास्त्रसिद्धत्वात्॥ न च
पित्रा विक्रीतेऽपि पुत्रस्वत्वापत्तिः॥ इतरस्वत्वाभिसंधाना पूर्वकपितृस्वत्वापगमहेतुव्यापारजन्यपितृस्व
त्वनाशस्यैव संबन्धाधीनं विजातीयपुत्रस्वत्वं प्रति हेतुत्वात्॥ तादृशस्वत्वनाशस्य च स्वत्वे च्छामधीनपि
तृस्वत्वनाशत्वेन हेतुतानतत्तद्रूपेण गौरवात्॥ पित्रा एवाय दत्तन्तु यद्धनं तत्र पुत्रस्य स्वत्वं न संबंधाधीनं॥



अतो न तत्र तादृशपितृस्वत्वनाशस्य व्यभिचारः॥ अत एव तद्धनं न दाय इति वस्तुतस्तु पितृस्वत्वमेव पुत्रस्वत्वो
त्पत्तौ हेतुः॥ न चैवं पितृस्वत्वे विद्यमानेऽपि तद्धने पुत्रस्वत्वापत्तिः॥ तत्र पितृस्वत्वनाशकस्यापि सहकारि
त्वात्॥ स्वत्वनाशकं च मरणपातित्यादि॰ तेषां स्वत्वनाशकत्वेन प्रतिपादितानां मरणत्वपातित्यत्वादि
विशेषरूपेणैवाव्यवहितोत्तरत्वाद्यंतर्भावेन पुत्रस्वत्वोत्पत्तौ हेतुत्वं॥ तेन न परस्परव्यभिचारः॥ अत ए
व विनष्टे वाप्यशरणे इत्यादिवचनैः पितुः पातित्याद्यनन्तरमेव पुत्रस्य स्वत्वमिति प्रतिपादितं॥ तेन न पितृ
स्वत्वनाशकानां मरणादीनां तेन तेन रूपेण हेतुत्वं स्वत्वनाशकत्वेन वा स्वत्वनाशसामग्रीत्वेन वा नाद्यः॥ अने
ककार्यकारणभावकल्पने गौरवात्॥ द्वितीये जीवत्यपि पितरि पुत्रस्य स्वत्वं स्यात्॥ स्वत्वादृष्टादीनां नाश
कानां सत्त्वात्॥ तृतीये चान्यप्रतिपत्ववर्तित्वं गृहीत्वैव यस्य यं प्रति पूर्ववर्तीत्वं गृह्यते॥ इत्युक्तान्यथासिद्धिः॥
सामग्रीभेदेन नानाकार्यकारणभावकल्पने गौरवाच्च॥ तदपेक्षया नाशहेतुताया एव लघुतया युक्तत्वादि
त्यादिके प्रत्युक्तं॥ प्रव्रज्यामरणपातित्यानां त्रयाणां कार्यकारणभावकल्पनापेक्षयान्यदियोपाद

Indira Gandhi National
Centre for the Arts

निकस्वत्वं प्रीतिश्लोनो वादी भेदकूट विशिष्टपुत्रसत्तायास्तथाविधपौत्रादिसत्तायाश्च प्रतिबंधक
दायभागः निकस्वत्वं प्रीतिच्छिनो वादीभेदकूटविशिष्टपुत्रसत्तायास्तथाविधपौत्रादिसत्तायाश्च प्रतिबंधक



निकस्वत्वप्रीतिश्लीनो वादीभेदकूटविशिष्टपुत्रसत्तायास्तथाविधपौत्रादिसत्तायाश्च प्रतिबंधक
त्वकल्पनायामेगौरवात्॥ न चावश्यकत्वान्मरणादीनामेव हेतुत्वमस्तु न पितृस्वत्वस्यापीति वा
च्यं तथा सति संबंधाधीनस्वत्वधारावारणाय तथाविधस्वत्वस्य प्रतिबंधकत्वकल्पनागौरवापत्तेः
तथा सति संबंधाधीनस्वत्वधारावारणायतथाविधस्वत्वस्य प्रतिबंधकत्वकल्पनागौरवाप
त्तेः॥ मन्यन्ते तु संबंधिस्वत्वस्य हेतुत्वात्तदभावादेव तद्धारापादनस्यासम्भव इति सुधिभीर्विभाव
नीयं॥ स्वत्वं च यथेष्टविनियोगार्हत्वेन शास्त्रगम्यत्वमिति प्राचः॥ अतिरिक्तपदार्थ इति शिरोमणिः॥ नीलं
स्वामीत्वं च तन्निरूपकं निरूपकतया तदेवं वा॥ तच्च द्रव्यगतं गुणगतं च द्रव्यस्य दानादिश्रुतेः॥ नीलं
वाऽवृषमुत्सृजेदित्यादौ लौहित्यादिगुणविशिष्टवृषोत्सर्गश्रुतेश्च॥ वस्तुतस्तु आत्मसमवेतं स्वा
मित्वमेवातिरिक्तपदार्थः॥ विक्रयदानादीनां तन्नाशकत्वे क्रयप्रतिग्रहादीनां च तद्धेतुत्वे संबन्ध
लाघवात् तदेव निरूपकतया स्वत्वव्यवहारहेतुः विषयतया ज्ञातत्वात्॥ अत एव निबंधादौ भाविन्य रामः
पि स्वत्वे॥ चूडामणिलीलावतीरहस्यसिद्धः पंथाः समीचीनः॥ अत्र स्वत्वधारावारणाय स्वजातीय ॥ ६ ॥

स्वत्वं विरोधि॥ सजातीयेति करणाद्व्यपराजितनृपतिराज्यांतरवर्तीतत्तत्पुरुषीयक्रमागतस्था
वरादौ जयादिना जेतुर्नृपतेः करग्रहणोपयोगिस्वत्वोत्पादेऽपि न व्यभिचारः॥ इति संक्षेपः॥ दाये
निरूप्य भागं निरूपयति तुष्टच्छतीति॥ नन्विति॥ नारदेन विभागयोरेकत्वप्रतिपादनादाह॥ विभाग इति॥
दायविनाशेति॥ आरंभकसंयोगप्रतिद्वंद्विनावयवद्वयविभागेनासमवायिकारणस्यारंभक
संयोगस्य नाशाद्द्रव्यनाशापत्तेरित्यर्थः॥ इदमुपलक्षणं॥ अविभक्ते सखंडेऽपि तत्सत्वात्॥ अखंडे
पीतदसत्वाच्चेति द्रष्टव्यं॥ संयुक्तेपीति॥ संयुक्तेपि वस्तुनि॥ इदं वस्तु॥ विभक्ते भ्रातुः स्वं न ममेति
प्रयोगादित्यर्थः॥ यद्यपि इदं विभक्तमिति प्रयोगस्यैवापेक्षितत्वेन भ्रातुः स्वं न ममेति थेकेन मनु
पयोगि॥ तथापि वैशेषिकव्यवहारस्याविभागाधीनत्वात्॥ तत्र भक्तत्वस्यावश्यंभावप्रतिपादना
र्थं तत्कथनमिति॥ संबंधविशेषादिति॥ स्वत्वहेतोस्तत्पुत्रत्वादिसंबन्धस्य सकलपुत्रादिसाधा
रण्यादित्यर्थः॥ सर्वधनोसन्नस्येति॥ संपन्नो व्रीहिरितिवत् सामान्याश्रयणादेकवचनं॥ द्रव्यविशे

Indira Gandhi National
Centre for the Arts

सामुदायिकस्वत्वविनाशतत्तद्देशीयस्वत्वहेतुभूतो व्यापारः॥
दायभाग.टी.॥ एकैकस्मिन्नंशे॥ व्यवस्थापने॥ सामुदायिकस्वत्वविनाशतत्तद्देशीयस्वत्वहेतुभूतो व्यापारः॥ तेन मृतपितृकपौत्रादिसद्भावस्य संग्रहः॥ जीव
१७॥ संबंधांतरेति॥ तुल्याधिकारसंबंध्यंतरेत्यर्थः॥ तेन मृतपितृकपौत्रादिसद्भावस्य संग्रहः॥ जीव
त्पितृकपौत्रासद्भावस्य चासंग्रहः॥ संबंध्यंतरसद्भावः प्रतिपक्षः स्वजन्यफलविरोधीयस्य ता
दृशस्य पुत्रादिरूपसंबंधस्य॥ अवयवेष्वेव॥ एकैकस्मिन्नंश एव स्वत्वोत्पादकत्वादित्यर्थः॥ क
स्यकुत्रांशे स्वत्वमित्यत्र निर्णायकमाह॥ विभागव्यंग्येति॥ तथा च यदंशे यस्य स्वत्वं तदंश एव त
स्य गुटीकापातन्यायेन नियमः इत्यभिप्रायः॥ विभागस्य च व्यंजकत्वेन तदभावादेव न विभागात्पूर्वं
विशेषनिष्ठत्वेपि न तत्तत्पुरुषीयत्वप्रत्यय इति भावः॥ ननु संबन्ध्यन्तरसत्तायाः सामान्यत एव सं
बंध्यन्तरस्वत्वविरोधित्वे कुत्राप्यंशे कस्यापि स्वत्वं नोत्पद्यते विरोधिसत्त्वादिति चेदत्र ब्रूमः॥ सं
बंधाधीनस्वस्वत्वप्रागभाववत्त्वप्रत्यासत्त्या संबन्ध्यंतरस्यैव संबंध्यन्तरीयसंबन्धाधीनस्वत्वं प्र रामः
तिविरोधीत्वं॥ विभागानंतरं प्रादेशिकस्वत्वस्य भवतामप्युपेयत्वेन तत्प्रागभावस्यासिद्धत्वादिति॥ ७॥

नानुपपत्तिः॥ संबन्ध्यन्तरसत्तायाः प्रतिबन्धकत्वे प्रमाणमाह॥ कॢप्तेति॥ सकलपित्रादिध
नगतसंबंधिसमसङ्ख्यसामुदायिकस्वत्वानि तेषामुत्पादविनाशाश्च एतावदनंतपदार्थक
ल्पनापेक्षया प्रतिबंधकल्पनस्यैव लघुत्वादिति भावः॥ प्रमाणसत्त्वे गौरवमप्यकिंचित्करमतः
प्रमाणाभावमाह॥ यथेष्टेति॥ यथेष्टविनियोगरूपफलानुगमयमिदं स्वत्वं समुदायेपि संबन्धि
नस्तदभावेन कथं तत्कल्पनमिति भावः॥ अविनियुक्तविनष्टे च ममेदं विनष्टमिति प्रतीतिव
लात्स्वत्वमुन्नेयमिति द्रष्टव्यमुपलक्षणं॥ विभागस्य स्वत्वहेतुत्वे स्वत्वनाशकत्वे प्रमाणाभावात्॥
एकपुत्रे स्वत्वे व्यभिचाराच्च तत्रावश्यकल्पनीयकारणान्तरादेवान्यत्रापि निर्वाहेणान्यथा
सिद्धेश्च॥ विभागस्य स्वत्वनाशकत्वे चौरेवी भज्य गृहीतधनेन स्वत्वनाशापत्तिरित्यपि बोध्यं॥
उच्यत इति॥ महीरण्यादावुत्पन्नस्य एकदेशोपात्तस्य तत्तदंशावच्छिन्नस्याविनिगमनादुभयम
मुकस्य नान्यस्येत्यवधारणरूपात्तत्प्रमाणाभावेन वैशेषिकव्यवहारः॥ परस्परनैरपेक्ष्येण

Indira Gandhi National
Centre for the Arts

दायभागः ज्ञानविक्रयादिलक्षणस्तदनर्हतया व्यवस्थितस्य सतोऽप्यसत्कल्पस्य गुटिकापातादिना व्यंजनेदद
॥८॥ ममुकस्येत्यवधारणं विभाग इत्यर्थः॥आदिनाउभयसम्मतमध्यस्थवचनपरिग्रहः॥अत्र एकदे
शोपात्तेत्यादिकं स्वरूपकथनमात्रं नतु विभा पदार्थकोटौ तत्तदुपेणतेषां निवेशः विभागपदा
ध स्वामि र्थस्तु पूर्वस्वत्वनाशक जन्यतत्संबंधाधीनसमुत्पन्नस्वत्वावधारणमात्रमिति॥अत एव संभयव
णिजां समुदायधनविभागे व्याप्तिश्च॥तत्पुत्राणां प्रागुत्पन्नस्वत्वाभावेन निरुक्तविभागत्वासंभवा
त्॥न च तत्र विभागपदे स्वत्वावधारणस्वरूपगुणयोगाद्गौणमिति वाच्यं मुख्यत्वे संभवति गौणत्वस्या
न्याय्यत्वादत आह विशेषेणेति पुरुषविशेषनीरूपीतांशविशेषनिष्ठत्वेनेत्यर्थः॥स्वत्वज्ञापनमि
ति स्वत्वज्ञानानुकूलो व्यापारो गुटिकापातादिरित्यर्थः दायभागदेपितु युसेपगौभावेपिधात्नामनेका
र्थत्वाभ्द्रातिरेवकेवलो विशिष्टार्थमभिधत्त इति॥एवं च भजत्यर्थे कदेशे ज्ञाने व्यर्थस्यप्रकारितयान्व
यात् विशेषण स्वत्वज्ञानानुकूलव्यापारलक्षणो विभागः शक्तिलभ्य एव न रूढी कल्पना न वापि त्रितवि ॥एम॥
॥८॥
नदायभाग इति॥अस्मिन्नर्थे च विभागपदस्य योगाभावाद्रुढीरेवेति बोध्यं॥न च त्रहढीकल्पने गौरवं। एवं पितृकृतविभागे ऽ॥६॥

भागव्याप्तिरिति॥अस्मिन कल्पे संभय वाणिजिकानां धनविभागत्वमस्त्येव रूढिकल्पना किंतु सन दाय
भागः तद्धनस्य दायत्वाभावादिति बोध्यं॥ननु यत्र एका एव दासी गवादिव्यक्ति र्वा पित्रसंबंधिनी तस्याप
रस्पर विरोधेन कस्यापि स्वत्वेन स्यात्॥तथा च तद्विभागो न दायभागः स्यात्॥अत आह यत्रेति कालविशे
षेति कालविशेषव्यवस्थापितद्वित्रिदिनादौ वहने दोहने वा फलं यस्य तादृशेन प्रथमे दिनद्वये त्रयादि
वा ज्येष्ठस्य तदनु चतावद्दिने तदनुजस्य एवं चापरापरमपरेस्य स्येति मध्यस्थवचनेन स्वत्वं व्यज्यत
इत्यर्थः॥तथा च एकस्यामेव व्यक्तौ कालिकाव्याप्यवृत्तिनि नाना स्वत्वानि स्वामित्वलक्षणानि सर्वेषु पु
त्रेषु प्रागेवोत्पन्नानि तेषां चैकैकस्यानंतरमाविमध्यस्थवचनेन कालविशेषणतत्तद्व्यक्तिनिष्ठत्वेनावधा
रणमिति॥तत्र तादृशमध्यस्थावचनमेव तत्तद्विभागोऽव्याहत इति भावः॥कालभेदेन स्वत्वं चेत् प्रा
गुत्पन्नं प्रमितं स्यात्तदा तत्प्रतिपादकमध्यस्थवचनमपि विभागः स्यादतः कालभेदेन तादृशस्वत्वप्र
माणमाह॥एकांस्त्रीमिति यथांशेन भागी समसंख्यादिव सांशेन॥अनुसारेण स्वत्वप्रयोजनानुसारे

णनतुपरिमाणसाम्येन न तु यथा एकस्मिन्सुवर्णे अंशावंशभेदेन स्वत्वमभ्युपेयते तैर्येकस्यामपि दासीग
वादिव्यक्त्यावंशभेदेन स्वत्वमभ्युपयतामत आह ओ॥ युक्त्येति॥ युक्तिश्च प्रयोजनसापेक्षवैशिष्ट्यकम यथेष्टवि
नियोग एव विभागप्रयोजनं तच्चावयवविभागस्यासंभवि॥ अवयवानां स्वातन्त्र्येण यथेष्टविनियोगानर्ह
त्वात् निरर्थकश्चैव विभागः स्यात्॥ इत्येतदेवाह॥ अन्यथेति॥ अवयवीनिनिधित्वापत्तिरयेन कस्यापी
तिव्यवहारापत्तिश्च द्रष्टव्या॥ तथा च नायत्या कालभेदेनैव स्वत्वमिति॥ सुवर्णखंडादीनां च स्वातन्त्र्येण
विनियोगार्हत्वात्॥ तत्र देशभेदेनैव स्वत्वमिति॥ ननु तत्कालस्वामिना वस्तुनि विक्रीते कालांतर
स्वामिनामननुमतिमंतरेणापि क्रेतुः सार्वकालिकस्वत्वापत्तिरितिचेन्न॥ विक्रेतुर्यादृशं स्वत्वं क्रेतु
स्तादृशमेव स्वत्वं क्रयाज्जायते॥ एवं च क्रेतुर्विक्रेतुः स्थानीयतया अन्यैः सह तद्वस्तुनः पर्यायेण वि
नियोगः इति॥ अत एव राज्यांतराधिकारिणः सकाशात्॥ नृपतिना क्रीतेपि राज्यांतरादौ विक्रेतुः स्वत्व
स्वजातीयकरग्रहणोपयोगिस्वत्वमेव तत्र तस्य जायते न तु दायप्रतिग्रहीतृभर्तृस्यादिवृत्तिस्वत्वसजाति एमः ॥ ८॥

यस्वत्वं तत्र स्यान्नो तत्र भर्त्र्यादौ तथाविधस्वत्वसत्त्वेन तद्विरोधात् तादृशस्वत्वांतरस्यासंभवात्॥ समानस
जातीययोस्तयोर्विरोधादिति॥ एतत् श्लोकार्द्धं त्रयस्य संहितायां क्रमेणादर्शनादसत्त्वसंकामपने
तुमाह इदमिति॥ यच्चात्र स्मार्तेन दूषणमभिहितं॥ अविभक्तभ्रात्रोरेकेन भ्रात्रा साधारणाश्वयोरेकतरमा
दायधनमर्जितं तत्रार्जितधनेऽर्जकस्यांशद्वयं अपरस्यैकोंऽशः सर्वसंमतः॥ तत्र यदि घुटिकापातेदिना
पश्चादर्जकेनैव सोऽश्वो लब्धः तदा प्रादेशिकस्वत्ववादिमते प्रागर्थ अर्जकस्यैव सोऽश्व इति तेनार्जितधने
धने कथं भ्रात्रंतरस्य भागः॥ यदि चानर्जकेनालब्धस्तदा समभागो युक्तः॥ एकस्याश्वायासेनापरस्याश्वा
यासेनार्जितत्वात् इति॥ तदसत् प्रादेशिकस्वत्वमते॥ अविभक्तस्यैव साधारणपदार्थत्वात् साधारणा
न्यस्वत्वानभ्युपगमेनान्यविधस्यासंभवात्॥ अतश्चानुक्तदोषासंभवादिति सुधीभिर्भाव्यं॥ अत्र हरिनाथ
मिताक्षरावाचस्पतिमिश्रप्रभृतयः यत्र यस्य स्वत्वं तत्र तस्यालक्ष्यपातः इत्यत्र प्रमाणाभावात् दुर्विभक्त
त्वेन पुनरक्षपाते विसंवादाच्च किंच एकक्षेत्रोपन्नोस्यानां यत्रांशक्रमेण ग्रहणं तत्र विभूच्छेदेन तत्र स्वत्वे



Indira Gandhi National Centre for the Arts

दायभाग: जायते न शब्दावच्छेदेन शस्यानां तदानीमजातत्वात् किंच एकेन गवा कृष्टम् स्यादित्ययमपि सभाग:॥ तत्र
॥१०॥ किमवच्छेदेन शाविस्वत्वं शस्यादेस्तत्संबंधात्॥ नह्यत्र संबंधोऽवच्छेदकः किंच संबंधसाम्यात् सर्वे
षां सर्वत्र सत्वोत्पत्तौ बाधकाभावात्॥ प्रागभावादृष्टादीनां विशिष्य हेतुत्वाभावात्॥ संबन्धानां स
त्तायाः प्रतिबंधकत्वे गौरवात्॥ न च समान्यस्वत्वोत्पत्तिविनाशकल्पनागौरवं प्रामाणिकत्वात्॥
एकस्यां दास्यां दास्यादिभागे नाशस्वत्वे त्रिदिनान्तरं स्वत्वनाशः तदुत्पत्तिकल्पनायां विपरीतगौरवाच्च॥
विभागस्य स्वत्वनाशकत्वं तद्धेतुत्वं च पितृकृतविभागे कल्प्यमिति प्राहुः॥ विभागः प्रागुत्पन्नस्वत्व
ज्ञापकः स्वत्वजनको वेति मतद्वयोपरि माध्यमकः शंकते॥ नन्वेतेन पुत्राणामिति॥ पितुरूर्ध्वमिति ष
ष्ठीबोधितपितृस्वत्वस्य प्रतिबंधकत्वात्॥ तथा च प्रागुत्पन्नस्वत्वज्ञापको विभाग इत्यसंभवेति
भावः॥ द्वितीयमतमाशंक्य निषेधति॥ नचेति स्वत्वकारणत्वेनोपलक्षणं॥ एवं स्वत्वनाशकत्वेऽपि बो राम:
ध्यं॥ अस्मदीति॥ दासीनेत्यसंबंधिधनगुटिकापादेऽन्तेन तत्र स्वामिस्वत्वनाशोदासीनस्वत्वयोः प ॥१०॥

संगादित्यर्थः॥ न च संबंधिधनस्वत्वस्यकारणत्वमिति वाच्यं तु स्यात् अथ जीवतः पितुरूर्ध्वं पुत्रे वला
द्विभागे तदापत्तेः॥ विभागानुपूर्वेण स्वत्वव्यवस्थापनेनैव स्वाभावत सिद्धविभागस्य निष्पत्त्युहेतोर्ति
तद्धावपयतिरुच्यत इति॥ पितृनिधनानन्तरमित्यत्र निर्धनपदं इतरस्वत्वाभिसंधानापूर्वकस्वत्वाप
गमहेतुभूतव्यापारोपलक्षकमेवमुत्तरत्रापि बोध्यं॥ ननु विभागसंबंधिनाक्रियमाणः स्वत्वहेतुरत्नोना
संबंधिधनेऽतिप्रसंगः तस्य च संबंधिनिधनपातित्याश्रमान्तरप्रवेशाद्यन्यतमकालस्य सद्भा
वित्वात्॥ न च लोऽद्वीभागे तदोत्तरत्वो विभागात् पूर्वे॥ अस्मदीयमिति प्रयोगो गौणः एवेत्युत आह॥ एकपुत्रे
वेति॥ तथा च व्यभिचरितविभागस्य सामान्यतः कारणत्वविधेन तत्र कल्पनकारणादेव संबंधिनिधना
द्व पुत्रादिस्वत्वे पितृत्व संभवेनदन्यथासिद्धेश्च सर्वत्र संबंधिनिधनमेव स्वत्वहेतुरिति सन्न स्वत्वघटित
विभागलक्षणस्यनानुपपत्तिर्न वा पूर्वं यस्मदीयमिति प्रयोगो गौणः किंतु मुख्य एवेति पितुरूर्ध्वमिति
मतं एवं स्वत्वादुपपादयमिति भावः अर्जयितुरित्यापार एवेति॥ इदं च नार्जनार्जयितोर्लक्षणपरं॥ आत्मा
श्रयप्रसंगात् किंतु अर्जनस्वामित्वयोः सामानाधिकरण्ये न कार्यकारणभावपरं॥ अर्जनलक्षणं तु स्वा

दायभाग: मित्वहेतुभूतव्यापारत्वमेव तथा च व्यधिकरणस्यापि पितृमरणादेर्न पुत्रस्वत्वोत्पत्तौ हेतुत्वमिति शंकार्थः॥ तेन
॥२२॥ व्यधिकरणस्य हेतुत्वासंभवेन जन्मैवेति॥ न च पुत्रोत्पत्त्यनंतरं पित्रर्जितद्रव्ये स्वत्वानुपपत्तिः प्रत्यक्षेण स
बंधरूपपुत्रजन्मनोऽतीतत्वादिति वाच्यं॥ जन्मपदेनात्राप्रत्यक्षेण संबंधध्वंसस्यैव लक्षणया उक्तत्वात्॥
ननु स्वत्वं यथेष्टविनियोज्यत्वेन शास्त्रगम्यत्वलक्षणं तच्च पितुर्भाविद्रव्ये पुत्रस्याक्षतं पितुर्द्रव्यं पुत्रेण यथे
ष्टविनियोज्यमिति शास्त्रेण पितृद्रव्यलाभच्छेदेनैव पुत्रविनियोज्यत्वास्य बोधनादिति चूडामणिमतमा
दरणीयमिति चेन्न॥ तथा सति जन्मप्रागपि स्वत्वे जन्मैवाजनमित्यनुपपत्तिः॥ किंच स्वविनियुंजीरन्निति श्रुति
वाक्यान्वयबोधे सति यथेष्टविनियोज्यत्वेन शास्त्रगम्यत्वरूपस्वत्वज्ञानं स्वपदादुपस्थितिः॥ तस्यां सत्यां च
तस्य तदन्वयबोधरूत्यन्योन्याश्रयात्॥ स्वत्वं पदार्थांतरमेव स्वत्वत्वं चाखंडोपाधिविशेष इति युक्त
मिति अर्जनस्वामित्वयोः सामानाधिकरण्यानुरोधात्॥ इति भावः॥ जिवत्येवेति पाणित्यादिकं विनि
तिशेषः॥ जन्मैवेति अर्जनमिति शेषः॥ प्रदूषयति नेतादिति उर्द्धं स्वत्वोपरमानंतरं॥ भार्या पुत्रश्च दा राम:
सश्च त्रय एवाधनाः स्मृताः॥ यत्ते समधिगच्छंति यस्यैते तस्य तद्धनमित्यत्र यथा॥ अधनात्वस्यास्व ॥२२॥

त्वेत्रार्थ इत्यर्थः॥ तथा अनिशाइत्यास्यापि अस्वतेत्राइत्यर्थो वाच्यः॥ इत्याशंक्योतेन चेति तदानीं पितृजी
वनकाले भार्यादिष्विति॥ अर्जयंतीत्यनेन स्वत्वहेतुरूपार्जनबोधनात् स्वत्वप्राप्तौ तदन्यथानुप
पत्त्या युक्तमिस्वातंत्र्यवर्णनमित्यर्थः॥ नन्वधिगमो नोपार्जनं किंतूपादानमेव वाच्यमत आह॥ किं
चेति न च पत्त्यादिभिः दत्तैः कर्मोपपत्तिरिति वाच्यं तर्हि पत्त्यादिकृतत्यागो भार्यादीनां स्वत्वमुत्पादयेत्॥
तथा चान्यतो लब्धे यथालाभांतरमेव पत्त्यादेः स्वत्वे तथा पत्त्यादितो लब्धेपि स्यादिति कथं तेन कर्मोपप
नी त्तिरिति॥ ननु अंशाइत्यस्यास्वतंत्राइत्येवार्थः॥ अस्वाम्यार्थकत्वे जीवतोरिति द्विवचनवलात्मपित
रि जीवति मातरि जीवन्त्यामनीशाइत्यस्य पित्रुपरमानंतरं मातृस्वत्वविषये बाधापत्तेः दातेनी पुत्रा
णां स्वामित्वे सर्वेषामविवादात् अत आह एवं च इति॥ तथा चात्र मातुरश्रुतत्वात् स्वाम्यपदं मुख्यमे
व न स्यात् त्यलाक्षणिकमिति भावः॥ नन्वत्र नञर्थो न सर्थोऽप्राशस्त्यमेव अप्राशस्त्यं विरोधश्चेत्यादि
नातस्यापि न सार्थयोक्तेः स्वाम्यस्याप्राशस्त्यं च पित्रनुमतिं नैरपेक्ष्येण विनियोगाप्रयोजकत्वे॥ अभा

Indira Gandhi National
Centre for the Arts

दायभाग॥ वार्थकत्वेभवत्यर्थोपपत्त्यन्वयानुपपत्तेः अतआह किंचेति॥ ननुपितुरनुमत्यादायभागः जीवतिपितरीत्य
॥१२॥ क्यविभागोऽनुमतेरित्यादिवचनात्॥ विभागेप्यास्वातंत्र्यमविशिष्टमित्यतआह॥ जन्मनैवेति॥
तथाचानुपपत्त्यभावात्॥ अस्वाम्यमित्यत्रनलक्षणाभवतिस्वास्तिसमानालाक्षणिकत्वमितिभावः॥
स्मृतिरेवप्रमाणमितिनिराकरोति॥ अजेनरूपतयेतिततश्च उत्पत्त्यैवार्थस्वामित्वाल्लभेतद्व्याचा
र्यामन्यतेद्युतिमिताक्षराधृतगौतमवचने अमूलत्वेसमूलत्वेवायस्मिन्गर्भस्थेपित्रादिमृतेः तत्परंअ
न्यथापुत्रवत्॥ पितुःस्वधर्मप्यस्वातन्त्र्यापत्तेरित्याशयः वस्तुतस्तु उत्पत्त्यैवेतिजन्मनीयाप्रयोजकता
यातथाचोत्पत्तिसंबंधस्यसंबंधान्तरएवाधिकृतयातत्प्रयुक्तोजनकधनेतत्स्वत्वापगमानन्तरंपुत्रो
धिकारीत्यत्रतात्पर्यमितिबोध्यं॥ क्वचिदितिग्रंथान्तरे॥ जन्मैवेतितिलौकिकेप्रामाणिकवाक्यमित्य
र्थः॥ जन्मनिबन्धनेति तत्रपितृमरणस्यकारणत्वेजन्मनेपितृत्वप्रयोजकत्वादित्यर्थः॥ ननुफलाधि दा.भा.
करणप्रत्यासन्नस्यैवफलजनकतातत्रचसाक्षात्प्रत्यासत्तिसंभवेपरम्पराप्रत्यासत्तिर्नाश्रीयतेगौरवात्त १२

१३

थाचपितृमरणादिव्यधिकरणतयाजनकत्वाभावात्॥ साक्षात्प्रत्यासत्तिशालिनोजन्मनएवकारणत्वं
स्यादतआह॥ अन्यव्यापारेणेति॥ शास्त्रमूलेनेति॥ तथाचशास्त्रबलेनैवव्यधिकरणस्यपरंपरया
कारणत्वमितिभावः॥ ननुशास्त्रमनीशास्तेहीत्यादिकंतत्रास्वातंत्र्यपरमेवेत्युक्तमित्यतआह दृष्ट
मेवेतित्यागमात्रात्॥ वृषोत्सर्गादिरूपात्स्वामित्वाजननादाह चेतनोद्देशेनेति उद्देशः स्वामित्वेनविषय
तासाचत्यागात्मिकायाइच्छायाएवद्रव्याहविशिष्टात्यागादिति॥ त्यागात्तुकेवलस्वत्वनाशः संप्रदा
नस्वत्वंतुममेदमिति॥ भाविस्वत्वावगाहितत्स्वीकारादेवेतिमतंनिराकरोतिनचेति॥ स्वीकर्तुर
वेत्येवकारेणात्यन्तव्यवच्छेदः तदेवमुपपादयतिपरस्वत्वापत्तिफलेनहीतितत्रायमाशयः धात्वर्थ
तावच्छेदफलानुकूलव्यापारवतएवतज्जनतद्दातृव्यपदेशस्तेयथाधात्वर्थतावच्छेदकोत्तरसंयो
गानुकूलव्यापारवतिचैत्रेगतेतिव्यवहारः स्वीकारस्यस्वत्वहेतुत्वेपिधात्वर्थतावच्छेदकफलस्वत्वा
नुकूलस्वीकाररूपंव्यापारवतः स्वीकर्तुरेवदातृपदव्यपदेश्यत्वापत्तिः एवंस्वत्वध्वंसरूपफलस्या

Indira Gandhi National
Centre for the Arts

रामदत्यभाग: नुनत्तद्व्यपदेशनियामकातात्तथात्वेउपक्षितुरपिदातृत्वव्यपदेशापत्तेरिति॥केचित्तुस्वीकारस्यस्वत्वहे
॥१३॥ तुत्वेपरस्वत्वफलोपहितत्यागात्मकदानेसर्वांशएकस्यकर्त्तृत्वासंभवात्॥एकांशमादायैवदातृ
व्यवहारेकर्त्तव्येप्रधानीभूतफलांशानुकूलव्यापारवत्वेवदातृव्यवहारस्याद्धितिव्याचक्रुः॥दृष्टांते
नेदंदृढयति॥यथाहेति॥होमाभिधाननिमीत्तमितिविशिष्टदेशावच्छिन्नप्रक्षेपहितत्यागस्यहोम
त्वात्प्रक्षेपस्यतदभिधाननिमित्तमित्यर्थः॥हुधात्वर्थतावच्छेदकंप्रक्षेपानुकूलव्यापारवत्ति॥ऋत्वि
जिहोतीतिव्यपदेशोयथेत्यर्थः॥त्यागस्यस्वत्वहेतुत्वंस्फुटमेवशास्त्रप्रमाणयति॥किंचेति॥आदि
नाभूमौतोयेविनिक्षिपेदित्यस्यप्रतीकपरिग्रहः॥शास्त्रेशास्त्रबोधितत्यागेनपदेदृष्टमितिविद्यतेसा
गरस्यातोनतत्रदानस्यांतोनविद्यतेइतितद्वचनस्यात्तरार्द्धेनदानपदंप्रयुक्तमित्यर्थः॥तथाचनिरंतरयो
रेवस्वस्वत्वध्वंसपरस्वत्वोत्पत्तिफलयोर्ददातिधात्वर्थतावच्छेदकत्वाद्दानस्यपरस्वत्वहेतुताशास्त्रसिद्धैव राम: १३
तिभाव:॥स्वीकारप्रागेवस्वत्वग्रहणस्यस्वीकारपदार्थत्वासंभवमाशंकते॥नन्वति॥इतिस्वीकारपदा

र्थइतितथाचस्वपदस्ययथेष्टविनियोगार्हत्वविशिष्टलक्षणेतिभाव:॥नन्याजनाध्यापनप्रतिग्रहै
र्ब्राह्मणोधनमर्जयेदित्यत्रराजसूयेनयजेतेत्यादिवत्याजनाद्यात्मकंधनमर्जयेदित्यन्वयात्॥
प्रतिग्रहस्यार्जनरूपतासिद्धा॥प्रतिग्रहस्यस्वत्वाहेतुत्वेचतद्विरुद्धस्वत्वहेतुव्यापारस्यैवार्जनत्वात्॥
अतआहयार्जनेति॥अर्जनरूपताअर्जनपदव्यपदेश:॥अविरोधमुपपादयतियाजनादावितिं॥त
थाचयाजनादीनांस्वत्वाहेतुत्वेनतदन्वयानुरोधवत्॥अर्जनयेदित्यत्रार्जनत्वेनस्वत्वजनकत्वंकिं
तुस्वत्वप्रयोजकत्वमेवतच्चप्रतिग्रहेपक्षांतरेसेतेत्तिअयंप्रतिग्रहणातीत्यवधारणाएवतदुद्देशे
नदातुस्त्यागान्नस्वत्वोदयात्॥प्रतिग्रहेवमुख्यज्ञानेतद्व्यतिरेकाद्वेतिभाव:॥ननुधात्वर्थगमनोद्य
नुकूलकृतिमत्येवगत्रादिव्यपदेशोलाघवात्॥ननुधात्वर्थतावच्छेदकफलानुकूलव्यापारव
तिगौरवात्॥तथाचकथंप्रतिग्रहीतुर्दातुत्वापत्ति:॥तस्यदानुनोकूलकृत्यभावात्॥अतस्वकृति १४
गवहोत्तेत्युच्यतेतस्यैवदानानुकूलकृतिमत्वात्॥नयजमानस्यभवन्मतेस्वीकारेस्वपदस्यार्थे

Indira Gandhi National
Centre for the Arts

दायभाग॰ स्वविनियोगहेतुविशिष्टलक्षणावच्छिन्नमतेपिशास्त्रीयदानपदस्यस्वत्वाभिसंधानपूर्वत्यागोलक्षणाकिं
॥१४॥ चयाजनाध्यापनयोःस्वत्ववजितयाप्रयोजकत्वात्॥तत्समभिव्याहृतप्रतियोगत्वस्यतथात्वेयुक्तेनतुप्रयोजका
ज्ञानविषयतया॥अपिचत्यागमरणादेःस्वत्वहेतुत्वेतदानीत्यक्तमृतादीनांअर्जयितृत्वप्रतीतिव्यवहारा
पत्तिरतःसमाधीनांकरणव्यापारएवस्वत्वहेतुर्लोकवात्॥तत्कथंपितृनिधनात्पुत्रस्वत्वहेतुत्वमतआ
हपितृनिधनकालीनांचेति॥पुत्रजीवनमेवस्वत्वहेतुःतत्रापिपितृधनेनिनकालःसहकारीत्यर्थः॥एवंसत्य
स्वाम्यंहीत्यादिकमपिसंगच्छते॥जन्मनोहेतुत्वेतत्रलक्षणास्यादितिभावः॥विनिगमकोत्तरमाहकिंचे
तिमरणस्यहेतुत्वेपूर्वोक्तदोषापत्तेरतस्तन्मरणकालीनजीवनादितिअकामेनापीतिअन्यथामातृपर्यं
तरहितमातृधनेतस्मिन्निर्दोषेजीवत्यपिभात्रेतरस्याधृष्टतासंबंधसरूपजन्मस्वत्वापत्तेस्तदनिच्छे
यापिविभागसंगात्॥भ्रातृस्वत्वस्यचभात्रेतरस्वत्वाविरोधात्॥सामुदायिकस्वत्वेतथादर्शनात्॥ए
वंभ्रातुदारपरि[illegible]परेतदनंतरंजातेभ्रातुःस्वत्वनाशस्तदामरणोपनःस्वत्वोत्पत्तिरिकल्पनागौरवा दा॰भा॰ ॥१५॥

वात्॥अतोऽत्रक्लृप्तकारणद्वावपिजीवनादन्यत्रापिनिर्वाहेकिंपुत्रस्वत्वेप्रतितज्जन्मनोहेतुत्वकल्पनये
तिभावःअत्रमनोःस्वरसंदर्शयतिअतइतियेनाजीवतिनस्वत्वमतइत्यर्थः॥यतउक्तन्यायात्परमएवस्व
त्वंअतइच्छयाविभागोपितदाप्राप्तएवेतिविभागविध्यनुपपत्तेराहतत्कालीनेति॥पितुरूपरमकालीन
मित्यर्थः॥अनुवदतीतितथाचतात्कालिकस्वत्वज्ञापनार्थंविभागानुवादयेवतद्विधिरितिभावः॥विधि
त्वेभवत्यनुवादत्वमन्याय्यमतोनियमविधिरेवभविष्यतीत्याशंक्यनिषेधातेनचेतिनियमःपितुरूर्ध्वंवि
भजेदित्येवंरूपः॥दृष्टार्थत्वादितिदृष्टमात्रार्थत्वाददृष्टाजनकत्वादितियावत्॥तथाचादृष्टजनकक
र्मण्येवकरणाकरणयोःशुभाशुभादृष्टमात्रार्थोनियमः॥यथाजलाशयोत्सर्गादौगोस्वास्तारणानुमं
त्रणयोर्यजमानकर्तृकमंत्रपाठनियमःकरणेशुभादृष्टार्थपोष्यवर्गादिभरणादिनिमश्चअकारणाद
भादृष्टार्थःइतिकरणाकरणोकार्यजनकत्वयंविभागोवचनशतेनापिनियंतुमशक्यइतिभावः॥य
दिविभजेत्तदपितुरूर्ध्वमेवविभजेदित्येवंरूपः॥प्रथमस्त्वदृष्टार्थसेवकालनियमइत्यतआहविचेति

Indira Gandhi National
Centre for the Arts

दायभागः पित्रुपरमानंतरमित्यत्रानन्तरमव्यवहितानन्तरं अनंतरमात्रे आधे अनंतरकालएवेतिपित्रुपरमाव्यवहिता
।१५।। नंतरकालएवेत्यर्थः।।विशेषणस्य च इतरव्यावृत्तिफलकत्वादाहनत्विति।।ननु यथा वैश्वानरं द्वादशक
पालं चरुं निर्वपेत्।पुत्रे जाते अव्यवहितोत्तरकालस्य प्राप्तावपि बाधकबलादशौचोत्तर क्रियते तथात्रापि।।
समयांतरे विभागो भविष्यतीत्यत आह जातेष्टीति जातप्राणेति तथाहि नाडीच्छेदानंतरं अशौचा
त्प्रागेव जातकर्मवदच्छिन्ननाडीदशायामेवेष्टिर्वाच्यास्ते पालं च कृतनाभिमिति ब्रुयात्।।स्तने च प्र
त्यादात् जातकर्मवदच्छिन्ननाडीदशायामेवेष्टि ... तिधत्ते इति गोभिलेन नाडीच्छेदात्पूर्वमेवाभिहितं भवेत्।।कलं च स्तन्यादाने शुष्ककंठतया बालवियोगा
पत्तेः।।इतितद्विरोधात्तत्र तथा इह तु न तद्विरोध इत्यर्थः।।द्वितीये पित्रुपरमानंतर्यस्य चेति।।स्वेच्छात
एवेति तथा च पित्रुपरमात्पूर्वं पुत्राणाम स्वाम्यात् विभागाप्रसक्तेः विभागे तदनंतरकालस्यावश्यक
त्वया विधिं विनापि सिद्धत्वेनाव्यावर्त्तकतया तथा नियमोव्यर्थ एवेति भावः।।अदृष्टार्थकत्वकल्पना समः
चादृष्टादि कल्पनागौरवपराहतैवेती हृदयं।।ननु तथापि परीसंख्याविधिरेवास्तां जीवतिपितरि पुत्रा ।।१५।।



नु विभजेरन्निति।।नानुवादताइत्याशंक्य निराकरोति।।अतइति।।सत्यपीति भवन्मते स्वत्वस्य जन्मनाप्रा
गेव जातत्वात्।।अन्यथा प्रसक्त्यभावे निषेधानुरोधानुपपत्तेः।।इति भावः।।वाच्यो भवेतेति शेषः।।अस्वा
र्थेति।।ऊर्द्ध्वं भजेरन्नित्यस्य जीवति न भजेरन्नित्यस्वार्थपरत्वापत्तेरित्यर्थः।।इदमुपलक्षणं स्वार्थहानिर
पि बोध्या।।प्राप्तबाधस्तु नास्ति।।जीवति पितरि विभागस्य प्राप्तेरिति बोध्यं।।एतेनात्र स्वार्थहानि प्राप्तबाधा
वपि बोध्याविति।।चूडामणिकृतोनयुक्तं प्रयोजनवत्तया।।अनुवादेन दोषायेति।।स्वमतमुपसंहरति।।अ
तइति एकाजीवति स्वाम्यभावः।।अनीशाइति शास्त्रबोधितः।।अपरउपरमे स्वाम्यरूपोऽर्थो विभागोन्वेयः।।उपर
मपदस्य यथाश्रुतार्थपरत्वे पतितादौ जीवति पितरि तद्धनविभागाभावप्रसंग इत्यत आह।।नचेति।।न हीत्यर्थः।।
आदिना वानप्रस्थोपरतस्पृहत्वपरिग्रहः लक्षतावच्छेदकमाह स्वत्वविनाशेति तथा च स्वत्वप्रतिसंधाना पूर्वक
स्वत्वापगमहेतुव्यापारत्वेन लक्षणा इत्यर्थः।।तेन पित्रदत्तादौन विभागप्रसंगः दानादेः स्वत्वप्रसंधानपूर्वक
त्वादिति।।पातित्यादेः।।स्वत्वनाशकत्वे प्रमाणमाह।।मदाहेति।।अत्र पुत्रा विभजेयुरित्युपक्रमे लब्धत्वेन विभागा

Indira Gandhi National
Centre for the Arts

दायभाग तुवादात्॥पितृस्वत्वापगमपुत्रस्वत्वयोरवगमादिति भावः॥निर्दोषपितरि स्थिते इति देवलवचनेन दोषपितरि स्थिते
॥१६॥ पितृस्वाम्यावगमात् तदेकवाक्यत्वाच्च विनष्टेपतिते इति विनाशार्थकत्वेन युक्तं गतेपुत्रे इति नारदवचनांतरेणास
हृपोनरूत्यापत्तेरिति भावः॥अत्र पतितस्यापि सर्वस्वदानादिप्रायश्चित्तश्रवणात्॥प्रायश्चित्तपराङ्मुखइतिवि
शेषणादेयं॥तेन प्रायश्चित्तप्रागभावाभावसहकृतपातित्यं स्वत्वनाशहेतुरितिबोध्यं॥गृहस्थाश्रमरहितइ
ति॥गृहस्थाश्रमेगार्हस्थ्यं तद्रहिते आश्रमांतरगते इत्यर्थः॥गृहस्थाश्रमाश्रयेणेति पाठेपि शरणं गृहरक्षित्रो
रित्यरकोशात्तद्रक्षितरी तिपर्यवार्थः॥उपरतस्पृहे स्वत्वसमानाधिकरणइच्छाप्रागभावासमानकालीने
च्छाध्वंसवति॥येदेतिविनष्टेवापितरि तृतीयचतुर्थरणौ निवृत्तेवापियद्वापाठइत्यर्थः॥तदास्यनिःस्पृह
विशेषणत्वमाह॥तदेति॥यदातदेत्यस्वरसस्वनाय॥तद्विजं चविशेषणैवयथास्मीति॥पाठांतरमिति॥निवृत्ते
वापिमणाद्विति प्रकाशाद्धितपाठांतरमनाकरमित्यर्थः॥वहुषु पथेषु दर्शनात्॥तथाविधे पितरि विषयांत्त रामः
रस्पृहावत्यपि प्रसंगाच्चेति भावः॥ज्ञापनादिति ज्ञापनायेत्यर्थः॥ननु समेत्येति मिलित्वेत्यर्थः मिलने च सर्वे ॥१६॥

---

पामुख्यमसत्व एवतत्किमेकेच्छयानविभाग इत्यत्राह एकस्यापीति॥स्वाम्याद्विति तथा च स्वामित्वेन स्वा
तंत्र्यादेकेच्छयाविभागोनैयायिक एवेति भावः॥पक्षइति कदाचित्सर्वेच्छयाविभागः कदाचिदेके
च्छया यदा सर्वेच्छया तत पक्षप्राप्तमित्यमित्यर्थः॥अनास्थयेति शेषः अन्यथान्यायप्राप्तानुवादकतां विहाय व
चनबलाद्वतस्य विवक्षितत्वे साहित्यवदिति॥साहित्यं मिलनमात्रं न तु परस्परसापेक्षाणां तुल्यरूपा
णामेकक्रियान्वयित्वरूपमत्र साहित्यं॥विभागक्रियाया वैशेषिकस्वत्वावधारणरूपायाश्चैकस्यातादि
रूपतदनुकूलव्यापाररूपाया वा सर्वान्वयीत्वात्॥वचनान्तरेण तद्वयोर्विभागो भवेत्यतीत्याशंक्याम
पनयति द्वयोरिति॥किंचैवं एकस्य विदेशस्थत्वे वाल्यादिना ऽज्ञानत्वे वा मिलनाभावाद्विभागो वैधो अत्र
प्रत्यवहारणां धनेव्यय विवर्जिते॥ नयेषुवंधुवर्गेषु प्रोषितानां तथैव च॥इति वक्ष्यमाणवचनविरोधः
स्याद्विति॥पितृवज्ज्येष्ठ एव पितुरनंतरं धनाधिकारी तेन सह विभाग एवेतरेषां नास्तीत्याशंकते॥नन्व
तिपुत्रीभवति पुन्नाम नरकत्राणकर्त्रे पुत्रवान् भवतीत्यर्थः॥सतस्माद्विति॥तथा च ज्येष्ठस्य धनलाभे पु

Indira Gandhi National
Centre for the Arts

दायभाग॰ ७॥ मामनरकत्राणकर्तृरूपपुत्रत्वस्य हेतुत्वेनोपादानात्तद्रूपज्येष्ठस्यैव धनाधिकारः॥ नातद्रूपस्य जीवदपेक्ष्य
ज्येष्ठस्येति भावः एवञ्च सजातीयस्त्रीजातेषु विजातीयस्त्रीजातेषु उत्कृष्टजातस्यैव ज्येष्ठत्वं॥ स्वदेशस्त्री
षुजातानां पुत्राणामविशेषतः॥ न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्येष्ठमुच्यते इति मनुवचनात्॥ धर्मजाः ननु सा
गजः अपुत्राः सन्त्वद्य इति निन्दार्थवादादिति भावः॥ अद्यशोऽद्यशीलाश्च सा इति मिश्राः॥ तथा च विभागव
चनेमृतज्येष्ठकनिष्ठभ्रातृ॥ एव विषयमिति पूर्वपक्षयितुरभिप्रायः। ज्येष्ठता चात्रेमिति ज्येष्ठ एवेत्य
वधारणाज्ज्येष्ठस्य सति मरणसमर्थं ज्ञेयं॥ पृथग्विवर्द्धते इति यद्यप्यविभक्तानामप्येकेनैव कर्मणा सर्वेषां ध
र्मोदयात्॥ पृथगभावे धर्मवृद्धिरनुपपन्ना तथापि पार्थक्ये स्वस्वसाधारणद्रव्येण कृतकर्मणोऽतिशयितधर्मवृद्धेस्त
थोक्तमिति॥ अनपगत एवेति यद्यपि पितुरिच्छया विभागेऽपि पक्षे पितुः स्वत्वनाशोऽवश्यमभ्युपेयः॥ अन्यथा स्वोक्त
विभागस्यैवानुपपत्तेः॥ तथापि विभागस्येच्छाधीनतदनधीनतदनस्वत्वावगमाभ्यां कालसुक्तं वस्तुतो लाघवात्
इतरस्वत्वाभिसन्धानपूर्वकपितृस्वत्वापगमकाल एव दायस्याविभागे निमित्ते न तु कालद्वयं गौरवादिति राम॰ ७

ध्येयं च। उपरामाणिसम्मतोयं पक्ष इति॥ यत्र तु पुत्राणां सम्भाव्यमानभाविकलनिरूपणार्थं पिता तज्जदेशान्व
धार्य पुनस्तेषु स्वयमधिरोहति तत्रापि तत्स्वरूपेक्षाविरहेण तत्स्वत्वस्यैवाविद्यमानत्वात् तत्र विभागप्रयोगो भाक्तः।
इति मिताक्षराकृन्मतं निरस्यति पुनरिति॥ विहेतु उद्धृत्य सत्वरमुक्त्वा द्व्यकालपरिग्रहात् दान॥ तदेतिद्वा
त्रिंशच्चतुस्त्रिंशद्वर्षमध्ये इत्यर्थः॥ त्रिंशद्वर्षेणोद्वाहिताया द्वादशवर्षीयायाः स्त्रियाः पत्युः पञ्चाशद्वर्षे समये
द्वात्रिंशद्वर्षवयस्कत्वात्॥ एवं चतुर्विंशतिवर्षेणोढायाः स्त्रिया अष्टवर्षीयायाः पत्युः पञ्चाशद्वर्षे चतुस्त्रिंश
द्वर्षीयत्वात्॥ अविभागप्रसंगादिति तु॥ इदं तु नसाम्यकइदानीमविभागस्येष्टत्वात्॥ अन्यथा पुत्रेषु दारान्नि
क्षिप्य वनं गच्छेत् सह वैव वेति गालिहन्यनीवृत्तिभ्यां प्रकारद्वयविधानेन रागान्निवृत्तौ सह गमनपक्षे वा
नप्रस्थाश्रमोत्पन्नानां पुत्राणां वृत्तिलोपापत्तेः गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः॥ अपत्यस्यैव तत्पुत्रो
त्तदारण्यं समाविशेदित्युक्तकालान्तरे वनगमने विभागस्यानानुपपत्तिः इदानीमात्तरजोनिवृत्तेरपि सत्वादिति
वाच्येके विन्तु अविभागसंगादिति न चेष्टापत्तिः व्यवहारविरोधात्॥ वानप्रस्थस्य पत्नीसहितवनगमनपक्षेप्य

Indira Gandhi National
Centre for the Arts

दूरे॥ तस्मात्॥ अपत्यसंभवेनानिवृत्तेः स्वतःसिद्धत्वेन द्विति तत्परत्वासंभवाद्दृष्टार्थत्वकल्पनागौरवाच्चे
त्याहुः॥ तदसत्॥ नहि वनगमनमेव पुरुषस्यांकुरे तस्य जनयति॥ तदनंतरमपत्यसंभावनानिवृत्तिः स्यादिति
॥निवृत्तेरजसीत्यस्य विषयः स्वयमेव वक्ष्यते॥ कालचतुष्टयं विषयदर्शयति॥ पितुरूपरमइत्यादिना कार्या
क्षमे इति॥ अतिवृद्धत्वादिनेति शेषः॥ आदानग्रहणं विसर्गस्त्यागः॥ आक्षेपोऽभ्यासकरणं॥ नस्वातंत्र्यं
नतदनुमतिं विनाधीकारः॥ दीनेति वृद्धत्वादिना दुःखिते आर्तिंगते॥ अत्यंतशोकरोगाद्यभिपीडिते॥ एतद्
चने स्वयंवक्ष्यमाणाः कार्याक्षमादौ पितरि विभागनिषेधेन ज्येष्ठस्यगृहयोगाक्षमाणचरणरूपोऽर्थो नव्यक्त
: नस्वातंत्र्यमित्यस्य पितुः स्वस्थदशायामेव संभवात्॥ चिंतयेदित्यस्य सम्यगाह आह॥ स्वयंचक्रमिति वृद्धे
सर्वकर्माक्षमे विपरीतचेतसी उन्मादेन दीर्घरोगिणि चिरतरकालमहारोगिणि पितृवदिति पिता यथा सर्वे
षा पालनपुरःसरमर्थानुपालयेत्तथैतेषां कनिष्ठानां पालनपुरःसरमेतानुपालयेदित्यर्थः तेन न तथा
मृते पितरि ज्येष्ठस्य कनिष्ठस्य कनिष्ठपालनपुरःसरमर्थपालकतावतिपादिता अर्थपालने हेतुमा राम: ॥१८॥

---

हेत्यमतं हीति कुटुम्बभरणं गार्हस्थ्यं वा॥ अस्वतन्त्राः यथेष्टविनियोगानधिकारिणः अनेन पितृसत्वे
पुत्राणामस्वातंत्र्यं विभागाद्यो स्फुटमेवाभिहितमिति॥ एवं अस्वतंत्राः अत उक्तवचनानभिज्ञतातोऽस्त
द्वैवेति॥ सुपांसुपा सप्तम्यर्थे प्रथमा एतत्पाठस्थले एवेत्यर्थः कार्याक्षमेपितरीत्याकथं विभाग इति। यल्लि
खितमित्यर्थः कार्याक्षमत्वे समयरूपविभागकालानंतरं निःस्वस्यस्वोक्तदायाद्यपुनरूपसंहरति तस्मा
दिति॥ ननु तर्हि मातुर्निवृत्ते रजसीत्यस्य को विषयः इत्यत आह मातुरिति पुत्रांतरसंभावाभावादिति॥ ते
न मातृपदं पितृपत्न्युपलक्षणं तदानीमपी पितृपत्नीरजोनिवृत्त्यनंतरकालेपि पितुरिच्छयैवेति। अत्र
प्रमाणं वक्ष्यते॥ ननु पुत्रांतरसंभावनासत्वेपि तामहधनविभागे काक्षतिरित्यत आह॥ अनिवृ
त्ते इति॥ वंशिलोपः पितामहधने निरंशकत्वं॥ अपुत्रत्वे हेतुमाह॥ येजाता इति॥ जाताउत्पन्ना अजा
ताभविष्यद्गर्भे संबंधा द्वे स्वत्वापगमे रजोनिवृत्तिःस्वत्वकालनिरासेनपुनरूपसंहरति॥ अतइति॥

Indira Gandhi National Centre for the Arts

वीमा ।। अथ स्वत्वापगमः कालः प्रमाणदर्शनपूर्वककालांतरमाह ऊर्द्धमिति ।। अपरः पितृस्वत्वापगमादन्यः ।। पितुरिच्छास
मयरूपः ।। यः इच्छात्तद्विशिष्टयत्वेन नारदवचनं ।। न विभागकालांतरप्रदर्शनार्थं ।। किंतु ऋणापरिशोधनावश्यं
भावार्थो ।। अन्यथा कालीनस्यारतिवैयर्थ्यापत्तेः ।। तथा दत्त्वा स्वेति ।। भगिनीदानावश्यंभावार्थं इत्यर्थः एतत्प्रयो
जनत्वात् ।। ऋणापरिशोधनावश्यंभावप्रतिपत्तिमात्रप्रयोजनत्वात् ।। अतएव ऋणापरिशोधनस्यावश्यक
त्वाद्वा ।। ताभ्यश्चेति दुहितृभ्यो विना ।। ननु अन्वयो दुहितुर्मातुर्वा तत्राह एतच्चेति वक्ष्यते मातुरन्वय इति व्याव
स्थापयीष्यते ।। पश्चात्तरमाह ।। वक्ष्ये इति ।। मातृधनमयोतके यौतके दुहितृपर्यंताभाव एव पुत्राधिकारस्य
वक्ष्यमाणत्वात् ।। तथा च दत्त्वा स्वसृभगिनीभ्य इति मातुर्यौतकधनविषयमिति भावः ।। अवसरे प्रकृतस
माप्तौ स्त्रीधनविभागप्रकरणोक्ते व्यवस्थापितेन्याय्यवचनाभ्यामिति शेषः ।। पितृधनविभागकालेक
थिति पितामहधनविभागकालस्याकांक्षितत्वात् ।। ते प्रति जानीते संप्रतीति निर्विषयत्वहेतुमाह निष्ठ
केवलसीति ।। न च पित्रोरभाव इति वचने पितृधनविषये ।। ऊर्द्धं विभागात् जातस्तीति पितामहधनविषयमि राम: १८

तिवेवरित्य एव कुतो न स्यात् पितामहधने पितुः पुत्रेभ्यः स्वेच्छातस्तन्न्याधिकारान्स्यापि निषेधः
उत्पस्यश्यमानपुत्रनिरंशतायाः सर्वथैव निषिद्धत्वात् तत्रैव मातृरजोनिवृत्तेः सहकारित्वाच्चित्या
तु ।। न च पित्रा स्वयं गृहीतांशे तदनंतरं तस्य वाधिकारात् ।। ननु निरंशतेति वाच्यं तस्य पितुः प्रभो
जोपक्षिणात्वे निरंशतायामविरोधात् न तस्य सहकारिद्वैरत्वात् पैतृके तु तस्य स्वेच्छा स्वयमु
पात्तर्थे इति विष्णुवचनेन इच्छाया नियामकत्वाभिधानात् ।। इच्छयोसस्य निरंशतायामप्रवि
रोधात् ।। न तत्रास्य सहकारितेति ।। अतएव वृत्तिलोपो विगर्हित इति पाराशरवचने वृत्तिपदं पिताम
हधनपरमिति ।। ऋधिमीवोध्येनिद्वैनित्वापितारिति ।। रजोनिवृत्तिमात्रेणातस्याः स्वत्वनाशे तद्धनवि
भोग इत्यर्थः ।। उपसंहरति ।। अत इति यतो न पितृधनगोचरत्वं ।। नापि मातृधनगोचरत्वमत इति अर्थः ।।
नकुनिरपेक्षश्रुतिवलात् ।। पितुरनिच्छयापि मातृरजोनिवृत्तौ पुत्राणां विभागः स्यादुआह ।। न चेच्छामित
ति ।। विभागनिमित्तत्वं ।। विभागोपधायकत्वं ।। अनिच्छयेति ।। स्वारसिकेच्छां विनेत्यर्थः विभागाभावादिति

Indira Gandhi National
Centre for the Arts

उ

दायभाग: विभागस्य दृष्टार्थकतया स्वारसिकेच्छाधीनत्वमिति प्रमादित्यर्थः॥ सत्यामस्थितायामिच्छायां स्वारसिकेच्छा
॥२०॥ यां कस्यापि पितुः पुत्रस्य वा पितुर्विभागेच्छा तदा इति॥ जीवति चेच्छतीत्यनयोरिच्छाजीवनयोः सामानाधिकर
ण्यानुरोधादिति भावः तेन तदानीमपि विभागपितुरेव स्वाम्यात्॥ स्वातंत्र्येण पुत्रेच्छया विभागस्वामी
त्वेकनाम्न तेन त्वादित्यभिहितं॥ यथाश्रुतं तैर्न संगच्छते इच्छायाः सामानाधिकरण्याकृति इति दृष्टविभागप्र
योजकत्वस्य सिद्धत्वेन तत्र कस्येत्याकांक्षानुदयात्॥ तत्प्रतिपादनस्य प्रकृतानुपयोगित्वाच्चेति द्र
ष्टव्यं॥ अत इति॥ यतो बृहस्पतिवचनस्य पितामहधनविषयत्वमत इत्यर्थः॥ एकः कालः पितामह
धनविभाग इति शेषः॥ अथ वा यतोऽपत्यसंभावनाभावः पित्रिच्छासहकृत एव विभागे निमित्तं न तु स्वा
णात्तद् तंत्र्येणेति अर्थः। एकः काल इति पित्रीच्छासहकृतमातृरजोनिवृत्तिकालः इति रीत्या काल इत्यर्थः। अन्य
थामरणादावप्यपत्यसंभावनाविरहस्याविशिष्टत्वेन पित्रोरभावः इति पृथक्कालो नाभिहितः स्यादि राम:
ति भावः अतोऽस्य नोपसंहारार्थत्वं तेन वक्ष्यमाणतस्मादित्युपसंहारेण सहपौनरुक्त्यमिति द्रष्टव्यं॥ ॥२०॥

तेनास्या ह्युपसंहारार्थत्वमिति अभिप्रायेणालिखिष्यमाणतस्मादित्युपसंहारे पुनरुपसंहरतीति॥
चूडामणिलिखीनमपर्यालोचनविजृंभितमिति बोध्यं॥ नत्वपित्रोरिति॥ साहित्यमविवक्षितमेव॥
अन्यथा जीवति पितरि वा मातुरभावेऽपि साहित्यावच्छिन्नाभावसत्वात् विभागप्रसंगात्॥ तथा च द्वि
वचनस्यावैयर्थ्याय पितुरभावो मातुरभावश्चेति विभागद्वये विभागनिमित्तं स्यात्॥ ननु पितुरसंमात्रम
त्रेष्टापत्तिमाह॥ पित्रोरिति॥ विमातुर्मातृत्वभावात् तत्सत्वे सपत्नीपुत्राणां विभागे बाधाकाभावा
दित्यर्थबलाल्लभ्यमिदं सोदराणां मरणमिति कार्यं इति प्रशस्त इत्यर्थः। अत एव वक्ष्यति सोऽपि त्वमा
तरि जीवन्त्यां न धर्म्य इति॥ तथा विमातुरभावो विभागप्राशस्त्यमात्रनिमित्तं न तु विभागे पितुः परमा
नेतरमिव पुत्राणां धनस्वामित्वेन विभागस्वातंत्र्यात्॥ अदृष्टार्थत्वकल्पनायाश्च अन्याय्यत्वादिति भावः॥
मातृधनगोचरत्वानुपपत्तेरिति मातुर्मिधनत्वापत्तेरिति शेषः। अन्यधनगोचरत्वे मातृधनातिरिक्तधन

दायभागः ॥२१॥ नगोचरत्वात् ॥ तत्रैवेति सन्निहितबुद्धिरन्तरङ्गेति न्यायात् ॥ उपस्थितविभागस्वत्वयत्वान्वयान्ननु अनु
पस्थिते विभागे तदेकदृतिभावः ॥ ननु तर्हि मात्रधने विभागे किं निमित्तमत्राह तत्रैवेति ॥ वाच्यं मातृधन
विभागावसरे इति शेषः ॥ उपसंहरति तस्मादिति ॥ विशेषाभिधानाय पुनराह तत्र चेति ॥ उक्तवचना
नां पितृधनविभागप्रकरणनियंत्रितत्वात् तद्विषयकशंकामपनेतुमाह पैतामहे त्विति तथा च प्रक
रणमपि साधारणमिति भावः पैतामहे पितुरेव स्वामित्वे याज्ञवल्क्यविरोधमपनेतुमाह यत्नीतिस
हर्षस्वाम्यमिति यथाश्रुतार्थमादाय विरोधो वाच्यः ॥ तस्य उक्तवचनस्य निरवद्यानिरवद्यातुत्कृष्टा
याविद्या स स्वदिवाकरः तस्याघातेन द्योतितः प्रकाशितः इत्यर्थः गुणसिद्धित्वादीप्तिस्वपदार्थसाम
र्थ्यात् यथा गुणोज्वलत्वं बोध्यं तथोदयपदार्थसामर्थ्यात् विद्यायां दिवाकरत्वं बोध्यमिति ॥ एवञ्च
तुरतपितृकपौत्रः तदर्थे मृतपितृकपौत्रस्य इत्यर्थः तथैवेति एतेन मृतपितृकपौत्राणां बहूनामपि ॥ २१ ॥

मिलित्वैको भागः ॥ पितृव्यस्य चापरो भाग इत्युक्तं तेषां प्रत्येकस्य पितृव्येण सह तुल्यांशितेति प्रति
पादिते ॥ अत एव तु पकारत्वाविशेषादेव पितृदत्वाविशेषादिति ॥ तेन पुत्रपदं पार्वणाधिकारिभ
गात्रोपलक्षणं पितामहपदं च पार्वणोद्देश्य पितृपूर्वपुरुषपरं पितृपदं अंशि पूर्वपुरुषधन्यपत्यपर मि
ति बोध्यं वचनस्यांशं केचिन सामान्यतः पौत्राणां पितामहधने पित्रा सह तुल्यस्वामित्वबोधकमा
ह जीवतीति तिस्वामित्वाविशेषादिति भवन्मते इति शेषः तथाच व्यवहारविरोध इति भावः ॥ इदमुपक्ष
णां एवं चेत् पुत्रेच्छया पि विभागे प्राप्ते मातुनिवृत्ते रजसि जीवति च इति तितपिच्छा पितुरिच्छाधीनविभ
ग प्रतिपादक याज्ञवल्क्यशास्त्र विरोधोपि द्रष्टव्यः ॥ अतदर्थत्वेपि तदुभयमृतपितृकभ्रातृपुत्रेण सहापि
तत्पुत्रस्य तुल्यस्वामित्वविषयत्वे प्रकृतमादिति ॥ अनेकपितृकाणां तु पितृतो भागकल्पना ॥ अनेनानेक
पितृकाणामेव प्रक्रांतत्वादित्यर्थः ॥ तत्रानेकपितृकाणामेकभिन्नानां विभिन्नपितृकाणामित्यर्थः ॥

Indira Gandhi National Centre for the Arts

निबंधः प्रतिवर्षं मासादिवा दातव्यत्वेन प्रतिश्रुतवस्तुरूप इति व्याचष्टे निबंध इति। माहृत्वयोर्द्वयोः ॥
स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितं इत्यादिवक्ष्यमाणे मद्विपदयोरेकक्रियान्वयादित्यर्थः ॥ नन्वेवं
द्रव्यपदस्य द्विपदपरत्वे पितामहयुक्ता पद्रव्येपि तथैव स्यान्न तथाविधपौत्राणां द्रव्यसामान्यप
रत्वे च मस्यादीनां पृथगुपादानवैयर्थ्यं। अथ गोबलीवर्दन्यायात् सस्मिन्द्विपदयोः प्राशस्त्यार्थमेव पृथ
गुपादानं साहचर्येण न्यायपर्यवसायितया शास्त्रतो दुर्बलत्वात् अकिंचित्करत्वं तथापि उपाका
रित्वाभ्यां षात् प्रतिपौत्रं पीतृत्वेन समतुल्यांशित्वापत्तौ मिताक्षराविरोध इति। विभाव्याह अयं
चेति। अयं वक्ष्यमाणः नियमः वादृश स्वयं इति उक्तार्थे मुनीश्वरः समाहुः यथेति स्वरसं प्रकाशयति
दृश्यामि अत्रायं भावः यदि वदत्स्वचनेस्वेच्छया विभाग प्रयोजकादित्यर्थः ... नयास्वार्जितेषु
तेच्छया यावज्जीवितं तदा पितामहे पुत्रेच्छयापि विभागः प्रसज्जेत तत्त्वेन संभवति स्वार्जितपुत्राणां स्वा २२

मित्वाभावेन तेषामिच्छया विभागाप्रसक्तेर्वचनैर्यथापालनं जीवतीचेच्छाविति प्रायुक्तेन विरोधश्च स्यात्
अतः स्वोपात्तः अर्थे स्वेच्छा न्यूनाधिकविभाग प्रयोजकार इत्यर्थः एवं च व्यवच्छेदक बोधकतुशब्दबलात् स्वेच्छा
या पितामहे न्यूनाधिक विभाग प्रयोजकत्वव्यवच्छेद एव लभ्यते ॥ इत्येतदाह यदीति नैतत्तन स्वेच्छया न्यू
नाधिकविभागदानं न पुनरिति स्वच्छंदप्रत्तिता न्यूनाधिकदानाधिकारिता। तथाचोक्तार्थे तुल्यं
स्वामित्वमिति लाक्षणिकः प्रयोगः लक्षणा च यत्नमुक्तयुक्तिप्रामाण्य दूषणवदिति भावः। अतइति यतउ
क्तार्थपरये वोपपत्तिरित्यर्थः मतद्वयामिति मिताक्षराकृतप्रभृतीनामिति शेषः द्वयमिति समविभागः पृथ
निरस्तनियः पुत्रेच्छया विभाग स्वनिरस्त एवेति भावः ॥ एवमेव पितामहधने पौत्राणां पितृकृत विषमवि
भागनिषेधपरतयैव भागद्वयमिति। जीवद्विभागे तु पिता हरेत्तेनांशद्वयं स्वयमिति आदि वचनेर्भागद्वयस्य
वक्ष्यमाणत्वात् ॥ सिद्धं वच्मि इदं शः ॥ पितुरिच्छातः इति ॥ जीवति चेच्छापिति प्रायुक्तेरिति भावः नपुत्रेच्छ

Indira Gandhi National Centre for the Arts

पुनःसर्वस्येत्यनेनैवसिद्धेर्गृहाण्योभेदा

येत्यत्र वचनांतर विरोधमर्पनेनुमाशंकते यदीति पैतृकमन्यैः स्वहृते अनवाप्तं अंशयन्तरैः स्वकृते अवाप्नुया
त् स्वयमेवोद्धरेत् इति वदन्तो मनुविष्णु इत्यन्वयः ननु कामकं विना कथं विभागः विभागं कृतेः कामना
साध्यत्वात् अत आह स्वेच्छातः इति अस्वाराधिके स्वातः प्रत्यवायः भय मात्र जनिते च्छा तस्येवेत्यर्थः एवं
च प्रकामयन्त्र रणजी वन क्षमेषु सोद तस्मस्याश्रयादाने न प्रत्यवायः अनुद्धृतन्नू नाधिकदानस्येवनिषि
द्धादितिबोध्यं शापकत्वयतश्यति जीवतीं चेत्कु नीति प्रागुक्तविरोधादितिभावः ।। पुनः सर्वस्येति वचन
मेदान्नमयादीनां विशेषणत्वासंभवेन पृथक् तदुपादानस्य स्वर्णादिद्रव्यान्तरप्राप्त्यर्थत्वादितिभावः न
चैवं सर्वस्येत्यनेनैव सिद्धे गृहस्यादेः पृथगुपादानमेवयर्थ्यं ।। एतस्योपलक्षणत्वात् स्वर्णादिष्विकस्यप्र
सक्तेमितोज्ञां साध्या अपि निवृत्तत्वात् गोवृषन्यायात् पृथगुक्तिरिति पौष्यवर्गस्यैति स्वपितामैतागुरु ता
मौपोत्रजादीनाः समाश्रिताः अभ्यागतो अतिथिश्चैव पोष्यवर्ग उदाहृतः इतिमनुनैवोक्तं आनर्थक्या
पत्तेरिति अत्यश्यापि दाननिषेधे सर्वस्येत्यस्य वैयर्थ्यापत्तेः स्थावरगृहत्वादिति नयाणायुगनद्धवाहित्वादि ।। २३ ।।

---



इति भावः ननु वंधदूपदयोः कथं स्थावरग्रहणात् सिद्धिः तयोः स्थावरपदार्थत्वाभावादत आह दंडेति तथा
चापदार्थत्वेपिन्यायादेव सिद्धिरित्यर्थः सच न्यायो यथा दंडविद्धपूपानां दंडानयनावश्यमानायनं तथा युगन
द्धवाहित्वोदकस्यग्रहणादपरयोरपि सिद्धिः इति केचिदाहुः ।। वस्तुतस्तु एकत्रस्थापितयोर्दंडापूपयोर्नास्ति
दंडस्तु मूषिकभक्षितश्चेदं तत्र यथा मूषिकस्य दुष्करदंडभक्षणमसिद्धेन तत्सहचरितापूपभक्षणमपि सि
ध्यति तथैकस्याप्रसक्तत्वे सिद्धे युगनद्धवाहित्वादपरयोरप्यप्रसक्तत्वं सिद्ध्यतीति समुदायार्थः न्यायमूलक
त्वात्प्रायिकत्वेनान्यथाप्राकृर्यादिनपुनरिति कुटुंबवर्त्तनहृर्षयद्स्वयरतो विशेषादिति भावः अर्थात्कुटुंबस्याव व
श्यंभर्त्तव्यरूपात् ।। एवं च यत्र भूस्यादिकं नास्ति मस्याद्रे वास्तीत्यत्र न तत्सर्वस्य येप्रसक्तत्वेहेतोरविशेषात
त्प्रसक्तवचनेतुभयसम्भवविषयमितिद्रष्टव्यमिति सर्वत्र इति तथा च पोष्यवर्गस्येव आत्मनोपिर
क्षार्थं कृतः सर्वत्रिय कुटुंबविरोधेपि सिध्यतीति भावइति द्रष्टव्यं ।। अत्र दायाद्यानुमतिं विना दानासिद्धिः
कृतमपि स्वं दानाभासतया निवर्तनीयमिति चेदुक्तं स्वरमन्तमपाकर्तुमशंकते न चेति कृयं विक्रयं विभक्ता।

Indira Gandhi National Centre for the Arts

दायभाग॥
॥२४॥ अविभक्तो वेति॥ तथा च स्थावरे स्ये तिवचनस्य॥ अविभक्तस्थावरमात्रविषयकत्वमसंभवतीति भावः॥ न च
विभक्तपदं द्व्यान्तरविभक्तपरं स्थावरपदं चाविक्तस्थावरपरमतो नापपत्तिरिति वाच्यं॥ तथा सति॥ एकस्या
विभक्तदानाद्यनधिकारस्य द्रव्यान्तरेण विशिष्टत्वात्॥ स्थावरेपादानेवेयर्थ्यापत्तेविभक्तस्थावरे वाच निकोयेनि
षेधानयोक्त्या कइति॥ अविभक्तो वेति॥ वाशब्द चार्थे वास्यादिकल्पोपमयोरेवार्थे च समुच्चयेइत्यमरोक्तेः अत्र
स्थावरे तथा च विभक्तस्याविभक्तस्यापि स्वामिकृतदानाद्येवासिध्यति एव॥ अक्षपातादिना पश्चाद्दर्शपरि
वयसंभवादिति भावः॥ यद्यपि स्वयमर्जितमिति॥ स्वयर्जिते द्विविधं पैतामहमन्येन हृतं पश्चात्तदुद्धृतस्व
येवा अर्जिते अविशेषात् इयमपीत्यर्थः॥ निषेधस्य परे हेतुमाह तथादौ इति॥ अवश्यमिति॥ निवसिद्धतिसंभव
तीत्यवकृतानाध्याद्वियते॥ तथात्वेन्कोतेन सह समाकर्तृकत्वा तन्नुपपत्तिरिति भावः॥ अत्र यद्दानविक्रय
निषेधो नादृष्टार्थकः किंतु स्वत्वध्वंसानुत्पत्तीरूपदृष्टप्रयोजकः॥ दृष्टार्थत्वसंभवे दृष्टार्थत्वकल्पनायाअ राम
न्याय्यत्वात् इत्थं च विशिष्यस्थावरादानादौ दायानुमतेरपि सहकारिता कल्प्यते रति मेवं तु कारणादे ॥ २४॥

मि
वस्वाम्यात् दानादिर्वाहे। अतिरिक्तकारणकल्पने गौरवात्॥ अत एवादृष्टकल्पनमपि न दूषणाव
हाप्रामाणिकत्वादिति॥ अत एवेति यतो न दानाद्यनिष्पत्तिरत एवेत्यर्थः॥ एकजातादिति॥ धर्मो ऽशौ
चं दशाह्वदशराज्यादिक्रियायाजनपालनादिकर्म तपः शौर्यादिगुणो मृदुत्वं चंडत्वादि। तथा च विभिन्नजा
तीयमात्रकादित्यर्थः कार्येषु एके क्रियमाणदानादिषु न संमताः॥ यदि दद्युरिति सङ्गत्तगोचरदानादिविष
योयं निषेधस्तद्दूवृत्तगोचर इति विभाव्यं कुर्युरिति तथा चासंमत्यापि दानादि सिध्यतीति स्फुटमुक्तं इति।
इत्थं च स्थावरादावनापदि सर्वदानविक्रयनिषेधो मण्याद्यपेक्षया विशेषो वाच्यः॥ एतस्य स्वार्जितवि
षयत्वे तु वचनवैयर्थ्यापातादिति॥ प्रकृतमिति॥ पितामहधने पित्रा सह तुल्यांशित्वेन वापौत्रे स्वत्वाद्वि
भागमिति प्रकृतमित्यर्थः एतदेव विशिष्य व्यवस्थानेनानुशमइत्यर्थः व्यवस्थापीत वचनार्थं उप
संहरति॥ तदेवमिति समविभागानुपपत्ते र्वक्ष्यमाणहेतोः पुत्राणां चेत्यादिन उक्तहेतोरुक्तम ५

Indira Gandhi National
Centre for the Arts

वंधे जनके स्त्वाधीनेत्याद्यर्थं वचनमित्यर्थः मृतपितृकस्येति वाकारो ऽनास्था यां अन्यथा मृतेषु शेषवद्दायादेष्वेव
पितृव्येण सह तुल्यांशितास्यात्॥ मातामहोक्तादिवुद्यांतरं सर्वेपितृव्यस्येव स्यादिदि तस्मान्न्यूनाधिकवि
भागनिराकरणार्थमिति पूर्वेकस्य एवसाधीयानिति। एवं च पुत्राणां विभागस्वातंत्र्याभावाच्च। पिता
महधनविभागकालमुपसंहरति तेनेति कालद्वयमिति मरणाद्विमापितुः स्वत्वावगमः निवृत्ते मातृ
रजसि पितुरिच्छेति कालद्वयमित्यर्थः वस्तुतस्तु पैतामहे स्वार्जिते वा पितृस्वत्वावगमकाल
एव विभागस्य विशेषस्तु पितामहधनविभागे मातृरजोनिवृत्तिकालस्य सहकारित्वमितिवो
ध्यं पितृकृतविभागे पितुस्त्वापेक्षया पुत्राणां स्वांशे स्वत्वगमात् अन्यथा पितृस्वत्वे विद्यमाने
पुत्राणामुत्पन्नस्वत्वाभावात्तद्धनेदायत्वस्य विभागस्य चानुपपत्तेः इति वाच्यं ननु वचने पिता २५.
महपदाश्रवणात्कथं [redacted]

आविशेषेणेति स्वार्जितधने पितामहधने वाविशेषतो ऽनुपादानादित्यर्थः। तथा च स्वार्जितध
नविषयत्वे विष्णुवचनविरोधात् पितामहधनविषयत्वमेवास्य वचनस्येति भावः। ननु भूर्यंत्या
दिवचनविरोधात्स्वीतधनविषयत्वमेव कुतो न स्यात्तथा च सति पितामहधनेपि ता पुत्रस्येव तुल्यां
शितेव युक्तेति किन्न विदमु वचने विरोधस्य जागरूकत्वात् विचनादिशाधमुक्ता युक्तिमप्याह
किंचेति। अथवा तस्य स्वेच्छास्वयमुपात्तत्वाद्देरिति चेदमु वचनस्य पुत्रेभ्यो न्यूनाधिकदाने स्व
च्छाद्युत्यवार्थः विभागं तु तस्य स्वोपात्तत्वाविशिष्टो क्त वचनाभ्यां पैतामहे तु भूर्यंत्यादिवचन
स्य यथाश्रुतार्थानुरोधात्। तुल्यांशित्वं न्यूनाधिकविभागपरत्वे लक्षणापत्तेरतो युक्तिं प्रमाण
यति किंचिद्भूरित्यादिकं। एवं च ज्येष्ठस्य दशमभागन्यायत्वस्यदापयेत्। इति द्वितीयवचनविशो
द्धापेक्षया श्रुतिश्च पुराणत्वे बोध्यं मध्यमस्येति मध्यमशब्दोऽत्र ज्येष्ठानंतरजपरः तदनुजाश्च
सर्वे यवीयः पदार्था उत्तरवचने। अध्यर्द्धं ततो ऽनुजइत्यभिधानात्। अंशोंऽशं यवीयसः इति

विषमावलाच्चेतिबोध्यं।उद्धारे ऽनुद्धृते इति सोदरमात्रक्रियमाणविभागे इत्यर्थः सोदरासोदरविभागे
तु विंशोत्तरादिकमेव एतच्च सोदराभिप्रायिकं कल्पद्वयं विद्यादिमता ज्येष्ठादीनामिति वक्ष्य
ते। एकाधिकमिति। एकमधिकभागं भागद्वयमित्यर्थः। मिथुनं स्त्रीपुंसौ। अधिकमधिकं अर्द्धं
तेनार्द्धाधिकमेकभागं अंशमंशमित्यत्राप्यधिकपदार्थान्वयः तेन पादं पादमधिकं तथा च
सपादैकभागमित्यर्थः मिथुनं स्त्रीपुंसौ तौ च पशुप्रस्तावात्। पशूनामेव तत्र गोः पृथगु
पादानात्। आह अजादीनामिति। आदिना मेषादिसङ्ग्रहः ननु गोवृष इत्यत्र न द्वन्द्वसम
वः समाहारपक्षे पुंलिङ्गानुपपत्तेः इतरेतरपक्षे एकवचनानुपपत्तेश्चेत्यत आह गोयुक्त इ
ति। तथा च मध्यमपदलोपि समासाश्रयणेन तत्पदं साधनात्र द्वन्द्व इति भावः अनेकाश्चेदित्य
नेन तेषामल्पत्वे ज्येष्ठप्राप्योद्धारानुरूपमेव कल्प्यं तत्र ज्येष्ठस्यापि मनूक्तविंशोद्धारैतेव॥ २६

---

गौतमेन मनुवचनादधिकमुक्तं। तदस्तं तु गुणवत्त्वे बोध्यं। एकैकमितरेषामीत्यत्रितेषां निर्गुणत्वे
बोध्यं। गृहमिति पितृवस्थानातिरिक्तगृहमित्यर्थः। गृहं यवीयसोन्यत्र पितुरवस्थानादिति शंखवचनात्।
एवं ज्येष्ठस्य द्व्यंशित्वाभिधानेन ज्येष्ठतायुक्तो किं त्वजकित्वप्रयुक्तमित्याशङ्कते। नचेति। उद्धारस्यासंभावा
दिति। अत्रायं भावः। उद्धारानुद्धृते इत्यनेन यत्र विषये उद्धारप्रसक्तिस्तत्रैव विषये भागद्वयविधानं उद्धारस्य
ज्येष्ठत्वपुरस्कारेण वक्तेनानत्वजेकं तयेति। यद्यपि उद्धारः सोदरासोदरविषयः द्व्यंशादिकं तु सोदरमात्रं विषय
इत्यस्ति विषयभेदः तथापि ज्येष्ठपुत्रपुरस्कारेणैवोद्धारविधानात्। सोदरमात्रविभागेतु अपि ज्येष्ठस्य त
त्पुरस्कारस्तीत्याशयः। ननु उद्धारेऽनुद्धृते इत्यनेनोद्धाराहविषये द्व्यंशित्वं न विधीयते उद्धारद्व्यंशित्वयो
रसोदरासोदरविषयत्वेन भिन्नविषयत्वेनेति। किं तु भक्तराशितैयाभावेन समभागबोधकशास्त्रान्तरसंभ
वाहितया समभागमर्थतः सूचयित्वा अजकत्वेनैव द्व्यंशित्वमभिधीयते। तथाविधविषये द्व्यंशित्वसात्यं

Indira Gandhi National
Centre for the Arts

ता।संभवयुक्तिकत्वादत आह मध्यमकनीयसोरिति।अर्द्धाद्धादीति।अधिकार्द्धाधीकपदविधानेत्यर्थः।तयोरध्य
र्द्धादिभागस्यवाचनिकत्वेत्वदृष्टकल्पनागौरवमिति भावः।ननु सर्वेषामार्जकत्वेवद्धांशित्वं मध्यमकनीयसो
रध्यर्द्धादिविधानंतु।अर्जनस्याल्पाल्पतरत्वादिनाप्युपपन्नं न बाधकं।अत आह ज्येष्ठादिपदेति।अर्जकत्वे
नैवद्धांशित्वेमध्यमादीनामपितद्विशिष्टतायाः सर्वेसिद्धत्वात्।ज्येष्ठपदस्यानर्थक्यादिति भावः।ननुश्रु
तौ।एतएवेति यत एव ज्येष्ठत्वे नैवद्धांशित्वमत एवेत्यर्थः भागद्वयमिति।ननु ज्येष्ठस्य विषमभागमेवश्रू
पयति मनुः वैषम्यं च सोद्धारभागेपि संभवात् कथं भागद्वयस्यापत्तिमितिचेन्न उद्धारस्य भागवैषम्यस्या
प्रयोजकत्वात्।एवं समुद्धृतोद्धारे समानांशान् प्रकल्पयेदित्यादिवचनात्।नन्वेवं स्त्रियाअपि विंशोद्धारं
ना स्यात्तावतावैषम्यभागसंबन्धादिति वाच्यं।उद्धारस्य ज्येष्ठत्वपुरस्कारेणैव श्रुतेः स्त्रियाश्च तदभावात्।तौदि
त्युक्तौ।ज्येष्ठतानास्तीति।युक्तेदुमीति।होला कायसं तोत्सवविशेषः प्राच्यैत्क्रियते प्राच्यादौ त्यादि यदात्।दा २९

क्षिणात्यक्रियमाण करंजार्कपूजारूपोत्सवाचारोपपत्तये कल्पनीयश्रुतौ दाक्षिणात्यपदपरिग्रहः।ना
पित्रादीतितथाचपितुरपि अर्जकत्वेनैव भागद्वयं नान्यथा तेन तस्यापि स्वार्जितधनएव द्व्यंशित्वं नान्य
त्रेतिमतं तस्य।सामान्यश्रुत्यैवेति प्राच्यादिपदघटितश्रुतौ दाक्षिणात्येत्यर्थः।श्रुतिकल्पनानिमित्त
त्वेति।आचारस्यैव साधनमित्यनेनाचारस्यैव वेदमूलकत्वाभिधानान्नत्वनाचारस्येति भावः।ननुश्रु
तौ प्राच्यपदाप्रवेशे प्राच्यानामपितत्प्राप्तेस्तेषां तदकरणात्प्रत्यवायापत्तिः आचारस्यनित्यत्वे
प्रमाणाभावात्।तदुपपत्तये ज्येष्ठपदसार्थक्याय ज्येष्ठपदवत्या इति श्रुतेः।स्वसमानार्थकस्मृतिमूलकत्वा
दिति भावः।तथाचाचारेपदविरहात् पदवैयर्थ्यापत्तिरूपबाधकविरहेण सामान्यश्रुतिरेव तत्र कल्प्य
ते।स्मृतौतु ज्येष्ठपदवैयर्थ्यापत्तिबाधकसत्वान्न सामान्यश्रुतेः कल्पनमपितु ज्येष्ठपदवत्या एवेतिभावः।
आवश्यकेति।यथा ज्येष्ठपदवत्या आवश्यककल्पना न तथा अर्जकपदवत्या आवश्यककल्पना द्व्यंशीयापूर्वजः

Indira Gandhi National
Centre for the Arts

स्यादित्यादौ अर्जकपदाश्रवणात्। अर्जकोऽंशमर्हतीत्यस्य तु निरपेक्षार्जकपुरस्कारेणैव श्रुतिकल्पनं त
त्र ज्येष्ठपदश्रवणादिति भावः। ननु ज्येष्ठार्जकपदवतीभ्यां स्मृतिभ्यामेकमूलकत्वकल्पनात्लाघवेन
ज्येष्ठोर्जकोऽंशं गृह्णीयादित्येकैव श्रुतिः कल्प्यते। तावता ज्येष्ठस्यार्जकत्वपुरस्कारेणैवांशित्वमि
ति सिद्धमेवेत्यत आह ज्येष्ठपदवत्याइति। प्रमाणाभावादिति। निरपेक्षप्रवृत्तायामेकैकस्मृतौ पदद्वया
श्रवणादिति श्रुतेर्वैपरी भावः। तथात्वे कनिष्ठार्जकानामंशित्वे सर्वतंत्रविरोधोऽपि द्रष्टव्यः। अन्य
त्र कनिष्ठार्जितधने श्रुतेः। अर्जकोऽंशं गृह्णीयादिति श्रुतेः वैपरीत्यवित्तेणेति अत्रैवेति। विनिगमे
ने लक्षणाभावात् उभयत्राप्यविशिष्टतया तस्यावश्यंकल्पनमस्यवेत्येकतरप्रादक प्रमाणाभावादित्यर्थः
अथ पित्र्यादीनामपि साधारणेनार्जकत्वेनांशित्वमुभयवादिसिद्धमित्येतदेव विनिगमकमस्तीत्यत आह
किंचेति। लाघवादिनेत्यादिना एकत्र विप्रतिपत्तिरन्यत्रोभयवादिसिद्धत्वरूपविनिगमनासंग्रहः स्मृतिनिपु २८

णेनेति तस्मान्मुख्यार्थस्य प्रथमोपस्थितत्वात् लक्षणायां गौरवात् तत्कल्पकाभावाच्च। शब्दाभ्यां मु
ख्यार्थबोधकत्वे स्थिते कथं ज्येष्ठादिपदानामर्जकलाक्षणिकत्वसम्भव इति भावः। तर्हि क्वास्यन्या
य्यस्य विषय इत्यत आह तस्मादिति। अवश्यकल्पनीयेति शास्त्रादिपदवती कल्पने पि हेलाकारकर्तव्येति
भागस्यावश्यकत्वादिति भावः। आचारांशस्य आचारविषयस्य स्मृतिपदस्य स्मृतिविषयस्य अतस्येति। य
त एव ज्येष्ठत्वमर्जकत्वं च परस्परनिरपेक्षेणांशित्वमप्रयोजकमत एवेत्यर्थः। पृथगभिहितमिति तथाप्य
भिहितमित्य चैकमुनिवचनयोरेकवचनत्वे पर्यापत्या एकवाक्यत्वासंभवान्न तथात्वमिति भावः। पृथगभिधा
य कतद्वचनमाह। तथेति। येनेति। एषां भागिनां मध्ये येनार्जीतं सोऽर्जितधनाद्यंशं हरेदित्यर्थः। ज्येष्ठता आ
दिगर्भप्रभवता। जन्मविद्येति तथा चैतदनुरोधात् ज्येष्ठपदस्य जन्मविद्यादिज्येष्ठत्वे परैवश्यकत्वे कथमर्जकपरत्व
सम्भव इति भावः। स्वानुपयोगीति तत्रार्जनस्यैवोपयोगीत्वादिति भावः। सोदरासोदरेति। उलक्षणमेतत्। असहोद
रमात्रविषयोऽपीति भाव्यं। उदाहृतिद्वयस्थले। अधिकांशोनोद्धारः। अविभक्तद्रव्यात् पृथक्क्रियमाणत्वादिति भावः।

Indira Gandhi National
Centre for the Arts

सवर्णास्त्विति। विषमवर्णासु जातानां च ब्राह्मणादिपुत्राणां क्रमेणातुं ते चत्रिद्व्येकांशित्वमिति वक्ष्यते। द्विजन्मनाम् इत्यनेन शूद्
स्य विशेषोद्धारनिवृत्तिः। तन्निवृत्त्या च दंडापूपन्यायाद्द्व्यंशस्यापि निवृत्तिः। अत एव मनुरपि शूद्रस्य तु वर्णैव नान्याभा
र्योपदिश्यते। तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेदित्यनेन शूद्रस्य समांशमेव विदधाति। न च द्विजन्मना
सवर्णास्त्वित्यत्र बहुवचनोपादानाच्च। सोदरासोदराणां द्विजन्मनामेवोद्धारविधिः। द्व्यंशविधिस्तु तदन्येषां सो
दरमात्राणां द्विजन्मनां सामान्यतः शूद्रभ्रातॄणां चेत्येवं किं न स्यादिति वाच्यं। पूर्वोक्तमनुवचनेनोद्धार
द्व्यंशयोः समानविषयत्वागमात्। उद्धाराविषये शूद्रविषये शूद्रे द्व्यंशितापसक्तेः। वस्तुतस्तु ज्येष्ठशूद्रस्या
प्युद्धारो युक्तः तस्यापि पुन्नामनरकनिवर्त्तकत्वेनाधिकोपकारकात्। अधिकधनसंबंधस्याधिकोपकारनिबं
धनत्वात् बृहस्पतिवचने समवर्णास्त्विति विषमवर्णाजातानां विषमविभागसूचनार्थं। अत एव शूद्रस्य वि
षमवर्णाजाताभावेन सूचनीयस्य विषमभागस्य तत्रासंभवात्तद्व्यावृत्त्यर्थं द्विजन्मना कृतमिति कृतं न तु शूद्रस्य
उद्धारनिवृत्त्यर्थं। युक्तिविरोधान्न च मनुना समानांशाभिधानान्नद्विरोधः। उद्धारस्य भागवैषम्याप्रयोजकत्वात्। २९

यथोक्तमुद्धारं ज्यायसे दत्त्वा भजेरन्नितरे सममिति भाव्यं इतरे सममिति ज्येष्ठस्य सगुणत्वे इतरेषां निर्गुणत्वे इदं। तेन नाप्य
द्धादिविधिविरोधः॥ न च द्व्यंशविधिर्जन्मविद्यादिज्येष्ठविषयोऽस्तु उद्धारविधिस्तु तदितरविषय इति। निर्गुणस्यापि उद्धार
इति तेन सोदरासोदरसाधारणी व्यवस्थास्तु इति वाच्यं। समवर्णास्त्विति बहुवचनानुपपत्तेः। भवन्मते एकस्यां जा
तानामपि तत्प्राप्त्यसिद्धेः। दशास्विति तत्स्वयं तेष्वित्यर्थः। सकर्म्मसु संपन्नानामित्यनेन सर्वेषां तुल्यगुणत्वे तत
दधिकगुणत्वे तु ज्येष्ठस्य तत्रापि विंशोद्धारः इति चूडामणिः। बृहस्पतिवचनमपि पितुर्द्व्यंशित्वे प्रमाणयति। जन्म
स्यादि। अप्रतिदेशाशान्निति तेषां पितृसमस्तु सः इत्यतिदेशेन यथा पित्रादिभिः सह स्वपितृधनविभागे क्रियमा
णे पितुर्द्व्यंशित्वं तथा ज्येष्ठस्यापि भ्रातृविभागे स्वपितृधने द्व्यंशित्वमित्येव गमादिति भावः। सामान्येन स्वार्जितपितृ
धनाद्यनुक्तेरेवेनांशद्वयविधाभिधानरूपस्तु पदेशः पितृधनविषयस्तथा बृहस्पतिनातिदर्शितोऽतिदेशेनेति शेषः
नारदवचनादात्मधन एव पितुरंशद्वयमिति शंकापनेतुं स्वमतसाधकतया तदवतारयति। तथेति पूर्वोक्तेनेति तस्य
स्वेच्छा स्वयमुपात्तेऽर्थे इति पूर्वोक्तविदसुवचनस्य स्वल्पेन विभज्य भूयिष्ठमादाय व्यवसेदिति। हारीतोक्तस्य च

Indira Gandhi National
Centre for the Arts

दाय टी० विरोधादित्यर्थः केचित्तु इतोपीत्यादि पितामहधनगोचरभागद्वययुक्तविरोधादित्याहुः तदसत् पितामह
॥३०॥ धनद्व्यंशित्वयुक्तेः पितृधनस्य द्व्यंशित्वविरोधाप्रसक्तेः पितामहधनपित्रापुत्रयोस्तुल्यांशित्वे बाधकम
प्याह किंचेति मध्यगत्वापत्तेरिति मध्यगत्वापदं च उभयनिरूपितस्वत्वद्वयवदेकं द्रव्यं अथैवं पित
रि मृते सत्यां मातरि विमातरि वा पुत्राणां स्वत्वानुदयः स्यात् मात्रादिस्वत्वस्य विरोधिनः सत्त्वात् न च पि
तृमरणादेव तासां स्वत्वनाशः अन्यमरणस्यान्यस्वत्वनाशकत्वे प्रमाणाभावात् न चोभयनिरूपितस्व
त्वव्याप्यत्वस्यैकमेव स्वत्वं प्रतियोगिनाशादेव नश्यतीति वाच्यं तथा सति पत्न्यां मृतायां तद्धने पत्युः स्वत्वना
शप्रसंगात् मातृधनात् इव तत्पुत्रकन्यादीनामधिकारः प्रसंगात् किंच पत्न्यां जीवन्त्यां स्वधनस्य परस्वत्वे
न निर्णीतस्य विनियोगे प्रतिक्षणं चौर्यापत्तेः पत्युः स्यादिति चेन्नैवं पितृमरणानंतरं पुत्राधिकारप्रतिपादक
शास्त्रस्येव पतिमरणात् पत्नीस्वत्वनाशे प्रमाणत्वात् अत एव पुण्यफले समेत्यपि संगच्छते अन्यथा पत्न्याः
पतिधने स्वत्वाभावे तदनुपपत्तेरित्यादि सुधीभिर्भाव्यं विभावेति यथैव पितुः स्वत्वं तथैव पुत्रस्यापीत्यस्यु ३०

---

पगमो विभागानंतरमपि तदवधारणात् वैशेषिकव्यवहारानर्हतया तादवस्थ्यादिति भावः स्या।
दिति भावः एवं सप्रेक्षा पैत्र भ्रातृद्रव्यविभागे तत्पुत्रस्यापि भागइत्येतावन्मात्रमुक्तं। इह तु कनिष्ठ
स्याऽत्यप्राप्तिरिति विशेषान्न पुनरुक्तिः। यत्रेति जंगमो हि पदस्य स्थावरसाहचर्यात्।समानमि
ति समानमेवेत्यर्थः।लक्षणाफलमाह। नचेति।गत्यंतरसंभवे लक्षणाश्रयसामान्यान्याय्यमित्य
भिप्रायेणाह हीति पितृकेति। यद्येकपुत्रः स्यादिति वक्ष्यमाणाशंखवचनानुरोधादिति भावः।कुडाम
णिरल।तस्यार्थ इत्यनेन भर्त्ता पितामहो पात्ता इत्यनेनैकवाक्यत्वादिति सेहानुकं व्याख्याय ननु अंशि
त्वस्यांशानतिरिक्ततया कथमंशित्वसाम्येऽशे वैषम्य।तथा च स्थावरजंगमपदाद्द्रव्यसामा
न्यग्रहणान्न कुतो भर्त्येत्यादिनैकवाक्यत्वसंभव इत्यत आह हि पितृकेतीत्याह तदपु
क्तं।वक्ष्यमाणमिह्यांते भर्त्येत्यादिना तस्य वचनस्य तुल्यविषयतया वक्ष्यमाणत्वात्
उक्तव्याख्यायैव सामंजस्याच्च पितामहधने पितुर्द्व्यंशित्वे प्रकृते युक्त्यंतरमाह किंचेति

Indira Gandhi National
Centre for the Arts

दा॰भा॰ नन्वत्रयुक्त्यानारकनिस्तारकत्त्वं ज्येष्ठपुत्रस्यापितुः पितामहधनेंऽशित्वंतदकर्तुः

॥३१॥ श्च कनिष्ठपुत्रस्यापितुस्तद्धनेपुत्रैःसहसमांशित्वाल्लवचनानांसामंजस्यादित्या

शंकते। अथेति। मध्यमादितिमध्यमादिपुत्राणामेवमाद्यंशित्वाद्दिद्वारकत्वंयत्रतत्र

ततोन्यूनस्यैकांशमात्रस्यापितुः पितृत्वेनाविचित्यात् भागद्वययुक्तिमतिभावः। ननु

पैतामहेपितापुत्रयोस्तुल्याधिकारित्वमेवोच्यतेतथापितत्रार्थम्यात् ज्येष्ठेनेवसामा

नाधिकारिता कथंन्यूनेत्वमतआह। सामान्येनेति। सामान्यैनसमांशित्वमित्यादाव

विशेषेणेत्यर्थः। अनुचितत्वादिति। तथाचैकपुत्रस्यापितुर्द्व्यंशित्वंद्विपित्रकस्यतुक्षे

त्रजादेः पितुः समांशित्वमेवोचितमितिभावः। पितुरंशद्वयविधानेस्युस्तोपात्तवि

षयत्वासंभवात् पितामहधनविषयत्वमेवेत्याह। किंचेति। उपदर्श्यतइत्युक्तंस ३१

र्वधनंस्यात् भागद्वयवचनमयद्येकपुत्रः स्यादित्यनेनेवमूलतयाएकपुत्रपितृ

---

विषयमितिमतमपाकर्तुंतद्वचनमन्यथाव्याख्यातुमुत्थापयतितद्वेद्वेतिर्वल्लत्वादिति

एकदेशलक्षणापेक्षयासमुदायलक्षणागौरवयस्तत्वादितिकेचित् तदसत्समुदाय

शक्त्यभावेनलक्षणायाश्चप्रसक्तेः वस्तुतस्तुतत्पुरुषेउत्तरपदंमुख्यमेवएवंपद

तुसंबंधिनिलाक्षणिकेबहुव्रीहौद्वयोरेवपदयोर्मुख्यार्थत्यागात् तदपेक्षयादुर्बलत्व

मिति क्षेत्रस्यासेपिपितुर्भागद्वयेक्षेत्रजस्यपुत्रेणसहतुल्यांशित्वस्थितौतद्विषय

मिति वचनस्यमुख्यत्वसंभवेत्वनाधिकविभागनिषेधेनालक्षण

तयासहशसाम्यमितिवचनस्यमुख्यत्वसंभवेत्वनाधिकविभागनिषेधेनालक्षण

अन्याय्येत्यभिप्रेत्याहतस्मादितिद्विपितृकमाहक्षेत्रजादीतिमतस्यक्षेतिमतस्य

क्षेत्रेअन्येनप्रसुतः उत्पादितः क्लीबादेः क्षेत्रेतदनुमतोऽन्योनोत्पादितः इत्यर्थः अ

थैकदेशेनभागद्वयविधानात्तद्विभयत्ववत्र्गहेकत्ववच्चउद्देश्यविशेषणात

याएकत्वमाविवक्षितंकिंतुपक्षप्राप्तानुवादमात्रंग्रतः सर्वेषामेवभागद्वयमित्याशयेनाा

दायभाग हतत्वश्चेति कर्तृविशेषणतयेति एकपुत्रत्वरूपात्मसंबंधिभागद्वयस्य विधेयतया
॥३२॥ एकपुत्रत्वे विधेयविशेषणमेव न तूद्देश्यविशेषणं येनाविवक्षितं स्यादिति भावः के
चित्तु कर्तुराख्यातवाच्यत्वेन विधेयतया तद्विशेषणस्यैकपुत्रस्य द्विपितृकव्यावर्त
कत्वेन स्वप्रयोजनतया विवक्षितत्वमित्याहुः स्वधनातिरिक्तधने पितुर्भागद्वययुक्ति
दार्ढ्यार्थमाह तथेति पुत्रवित्तार्जितमोदति द्व्यंशाहरत्वाद्यन्वयानुरोधात् क्रद्विद्विभावो द्रव्य
वस्त्रकाशात्तेद्दति व्युत्पत्तेः पुत्रार्जितवित्तादित्यर्थः न चैतितथा च पुत्रार्जितवित्तेन पितु
र्द्व्यंशित्वे यन दृष्टान्तं वक्तात्पक्षत्त दार्ढ्यं स्यादिति भावः पितापुत्रयोः पितापुत्रपदयोः न
नु विभागोर्थस्य दृष्टैव पितापुत्रपदं संबंधिमात्रोपलक्षणं सामान्यकल्पनायां लाघव
स्य मूलत्वादत आह किं चेति विप्रतिसिद्धं विरुद्धं तथा चार्जने सत्वमापादयेदित्यर्थः अ राम: ३२
भिधानात्प्राप्तेरिति शेषः दर्शितमिति तत्र पुत्रदाननिषेधस्य स्वत्वाभावे न न्यायमूलत्वादिति

संभवतीति सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायात् युगपद्वृत्तिद्वयविरोधाच्चेति शेषः ते
न नद्वंद्वगर्भतत्पुरुषः संभवतीति भावः द्व्यंशप्राप्तेरिति अर्जकोद्व्यंशमाहरेदिति वचनात् पितुर्भा
गद्वयं ग्रहणीतांशद्वयमिति सामान्याभिधानादिति भावः अनर्थकमिति अंशद्वयहरत्वाभिधानमन
र्थकमित्यर्थः इदमुपलक्षणं प्राग्द्विद्विं द्व्यंशहरत्वमादाय विरुद्धार्थकत्वमपि बोध्यं भागद्वयस्या
प्राप्तेरिति द्व्यंशाद्दरूपद्विविधभागस्याप्राप्तेरित्यर्थः तथा च भयोर्जितवत् सर्वत्रैव साम्यात् द्विरंशग्र
हणस्यापि प्राप्तेर्नियमार्थं पक्षद्वयमुक्तमिति शेषः विरुद्धार्थकत्वं चैतयोर्विषयभेदस्य वक्ष्यमाण
तया निरसनीयमिति ननु पुत्रे सत्वमस्त्येव अन्यथा विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः दा
राः पुत्राश्च सर्वस्वमात्मन्येव नियोजयेत् आपत्काले च कर्तव्यं दानं विक्रयमेव च अन्यथा
न प्रवर्तेत इति कात्यायनार्थ निश्चयः इति कात्यायनेन विरोधः स्यात् अत एव मातापितृदत्तवि
क्रीतो पुत्रौ दत्रिमक्री कृतौ मनुराह स्वयं तु पुत्रदारोपक्रमे नारदेनोक्तं आपत्स्वपि च कष्टासु वर्त्त

Indira Gandhi National
Centre for the Arts

दायभाग मानेनदेहिना अदेयान्याह स्वार्थायश्चान्यस्मै प्रतिश्रुतमिति तत्सुताद्रौ नामनिच्छाविषयमि
॥३३॥ ति न विरोधः न च मन्वादिभिरर्जनगणमध्ये अपत्योत्पादनस्य गणनात् कृतः पुत्रे सत्त्वं कात्या
यनादिवचनस्येव तस्य सत्त्वहेतुत्वे प्रमाणत्वात् सर्वस्वदाने तु वचनवला देवपुत्रस्यादा
नं अत एव स्वकुटुम्बाविरोधेनेदं यं दारसुतादृते इत्युपपद्यते अन्यथा स्वत्वाभावादेवत
द्रप्राप्तेस्तदनर्थकं स्यात् अत आह किंचेति नियमार्थत्वं पक्षे इत्यनियमार्थत्वं उक्तं तस्य वि
कोति स्वल्पेन वा विभज्य भूयिष्ठमादाय वसेदित्याभ्यामिति शेषः तथा चानायत्स्यापुत्रार्जितविष
कदेशिनः यत्वं वचनस्येति भावः एकदेशत्वेनैव संबंधिलक्षणस्य न नुतयोः संबंधिकोमोक्षत्वपितृद्रंश
स्य पुत्रवित्तरूपसंबंधिना अर्द्धस्य तु द्रव्यांशरूपसंबन्धिना अन्वयोस्त इत्यत आह पुरुषेति
तथा चेगुणानां च परार्थत्वादसंबंधः समग्रः स्यादिति द्विजेमिन्युक्तन्यायेन द्वयोर्विशेषण ताम:
योः परस्परं नान्वयसंभव इति भावः वित्तार्जनादिति पंचम्यंतेन द्रव्यांशरूपैकदेशस्य योन्वयः तद ॥३३॥

र्थोपादानेत्यत तदर्थं द्रव्यांशोपादानस्याविवादादाह भवतोपि संमतत्वात् अर्द्धपदेनापि तदन्वयो युक्त
इत्यर्थः द्रव्यांशस्य तु पंचम्यंतानुपस्थित्यात तदन्वयो न युक्तः इति शेषः पंचम्यंतत्वे नेति पाठे वित्तार्जे
नादित्यंतरामिति षष्ठ्यंतः तत्परामर्शनीयस्योपादानेनान्वयः प्रत्यासत्तिवलात् पंचम्यंतेन सह प्रथमे
त्यर्द्धस्यैवान्वयो न द्रव्यांशस्यासत्तिविलंवादित्याह वित्तार्जनेति अत्र चानन्वयिव्यवधानाभावस्यैवास
त्ति घटकतया हरपुत्रवित्तपदे व्यवधानेपि नासत्त्यनुपपत्तिरिति ध्येयं न पुनरिति तस्यान्वयि
ना हर इत्यनेन व्यवधानात् पंचम्यश्रवणाच्चेति भावः द्रव्यांशेनान्वये तास्य यो भावमाह सा यत्तेइति
अवाचकपदेति एकांशत्वेनावाचकाह्वपदस्यार्थः अन्याय्यत्वादिति तथा च तदन्वयतात्पर्ये मि
तिभावः द्रव्यांशार्द्धयोर्विषमवशिष्टतया विषयेकवाक्यविरोधाद्व्यवस्थितविकल्पमाह तत्रेति न
मन्वत्रोप्यर्द्धपर्यवसाने द्रव्यांशाभिधानमनर्थकमत आह यद्वेति इदं च पितुर्गुणवत्त्वनिर्गुणत्वा
भ्यो अर्द्धहरत्वाभिधानं अंशिन्यनेकस्मिन्पुत्रे वेदितव्यं एकस्मिंस्तु अत्र पुत्रमात्रे अंशितिर्हि
ति वक्ष्यमाणन्यूनाधिकविभागकारी गुणवति पितरि द्व्यंशित्वं निर्गुणे अर्द्धमिति विपरीत्येनैया

Indira Gandhi National
Centre for the Arts

दायभागाधिकं सुधिभिर्भाव्यं दत्वादत्वावेति ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिन इति वक्ष्यमाणवच
॥टीका॥ नादित्याशयः पितामहधने पितुरिच्छया न्यूनाधिकदाने निरासे पितुः स्वार्जितमात्रपर्यवसायित्व
॥३६॥ हमाणन्यूनाधिकविभागकारणमाह स्वोपार्जितधनादिति धर्मकारणेति तथा चउक्तान्यतम
कारणं विना स्वार्जितधने पुत्राणां विषमविभागेन धर्म्य इति भावः विनेयादंड्या पैतामहे ऽर्थे
त्विति यद्यपि पितामहसर्वधनप्रभुत्वमपि पितुरक्षतमेव तथापि प्रभुत्वमिह न स्वामित्वं किंतु यथे
ष्टविनियोगयोग्यत्वं सर्वस्मिन् पैतामहे पितुर्न तथात्वमिति भावः याज्ञवल्क्यं न्यूनाधिकविभा
गवचनं विभागं चेत् पिता कुर्यादिति वचनं च स्वार्जिते पितामहधने वा सामान्यत एव सोद्धाररूप
श्रेष्ठभागविषयमित्यभिप्रायेणाशंकते नन्विति श्रेष्ठभागावगतेः समभागावगतेश्च कथमिति तदीयेति
द्वचनेनैव तस्य प्राप्तत्वात् विधानानुपपत्तिरिभावः अतएव वैयर्थ्यं स्यादतः एवं न तदर्थमित्या
हतुच्यते इति वचनानर्थक्यादिति भ्रातृकृतविभागापेक्षयापितृकृते शेषविभागे न न्यूनाधि रामा
कविभक्तानामिति वचनानर्थक्यादित्यर्थः तथा च तद्वचनेन सोद्धारानुद्धाररूपाधिकन्यूनबो ३६

धकं किंतु पितुरिच्छाकृतस्यान्यस्यैव न्यूनाधिकविभागस्य बोधकमिति भावः प्रयोजनान्तरदर्शनेन व
चनस्यार्थवत्तामाशंकेति त्रयोति धर्म्यत्वार्थमिति तद्वचनेधर्म्य इत्यनेन धर्म्यत्वप्रतिपादनादिति भा
वः न्यूनत्वमेवेति भ्रातृकृतसोद्धारापेक्षया पितृकृतसमभागस्यैव न्यूनत्वादिति भावः अधिकप
पदत्वादिति सोद्धाररूपाधिकभागस्य भ्रातृकृतस्यापि धर्मत्वेन पितृकृतविशेषे ऽधिकपदोपादा
नेवैयर्थ्यादिति भावः अथ पितृकृतसमभाग एव सोद्धारभागापेक्षयान्यूनकनिष्ठानामर्थादधिको
भवतीति स एवैको भागोन्यूनाधिकपदाभ्यामुच्यते न पृथगिति नाधिकपदवैयर्थ्यमाह किंचेति इति
केचित् चूडामणिस्तु अधिकपदमिति ज्येष्ठस्य विंशोद्धार इत्यनेन सामान्यत एव प्राप्तेरनर्थकमित्य
र्थ इत्याह वस्तुतो न तु समभागमात्राभिधानेन पितृकृते तु निमित्तविशेषाभिधानेन सामान्यप्राप्ता
धिकांशवाधापत्तिरतो ऽधिकपदं सोद्धारभागप्रापकतया सार्थकं वाच्यं तथा च सति ज्येष्ठं वा श्रेष्ठ
भागेनेत्युक्त्या याज्ञवल्क्यवचनांतरं व्यर्थं न्यूनाधिकवचनेनैव हि तदुक्तद्विविधभागावगतेरतो व

Indira Gandhi National
Centre for the Arts

दायभाग वचनमेव तद्विषयान्तराभिप्रायकं तथा सार्थकमिति किं चेति अनर्थकमिति भागद्वैधविधिमात्राभिधा
टीका नेन तत्रेच्छाया अप्रयोजकत्वादिति भावः वक्तव्यस्य भागद्वयस्याल्पस्य कथं तर्हि वचनस्यार्थवत्त्व
॥३५॥ मत आह अस्मादिति स्वोपात्तविषयमिति पितामहधनपरत्वे वैयर्थ्यापातादिति भावः न किमपीति
न्यूनाधिकवचनस्य स्वोपात्तविषयाविभागं चेदित्यस्य च पितामहधनगोचरतया वचनयो
रर्थवत्त्वादिति भावः नन्विच्छया विभजेदिति समग्रांशविषयकमेवास्तु स्वल्पेन वा विभज्य भूयि
ष्ठमादाय वा वसेदित्येकस्य लक्षत्वात् तत् कथमनर्थकमत आह किं चेति विशेषेण स्यादिति अथ च व
चनवैयर्थ्यं नाद्यवस्थानात् तथार्थसंभवादिति भावः एषणीयं दोषमुच्यते इत्यादिना प्रागेवोक्तस्तथा
पि तस्य दार्ढ्यप्रतिपादनार्थं पुनरभिधानमिति बोध्यं ननु न्यूनाधिकवचनस्य सोद्धारानुद्धारभाग
द्वयस्य नियामकत्वे पित्रायेषामिति प्रतीकं व्यर्थं स्यात् भ्रातृविभागेपि द्वैविध्यसत्वात् यतो न्यूनाधि रामः
कविभागः सोद्धारानुद्धाराभ्यां अन्यत्र वेत्यत्र प्रमाणान्तरमप्याह तथेति यादृशेति एतस्य समं ॥३५॥

---

गमात्राभिधायकत्वे विभजेत्वया संस्थित इति पूर्वप्रतीके नैव समं स्यादश्रुतत्वात् विशेषस्येति
न्यायात्समांशप्राप्ते वैयर्थ्यं स्यादिति भावः व्याकुलचित्तेन तया कर्त्तव्याकर्त्तव्याविवेचनात् अन्यत
या पूर्वोक्तकारणाभ्युक्तत्व बहुपोष्यत्वादिभेदः कारणादिति यदुक्तं तत्र प्रमाणमाह यथेति कारणं
विनाप्यन्यस्यासंभवात् नैकं पुत्रं विशेषयेदित्यन्वयः निर्भाजयेदित्यत्र कारणं विनापीत्या
दिकं विनेत्यर्थः ननु कारणं विनाप्यस्य गुणं विनेत्येवार्थः तथा च कारणं गुणं विना न विशेष
येत् नोद्धारादिना विशेषयेदिति वचनार्थः तत् कथं पूर्वोक्तकारणाद्विशेषं ब्रूषे इत्यत आह उद्धा
रादिविशेषो हीति बहुवचनमेवेति विंशमर्द्धतुरीभागरूपाणामुद्धाराणां बहुषेव उद्दिष्टत्वा
दिति भावः नैकस्येति तथा च एकस्य विशेषो न तु गुणकृतोद्धाररूपः उद्धारस्य सर्वपुत्रसाधारण
तया एकपुत्रस्य विशेषत्वासंभवात् किं तु कारणान्तरकृते नन्वेकग्रहणात् कारणं विना बहूनां
विशेषः स्यादित्याह एकस्यापीति न्याय्यादप्यवद्दातव्या इति भावः इच्छाकृत एवेति स्वार्जितमात्रे

Indira Gandhi National Centre for the Arts

दायभाग टी ॥३६॥

पूर्वोक्तकारणसहकारेण इच्छाकृत एवेत्यर्थः अन्यत्र एवेति भावः यद्यपि ज्येष्ठस्य गुणत्वे इतरे
षां च निर्गुणत्वेन कस्याप्युद्धारकृतविशेषः सम्भवत्येव तथापि स विशेषो न वचनार्थः पितृपाद
न वैयर्थ्यात् भ्रातृविभागे पितथाविधाविधविशेषासम्भवादिति बोध्यं उत्थाने विभागो यमः
उत्थानमर्जितं सह युगपत् तथा च सर्वेषामर्जितेन विषमविभाग इति कुल्लूकभट्टव्याख्या
नं तदसत् तत्र विषमविभागाभावस्य समविभागस्य च न्यायत एव प्राप्तेर्वचनानर्थक्यात्
विभागरूपत्वाभावादिति एवं समुद्धारे समानांशान् प्रकल्पयेदित्यादिना अविभक्तादृव्यात् एथ
कृतस्यैवोद्धारतया तस्य भागाभावादिदिति भावः पितृकृतविभागं निरूप्य भ्रातृकृतं निरूप
णार्थं संबोध्यावधानाय त्तिजानीते इदानीमिति पितृकृतविशेषनिरूपणानंतरमित्यर्थः सोपि
भ्रातृविभागोपि धर्म्यो नेति तथा च विभागसिद्धत्येव किंतु स धर्म्यो नेति भावः अत एवोक्तं सत्य
पीत्यादि विभागाधिकारज्ञापनार्थं नन्वेवं पितृसत्वे इव मातृसत्वेपि विभागासिद्धेरपि वचनार्थसं राम: ३६

भवे धर्म्यत्वेनाकिमीत्यदृष्टकल्पनागौरवमंगीकरोषि न तवापि तदानीं तेषां धनस्वामित्वात् मा
तृसत्वे विभागाभावस्य वाचनिकत्वेनादृष्टकल्पनायाः क्लृप्तत्वात् हि गमनात्तेषां पितृसत्वे अस्वा
मित्वाद्युक्तविभागासिद्धिः मातृसत्वे तु तेषां स्वस्वधनस्वामित्वात् विभागे बाधकाभाव एवेति विभा
व्यं ज्ञापनान्मनुनेति शेषः ननु मातुरूर्ध्वमित्यस्य पितृधनविषयत्वेऽदृष्टकल्पनायामानमत
आह किंचेति पुनरुक्तमिति द्वयोरपि मनुवचनत्वादिति भावः उक्तार्थे याज्ञवल्क्यवचने स्फुटं प्रमा
णयति पुनरुक्ते त्वेकेषां पूर्वार्द्धे पित्रोरित्यत्रैकशेषकल्पनया मातृविभागे मातुरूर्द्धमिति प्राप्ते पुन
मातुरूर्द्धमित्यस्य पुनरुक्तत्वापत्तेरित्यर्थः इदमुपलक्षणं उत्तरार्द्धे दुहित्रभावे सुतस्याधिकारप्रतिपा
दनात् विरोधोपि द्रष्टव्यः अथ पूर्वार्द्धे मातुरयौतुकधनविषयं उत्तरार्द्धं यौतकधनविषयं अत्र प्र
थमं दुहित्रधिकारस्यैव वक्ष्यमाणत्वात् अतो न पौनरुक्त्यं न वा विरोध इति चेन्न अयौतुके स्त्रीधने तु
त्र कुमार्या युगपदधिकारस्यैव वक्ष्यमाणत्वेन केवलपुत्राधिकारप्रतिपादने विरोधतादवस्थ्यात्

सुप्रभाग नचसुताइत्येकशेषकल्पनयाकन्यापुत्रयोर्युगपदधिकारस्यैववक्ष्यमाणत्वेनके
॥३७॥ वलपुत्राधिकारप्रतिपादनेविरोधतादवस्थ्यात् नचसुताइत्येकशेषकल्पनयाक
न्यापुत्रयोर्युगपदधिकारप्राप्तिरितिवाच्यंपितृधनसमयव्याहारात् केवलस्यैवाधिकारस्यैवावग
तेअन्यथापितृधनेतयोर्युगपदधिकारापत्तेः साहित्यमितिपितृमातुपरमयोः साहित्यमित्यर्थः
विवक्षितमितितद्वचनस्थचकारेणद्वंद्वसामानार्थकेनसाहित्यावगमादितिभावः अत्रचसाहि
त्यंविभागक्रियापेक्षयासाहित्यंतुतुल्यरूपाणांपरस्परसापेक्षाणामेकक्रियान्वयित्वंतत्रतु
ल्यरूपाणांविशेष्यविशेषणभावेनोपन्नानांतेनसंस्त्रिकोधर्ममाचरेदित्यत्रसाहित्यव्यु
दासःपत्युर्विशेषणत्वेनैवपत्न्याआचारक्रियान्वयात् परस्परसापेक्षाणांपरस्परनैरपेक्ष्येण
तत्क्रीयानन्वयिनांयुगपत्तत्क्रियानन्वयिनामितिफलितार्थःतेनधवखदिरौछिन्धीत्यत्र राम:
च्छिदाक्रियाव्यक्तौक्रमेणान्वितयोर्धवखदिरयोः साहित्यव्युदासःयुगपदन्वितयोरेवसा ३०.

हित्यप्रतीतेरिति अत्रसंवाददर्शयतितथाचेतिअथेत्थमितिरिदेनोयचत्र्यवस्थस्तंगार्हस्थ्यंअतोऽस्वा
तंत्र्यात्यानधिकारिण इतरथासवैरेवस्वेच्छयाधनव्ययेकृतेधनविलयापत्त्याकुटुंबरक्षान
स्यादितिभावः अतएवराष्ट्रेनमातुरवस्थानेनअस्वातंत्र्यस्यसुव्यमेवाभिधानमितिभावः नचास्य
वचनस्यभार्यापुत्रश्चेत्यनेनएकमूलत्वात्स्वार्जितधनेऽस्वातंत्र्यपरमस्त्वितिदायप्रकरणस्याना
त् श्यतएवइदमस्पष्टमेवअतःस्पष्टमाहव्यासइतिविधानमुखेनप्रतिपादनमुखेनसहवासस्य
जन्मप्रभृतिप्राप्ततयानविधानासंभवात्पृथग्भावेतिपृथग्भावनिषेधस्यैवसहवासएवेतिनियमे
नपरिसंख्यायावावचनार्थत्वादितिभावः अत्रजीवतोरितिद्विवचनावगतेसाहित्यस्याविवक्षितत्वेए
कमात्रजीवनेसहवासस्योसेप्राप्तामातरिजीवंत्याविभागःस्यात् मातरिमृतायांपितरिसत्वेपिविभा
गआपद्येतेअतस्तदविवक्षामाहपित्रित्यादिनाजीवनतइत्येनाविवक्षितत्वेउद्देश्यविशेषणत्वं साहित्य
प्रतापादनंजीवनव्यप्रित्वकमुद्दिश्यविभागाभावस्यविधेयत्वात् यद्यपिपितृसत्वेनैवविभागाप्राप्तेःपितृ

Indira Gandhi National
Centre for the Arts

दायभागटी॰ पादानेवेर्थ्यंतथापिदृष्टांतार्थंतदुपादानं अतएवप्रागुक्तं मातुरप्येवमवस्थितायाइत्यत्रएवंशब्दः यथा
३८ पितरिजीवतिविभागास्वातंत्र्यंतथामातरिजीवंत्यामपीतिदृष्टांतार्थकः प्रयुक्तइतिउभयोरभावेअ
न्यतराभावेएवंचजीवतोः माहित्याविवक्षायामुपरमसाहित्यंस्फुटमुक्तमितिभावः मातृधनगोचर
त्वानुपपन्नेरित्यस्यमातुर्निधनत्वापत्तिरितिशेषः उभयाभावेतिपितामहधनस्यापिपितुःसत्त्वका
लिकत्वे तिउपस्थितविभागानुसंगेनैवशास्त्रत्वान्वयसंभवेविभागांतराध्याहारकल्पनायांगौरवा
दितिभावः अपितृधनगोचरएवेतिपितामहधनस्यापिपितुःसत्त्वबलात्पितृधनत्वेनसंग्रहः पितृधन
विभागप्रकरणेएवकारेणमातृमात्रधनव्यवच्छेदः तनास्यवचनस्यप्रागुक्तपितामहधन
गोचरत्वविरोधः मातृप्रधानकंमातृधनकंमातृसंबधित्वेननिर्दिष्टंएवंकं अत्रापिपितृधनेस्वत्वत्वास्य
दीभ्रतेऽपीत्यर्थः उक्तप्रागितिपितृधनेविभागप्रकरणेएकस्यापिस्वधनेस्वाम्यादिनेत्यर्थः अप्राप्तव्यवहा राम:
राधनीकाः पंचदशवर्षानधिकवयस्काः प्रोषितानामिति आत्मतदनुमतिंविनाविभागस्फुटएवेतिभा ३८

वः यतएवप्रपौत्रपर्यंतानांतुल्योपकारताअतएवप्रपौत्रपर्यंतानांतुल्यापासनेत्याहअतएवेतित्र
न्तिदास्यतिजनयिष्यति प्रपौत्रपर्यंतपुरमितिपार्वणकर्तृसपिंडत्वेनलक्षणयेत्यर्थः अतएवधनाधि
कारस्योपकारनिर्धनत्वादेवपितृभागस्यैवोत्तरकालतद्गामित्वान्ननिरंतराननेतिबोध्यंपिंडदातृत्वादिति
अत्रपिंडदानयोग्यतयैवविवक्षितानतुतद्रूपधानेनथात्वेदेवादकृतपार्वणस्यपुत्रादेरनधिकाप्यतेः स्व
रूपयोग्यतापौत्रादेर्मतपितृकपौत्रादिनेवेतितथैवशास्त्रेणागमादितिध्येयं उपकाराविशेषाद्द
हूनांमृतपितृकपौत्राणांप्रत्येकपितृतुल्यभागप्राप्तिःशंक्याहयद्वितितावत्येवेतितथाचरत्नाकरेत्या
येनः अविभागमृतेपुत्रेतत्सुतंरिक्थभागिनंकुर्वितजीवनंयेनलब्धंनैवपितामहात्लभेतांशंसपि
त्र्यंतुपितृव्यात्तस्यावासुतात् यत्रवांशस्तु सर्वेषांभ्रातृणांन्यायतोभवेत् लभेततत्सुतोवापिनिवृ
त्तिःपरतोभवेदिति अत्रन्यायतइत्यस्यस्वपित्र्यधिनजन्मम्लत्वादित्यर्थः अतएवपार्वणपिंडदातृत्वे
पिदौहित्रस्यनाधिकारः मातुलादिसत्वेतन्मातुरेवाधिकारात् प्रपौत्रपुत्रस्यतुपार्वणपिंडदातृत्वाभावान्ना

Indira Gandhi National
Centre for the Arts

दायभागः

३५ धिकारः अत्रैव विषये यत् केनचिदिदं वचनं साधकतया उपन्यस्तं तद् दूषयितुं एतद्वचनमाह यस्येति अ
यं पितृद्रव्यस्यात्र पुत्रविभागे पितृतो भागकल्पनेत्यस्य किं पित्र्यंश एव पुत्रस्य भाग इत्यर्थः पितापुत्रव
द्भागो वार्थः तत्र नाद्य इत्याह पितृद्रव्यपितुरेवेति द्वितीयमाशंक्य निषेधयति पितृतइति स्वमतमाह
अस्य पुनरिति यत्रेति तथा च वा भिन्नपितृकाणां पौत्राणां पितामहधनविभागे स्वपित्रनुसारेण
भागकल्पनेति वचनार्थः इति भावः पुत्राइत्युपलक्षणं पौत्रा अपि बोध्या इदानीं कालविशेषतः भ्रातृवि
विभागनिरूपणानंतरं विकल्पो द्विप्रकारः निरूप्यते इति शेषः अत्र सोद्धारः श्रेष्ठस्याविंशोद्धार इत्यादि
ना भागे वर्द्धः सम्प्रति समं साधयति उद्धारमंतरेणापीति सामान्यतः समत्वेन तत्रापि विशेषतो आनु
लोम्यानां अनुलोमजातानां ब्राह्मणादेः क्षत्रियादिपुत्राणामित्यर्थः एकजातीयानामेकजातीय
मातृजातीयानामित्यर्थः दायादस्येदं दायाद्यं तस्मिन् दायाद्ये विभागे अंशः समइति अर्थः विभागो विभा रामः
ज्यो मानदायः समानइति वार्थः अथ विभागद्वैविध्यतः द्वैविध्यस्य त्योव्यवस्थितः नतो स्थितिकः दिस ३५

शिष्टत्वात् व्यवस्थितत्वे व्यवस्थापयितुमाशंकते नचेति नित्यवदिति समभागस्यापि शास्त्रीयत्वे
सोद्धारेवलवद्वेषादिति भावः ननु ज विद्यागुणज्येष्ठइत्यनेन गुणस्यैवाधिक्यांशप्रयोजकत्वं उक्तं तत्तु
मन्त्रातिशयस्यापि प्रमाणाभावात् अत आह उद्धाराहइति वेदविद्यावैदिककर्मानुष्ठानकनिष्ठाव
चनादिगुणवत एव उद्धाराहेत्य याकलौ नाह शाज्येष्ठस्य प्रायेणासत्वादिति भावः विकल्पोपि गु
णतदभावाभ्यां व्यवस्थितइति द्रष्टव्यं किंचिदिति किंचिद्गृहीत्वा निर्वृत्तिस्तस्यान्यत्रापेक्षया व्याजिका
इत्यतस्तदुपादानं एवमेवमेवमिताक्षराकृत् शूलपाणिहलायुधप्रभृतयः प्रकाशकारादयस्तु भागे
षु यापि यमाणेषु आलस्यादिना योन व्याप्रियते स निर्भाज्यमल्पांशार्हो देशमात्रं दत्वा अर्जितधनभाग
शून्यः कार्य इति वचनं व्याचक्षुः तदसत् एतस्योपघातार्जित विषयत्वे साधारणधनोपघातेन निर्वापस्या
पि साधारणे समाश्रित्येत्यादिनाभीगावते विरोधादिति भावः अनुपघातार्जितविषयत्वे तु अनुपघ्नन् पितृ १
द्रव्यमिति तदीयपरवचनवैयर्थ्यापत्तादिति सोदरभ्रातृभिरिति सोदरासोदरविभागे तु नैवं तत्रैकस्याः

Indira Gandhi National
Centre for the Arts

न

दायभाग सपुत्रमातृत्वाभावात् मातुरेव चांशितायाः वचनेन बोधितत्वात् सकृत्कृतस्येति युगपद्वृत्तिद्वयवि
॥४०॥ रोधादिति भावः इदं च प्राचीनैर्यमाश्रित्याभिहितं न तु नव्यानां किंतु नव्यै रपि तात्पर्यान्यथानुपप
त्त्यैव गंगायां घोषः मत्स्याः सन्तीत्यादि वृत्तिद्वयागीकारात् प्रकृते न तथा विरोधो भयतात्पर्यग्राहकप्रमाणा
भावेन मुख्यपरत्वेति तन्मताश्रयणे पि न वृत्तिद्वयसंभव इति भावः अत एव पितृपत्नीत्वेनोभय
साधारणरूपेण लक्षणयैवोभयबोधसंभव इत्यपि परास्तः लक्षणाहेतुताभावादिति सर्वपत्नी
नामिति पुत्रहीनानामिति वक्ष्यते पुत्रेभ्य इत्यत्र दत्ते पुनरर्द्धमित्यत्र च क्रमेण वचनद्वयमाह तदाहेति
अधिविन्नेति अधिऊढा ह्यमानस्त्रियमपेक्ष्याधिकारित्वा पूर्वोढा हि तस्यै स्त्रियै इत्यर्थः अधिवेदनिकं
अधिवेदनामी मित्तं समम् उद्वाह्यमानास्त्रियै देयसममित्यर्थः यद्यपीदमधिविन्नस्त्रीसंप्रदानकदानविष
यं न तु दत्तस्त्रीधनं यासामिति तु पितृकृतविभागविषयं तथाप्येकत्र निर्णीतः शास्त्रार्थो बाधकं विना अ
न्यत्रापि तथेति न्यायात् आत्रापि तथा कल्प्यत इति तथोक्तमिति पुत्रहीनाश्चेति अत्र कश्चिदिदं पितुः प राम ॥४०॥

त्न्याइति स्वरसात् पुत्रकृतविभागविषयं पितृकृतविभागे पितुः सपुत्रपत्नीनामेकांशित्वमित्याह तदसत् मा
तृपदस्य सपत्नीमातृपरत्वमिति व्याख्यानविरोधात् मातृकृतविभागे पुत्रवतीनामप्यंशित्वे समांशहारिणी भा
ता पुत्राणां स्यान्मृते पतावित्यत्र माता पितृप्रोक्ते पुत्रतुल्यांशहारिणीत्यत्र च मृते पताविति पितरि प्रेते इति
ति विशेषणवैयर्थ्यप्रसंगाच्च नच पतिसत्वे तत्समांशहारिणी तदभावे पुत्रसमांशिनीत्यर्थो वाच्यो इति
वाच्यं यदि कुर्यात्समांशानित्यत्र उपस्थितपुत्रसमांशता एव पत्नीनां प्राप्तेः नत्वनुपस्थितपतिसमांशि
ताया इति तस्मात् पतिकृते पुत्रहीनपत्नीनामेवांशित्वं न पुत्रवतीनां पुत्रकृतविभागे तु मातृणामेवां
शित्वं न विमातृणामिति व्यवस्थेति पितुरूर्ध्वं विभजतां माता पितामह्यादीति पितामहपत्नीनां धनविष
यं अत्र पितामहीपदं पितृजननीमात्रपरं प्राहुः पुत्रे रिति केचित् अपरे तु बहुवचनात् सर्वा इत्युपा
दानात् सर्वासामेव पितामहपत्नीनामंशित्वमिति प्राहुः स्वल्पधने यद्यनस्यैकपुत्रलभ्यतुरीयांशे
न कन्यासंस्कारो न भवति तदैव स्वल्पधनं तद्भ्रातृभिरेव विभजनीयं पश्चात्तैरेव स्वस्वद्रव्याद्दत्वा
भगिनीसंस्कारः कार्य इति भावः नैव चतुर्थांशनियम इति अत एव रत्नाकरे विष्णुः अनूढानां कन्यानां

Indira Gandhi National
Centre for the Arts

दायभाग॰ विनानुसारेण संस्कारं कुर्यादिति॥ विषयेति॰ पुत्रादि चतुरादि संख्यत्वे कन्यायाश्चैकत्वे कन्यायावद्‍
॥४२॥ नरधनं च तस्य सु कन्यानुमती सुपुत्रस्यैकस्य निर्द्दिष्टतेत्यर्थः भ्रातृणामिति पाठे एकशेषाद्भगिनी संस्का
रस्यावश्यकता स्यात् अतस्तन्निरस्यति भ्रातॄणामिति ननु भ्रातृसंस्कारार्थवद्भगिनीसंस्कारार्थमपि
वचनस्य कुतो न स्यात् । विशेषाश्रवणादत आह भ्रातृसंस्कारस्येति पुंलिंगनिर्देशेनेति न च येषाम
पत्यानामिति नपुंसकनिर्देशेन वा कुतो न स्यादिति वाच्यः। अथ साधुत्वे संभवति शब्दसाधुत्वमात्र स्थान्याय्य
त्वादित्यभिप्रायादिति वस्तुतस्तु पितृपितामहेष्वेव भगिनीदानाधिकारितया भ्रातुरथावश्यकएव भगिनिसं
स्कारः।अथ ऋतुमती भवति दाता प्रतिग्रहीता च नरके माप्नोतीति श्रुतेः। अत एव याज्ञवल्क्येनापि भागिन्यश्च निजाद्‍शादि
त्यनेन भगिनीनामपि भ्रातृवत्संस्कारार्थमुक्तमित्यतो बहुतरमात्रसंस्कार [redacted] तु भ्रातुर्निर्द्दिष्टता
वत्॰ भगिनीसंस्कारार्थमपि निर्द्दिष्टता निर्दोषायेति सुधीभिर्भाव्यं। प्रकरणांतरमाह॰ अथेति॰ अध्याग्न्यादि
कमपि वक्ष्यते॰ विवाहात्परं तदिति॰ एतेन पितृमातृभ्रातृबंधुदत्तमिति कालांतरदत्तमात्रपरिग्रहार्थ राम:
मिति सुव्यक्तं॰ बंधुदत्तपदेनेति लब्धं बंधुकुलात्तथत्यत्र शेषः। मातापितृद्वारेणेति॰ मातुः पितुर्वा यस्य सं ॥४२॥

बंधस्य घटकत्वं तत्संबंधवतां मातुल्यपितृव्यादीनामित्यर्थः। एवं च सति मातृपितृभर्तृदत्तस्य अ
न्वाधेयकज्ञानं न स्यात्॰ अत ऊर्द्धं लब्धमित्यभिहितं तल्लब्धार्थमाह॰ पित्रोश्चकाशादिति॰ भर्तुः
सकाशादिति वचनलब्धं भर्तृकुलादुक्तार्थमाह भर्तृकुलाच्चेति इत्थं च विष्णुवचनोपात्तस्य सुत
दत्तस्य साक्षादेव संबंधत्वेन निरुक्तं बंधुभर्तृकुललब्धासंभवादिति सुधीभिर्भाव्यं स्वपदेनेति॥
पितृमातृसुतभ्रातृदत्तमित्यत्र पित्रादिपदेनेत्यर्थः। ननु विवाहात्परं तदिति ऊर्द्धं संस्कारादिति
च विहाय सामान्येनैव भर्तृतत्कुलात् पितृमातृतत्कुलाच्च लब्धस्यान्वधेयसंज्ञा किमिति
न कृता इत्याशंकायामाह परिनयनसमयलब्धस्येति अयं भावः अन्वाधेयत्वं संज्ञायास्तावत
द्रूपे अप्रजास्त्रीधने वक्ष्यमाणे भ्रात्राधिकारएव फलं परिनयनसमयलब्धेति च न भ्रात्राधिका
रः - ब्राह्मादिपंचस भर्तुः आसुरादि त्रिषु पित्रोरेव तेषामभावे देवरादेवाधिकारात्॰ ग्रत संज्ञा
यास्तत्साधारण्ये प्रयोजनाभावः प्रत्युतस्तत्साधारण्ये तत्र भ्रात्राद्याधिकारबोधक विशेषवच
नेन भ्रात्राधिकारवचनस्य विरोधप्रसक्त्यात्तस्य संकोचो वाच्यः तथा च प्रक्षालनाद्धि पंकस्य दूरा
द्स्पर्शनं वरामिती न्यायेन तद्व्यावर्त्तनमेव संज्ञायाः समुचितमिति न च तथापि विवाहसमया

दायभागटी. कन्युत्रेत्स्येवोच्यतां किं परंतइत्यादिपर्यालत्वेनेतिवाच्यं तथासति विवाहात्पूर्वंवाग्दानोत्तरंपत्ति
॥४२॥ दत्वेभ्रात्रधिकारापत्तेरिति. एतदध्यनादिकं दायभस्यसंक्रांतसंबंधिधनपरत्वशंकामपनय
तिभर्तृदायइतिमन्वादिभिरिति. आदिनाकात्यायनविष्णुपरिग्रहः ग्प्रत्रमनुकात्यायनाभ्यांदत्तं
तत्प्रीतितःस्त्रीयेइत्यनेन विष्णुनाचान्वाधेयमित्यनेनेतिभावः तथाचैतेःसहैकश्रुतिमलत्वान्न
वोधाद्दायपदंदत्तपरमितिभावः नचैवैषरीत्यंचद्दुबुलक्षणाप्रसंगान्मनुस्मृतेर्बलवत्वाच्च भा
र्तृदायंमृतेइति अत्रमृते विद्यमानेइत्यभिधानात्. नसंक्रांतसंबंधिधनपरता विन्यसेद्धिनियुंजी
तक्षपयेस्थापयेत् अन्यथास्वयंरक्षणासामर्थ्ये अन्यथातद्धनेवर्त्तमानासंभवेतत्कुलेक्षपयेत्तत
कुलमाश्रित्यकालंगमयेत्इत्यर्थःइतिकेचित्. केनेत्याकांक्षायां अश्रुतकल्पनेति अनंतराधि
कारिणाभ्रात्रादिनास्वयंसर्वंगृहीत्वाद्विस हस्रपणपर्यंतंस्त्रियेदायोदयइत्यश्रुतभ्रात्रादीनां
कर्तृत्वकल्पनेत्यर्थः एतच्चेति. मृतस्यापुत्रस्यपत्न्याःसर्वधनाधिकारित्वंचेत्यर्थः वक्ष्यतइति.
अपुत्रधनाधिकारनिरूपणेइतिशेषः आहेतिस्त्रीधनमितिप्रागुक्तेनान्वयः पित्रादिदत्तेविवाहा राम:
त्पूर्वंपरतोवाविवाहकालदत्तस्यअर्ध्यग्निपदेनैवप्राप्तेःत्वतिर्ग्रासाच्छादनावशिष्टंशुल्कंवक्ष्यमा ॥४२॥

णलाभकारणद्विरुक्तिःवरणपदानंवरहस्तेसमर्पणंप्रदर्शनार्थंउपलक्षणमित्यर्थः॥उपलक्षणत्वेहेतुमा
हदात्रमिति तथाच. अभिसंधेरवश्यकतयाविवाहकालविवक्षायामदृष्टकल्पनागौरवंस्यादितिभा
वः अव्यवस्थितसंख्येति अनीयतसंख्येत्यर्थः मन्वाद्युक्तषड्विधादधिकस्यापिशुल्कलाभौदे
ंर्वत्वादिभिरभितत्वादितिभावः पितृमातृभर्तृकुलेति पितृमातृभर्तारोयस्मिन्कुलेइतिब
हुव्रीहि अन्यथालब्धेभर्तृकुलान्तेथेत्यत्रैवभर्तृकुलादिपदान्तत्रावेपारिग्रहोनस्यात्. नापरीति
तथाचोक्तद्विविधस्त्रीधनेभर्तुरिच्छैवस्वत्वजनिकापत्नीस्वत्वनाशिकाचतदन्यधनेतुतत्रापत्कालो
पेक्षितइतिभावः स्त्रियाअपिधनंस्त्रीसत्वास्यदीमृतमपिधनंनस्त्रीधनंनेतरनैरपेक्षेणस्त्रियायथेष्टवि
नियोज्यंअस्वातंत्र्यादिति एतच्चभार्यापुत्रश्चेत्यादिनाप्रतिपादितमेवप्राक्स्त्रियाएवेतिस्त्रीणांस्वातंत्र्ये
णविनियोज्यंयद्धनंतत्स्त्रीधनमित्यर्थःतथाचकात्यायनैकवाक्यतयाभार्यापुत्रश्चेत्यादिवचनमप्युक्तद्वि
विधस्त्रीधनविषयमेवस्त्रीधनांतरेतुस्त्रीणांस्वातंत्र्येणयथेष्टविनियोगोनिरूढएवेतिभावः अत्रसंवा
दमाह. तदाहेति नचैवंशुल्कलाभयोरसौदायिकत्वात्.तत्रास्वातंत्र्यंस्यादितिवाच्यंपूर्वोक्तकात्यायन
वचनेनान्यतोलब्धस्याशिल्पलब्धस्यचद्वयोरेवास्वातंत्र्यप्रतिपादनेनेतयोरपिस्त्रीधनमध्यपठितयोः

Indira Gandhi National
Centre for the Arts

दायभागटीस्वातंत्र्यावगमात् स्थावरेष्वपीतियदुक्तंतस्यापवादमाह स्थावरेपीति अन्यथेति स्थावरमात्रे
॥४३॥ निषेधेइत्यर्थः संप्रतिबोधकेऋणाथमृतुमर्णेनकृतेस्नानभोजनाद्यवरोधः विसर्गेदाने ग्रा
सेतिवासोगृहं तत्रस्वमितित्रिककन्यानांसंबंधीनांसकाशात्स्वविभागंयासाछादनादिरूपंआदद्या
त्तइत्यर्थः इदानींस्त्रीधननिरूपणानंतरमित्यर्थः सममितिविंशोद्धारनिषेधायभगिन्योदत्ताः सनाभ
यः सहोदराः अतएववचनेद्वंद्वश्रुतिर्नास्ति येनावगतसाहित्यबलेनभगिनीभ्रात्रोर्युगपदधिकारःस्या
त् किंतुक्रमेणैवतयोरधिकारः। क्रमश्चनपाठिकः किंतुप्रथमंभगिन्याः ततोभ्रातुरित्येवंरूपः मातुर्दुहि
तुरभावेतदन्वयादित्यादिवचनेषुबलवतःश्राद्धक्रमस्यप्राप्तेरितिकेषांचिन्मतंतदपाकर्तुमाह द्वंद्व
श्रवणेपीतिनन्तुल्यार्थेतिचार्थेद्वंद्वइत्युक्तेद्वंद्वसमानार्थताचकारस्यपुत्रपरमितिदुहितुःपृथगुपादाना
त्पुंसकस्यचाधिकाराभावादितिभावः सर्वावस्थेति सस्तूलस्यचेत्यर्थः अत्रसहोदरपदाद्युपादानात् कन्या
सत्वेदत्तकादीनांनाधिकारःदुहित्रपेक्षयापंचमाद्यंशभागिनापुंधनवदीतिकेचित् एतावतापिउक्तक्रमे
ग णयौगपद्यायद्वेमेपितत्रहेमन्त्वस्यैचिवादस्यचचकारश्रुतिलान्नतयोर्विभागेसाहित्यावगमः द्वौ रामः
हियवपात्रैर्वाचेत्यादावविभिन्नकालीनयोरपिएकजातीयक्रियासंबंधमात्रेणतस्याश्रितार्थत्वात्० ॥४३॥

अन्यथापत्निदुहितरश्चेत्यादौचकारश्रुतिबलेनपत्नीदुहित्रोरपियुगपदधिकारापत्तेरित्येवंरूपः
तत्रमन्त्रस्यसनर्थस्वगलहस्तलन्निरएकरइत्यर्थः तद्वचनमाहयथेति अप्रजायामिति प्रजासंतति
पुत्रदुहित्रपौत्रदौहित्ररहितायामित्यर्थः। सुव्यक्तमिति सामान्यपदादितिशेषः केवलकुमार्याइति
भ्रातृसत्वेपीत्यादविशेषवचनेवक्ष्यमाणं ननुभ्रातृभगिन्योरधिकारेभागिन्यपेक्षयाभ्रातु
रभ्यर्थीतत्वेनविंशोद्धारप्रसक्तौतन्निवर्तकतयैवसमत्वविधानंसार्थकमितियदितदाकेवल
भ्रात्रधिकारपक्षेपितुरेवसार्थकमिति कथमनर्थकत्वेत्याह किंचेति वचनन्यायेतिवचनंसा
मान्यपुत्रकन्यानामितिन्यायः किंचेत्यादिनोक्तयुक्तिः अन्यतरेति भ्रात्रोरिवतुल्याधिकारादिति
भावः ऊढायाइति नपुनर्वक्ष्यमाणयौतकधनवत् कन्यायाअभावेवाग्दत्तायास्तदभावेऊ
ढायाइतिक्रमः प्रमाणाभावादितिभावः अतएवपार्वणपिंडदानादेवउपकारांतरमपिहे
तुमाहदौहित्रोपीति स्वसत्वयासाक्षात्स्वजन्यसत्वयास्वपुत्रद्वारेणचोहेतो यद्यपिपुत्रवती
नामपिस्वसत्त्वयापिंडदानाभावस्तथापिद्रष्टांनार्थेतदुक्तिः यतःस्वपुत्रद्वारेणतस्याउपकारकत्त
यादुहितॄणांधनाधिकारोऽतएवनारदेनसंतानदर्शनंदुहित्रधिकारेहेतुतयानिर्दिष्टमित्याह अत

Indira Gandhi National
Centre for the Arts

दायभागटी० एवेति पुत्रेणेति० एतेन यौतकधने दौहित्रस्यैव दायाधिकारः सूचितः एतस्य ढावाध्यत्वादि निबोध्यं०
॥४४॥ दौहित्रपर्यन्तानामिति० प्रपौत्रीपर्यन्तोपलक्षणं दौहित्रानन्तरं महोपकारकत्वेन तस्यैवाधिकारात्
तयोरपीति० तेनैव पूर्वोक्तयोरनधिकारकथनं तदुक्तपर्यन्तसद्भावे ज्ञेयं योगपद्याधिकारे केवलक
न्याधिकारबोधकवचनविरोधपरिहारार्थं तद्वचनान्यत्वपरमिति नन्वत्र विनिगमनाभावः देवला
दिवचनानां यौतकविषयकं अन्तरेण गौतमादिवचनानां अयौतुकविषयत्वमित्यस्यापि सम्भ
वात्तो मनुवचनैकमूलकत्वं विनिगमकमाह० अत एवेति० यत एव यौतक एव प्रथमं कुमार्या
धिकारः अत एव मनुना कुमार्यधिकारे यौतकपदमभिहितमिति भावः अस्थितिरिति० कन्या
स्थितिर्वा स्थित्यैकतामानुवर्तीत्यर्थः एवमन्यत्रापि यतो विवाहसमयलब्धपरमेव यौतुकं अतो
त्रविशिष्टेनापि पारिणाय्यमुक्तं अन्यथा मूलान्तरकल्पनापत्तेरित्याह अत एवेति० अत एव पारिणा
य्यपदमपि विवाहलब्धपरमेव न तु कल्पतरुप्रभृतिभिरुक्तं यत्परिच्छदादर्शकङ्कतिकादिरूपं पारि
णाय्यं तत्परित्यक्तत्वे [illegible] कल्पनापातात् परिणायनशब्दस्य विनाहेतु ढलाच्च विवाहसमयादन्य
त्रापीति० तथा च पित्रादत्तयौतुकमयौतुकं वा तत्सर्वं कन्याया एतद्बोधनार्थमेतद्वचनं० मातुश्च यौ

तुकं यत्स्यादिति स्मृतिवचनं तु यौतुकसामान्ये कन्यामात्राधिकारार्थमिति नान्यतरवैयर्थ्यमिति वो
ध्यं कन्याया एवेति एवकारेण निरासः ब्राह्मणीपदस्यानुवादत्वे वैयर्थ्यमाशङ्क्याह० यद्वेति० न च ब्रा
ह्मणीकन्याया अधिकारावगमात् स्त्रीपदं ब्राह्मणीपरमस्तु क्षत्रियादिपरत्वे कन्यापदस्यामुख्य
तापत्तेरिति वाच्यं (अनूढात्वेन कन्यापदस्य सपत्नीकन्याया अधिकारावगमात् स्त्रीपदं ब्राह्म
णीपरमस्तु क्षत्रियादिपरत्वे कन्यापदस्यामुख्यतापत्तेः) बोधकतया अमुख्यत्वाप्रसङ्गोक्तेः
तद्रूपेणैव कन्यापदस्य शक्तेः आनर्थक्यभयादिति० न चानर्थक्यभयात् परिसंख्यैवास्तु तथा च
ब्राह्मण्येव हरेत् नान्येति परिसंख्यया क्षत्रियादेः पितृदत्तयौतके सत्यामपि कन्यायां पुत्राणा
मेवाधिकारः स्यादधिकार इति वाच्यं० स्वार्थहान्यादिदोषत्रयापत्तेः एतदपेक्षया कन्यापदस्याजह
त्स्वार्थलक्षणसपत्नीकन्यापरं याज्ञवल्क्यवचने षष्ठ्यन्तविपरिणामेनान्वयकल्पनं च दुहितु
रेवान्वयो युक्तो न्याय्य इत्यत्र आह किंचेति तथा च बौधायनस्य संकोचकल्पनं याज्ञवल्क्योक्तेः षष्ठ्यन्तवि
परिणामेनान्वयकल्पनं चापेक्ष्यते तत्पदस्यानुषङ्गप्रयासनिरासार्थमनुवाद एवान्याय इति भावः यौ
तुकं सर्वं वस्तुत्वदुहितॄणामेव तदभावे पुत्रस्येत्युपसंहरति तत इत्थं चेति दुहितरि सत्यामिति शेषः न

Indira Gandhi National
Centre for the Arts

दायभाग १ त्रैवदुहित्रधिकार विशेष एवंक्रमार्थं कुमारीणां वाद्त्तानामूढानां च क्रमेणाधिकारार्थं प्रथमामिति । अप्रत्ता अवा
॥४५॥ ग्दत्ता अप्रत्ता वाग्दत्ता च कारार्थः लभ्यमाह समूढानामिति । ननु युद्धे पेगेवाप्रतादीनामधिकार स्थवचनार्थत्वस
म्भवात् कथं क्रमकल्पने संतआह । दुहितॄणामितीति । क्रमार्थत्वेन क्रमिकाविकारत्वेनय सामान्यप्राप्त
धिकारस्योपसंहारबोधकत्वद्पूर्थत्वादित्यर्थः उपसंहारोर्थोयस्येति वहुव्रीहिणा उक्तार्थलाभात् उपकार
परत्वस्येवन्यायत्वादिति । ब्राह्मणी पदमुत्तमजातीपरं तेनैव वैश्यायाअपितथा विधायाः पितृदत्तधनं क्षत्रि
यागृह्णीयादिति मिताक्षरायां व्याख्यातं तत्प्रमाणाभाववत्त्वेपेक्षणीयमिति । सकलवचनानामिति पितृदत्तसाधा
रणयौतुकधनस्यामान्ये कन्यापुत्रयोस्तुल्यवदधिकारबोधकवचनानामित्यर्थः नारदादिवाक्ये अन्वयपदंस
न्निहितत्वात् दुहित्रन्वयि दौहित्रपरं तथा च सत्यपि पुत्रे दुहित्रभावे दौहित्रस्यैवाधिकार इति । केषांचिन्मतमपा
कर्तुमाह नचवाच्यामिति । अन्यविरोध्येति । विशेषः स्त्रीरूपः जनकाकांक्षितत्वात् जनकमात्राकांक्षितत्वात् ।
जन्यतयोपस्थितनिराकांक्षितत्वात् अन्यान्तरेणजन्यत्वयोपस्थितेन अन्वयपदोपात्तेनेति पूर्वसत्वापूर्व
सत्वविशिष्टसत्वरूपयोः साध्यत्वसाधनत्वयोर्विरोधे नैकस्मिन्धर्मिण्येकपदोभयसंभवा■भवादिति
भावः अन्वयपदस्यापि दुहित्रन्वये निराकांक्षत्वमाह समत्वादिति । द्वयोरेव जनकमाकांक्षतया तुल्यत्वादित्य

१

र्थः अधिष्ठानेति जन्यत्वांशमपहाय दुहितृपदस्यस्त्रीत्वेन रूपेण लक्षणयेत्यर्थः अन्वयो वा च्य इति जन्यत्वे
नानुपस्थित्या परस्पर निराकांक्षत्वविरहादिति भावः सर्वेषामिति दुहितृपदान्वयपदकाम्यायनो न पु
त्रपदानामित्यर्थः मुख्यत्वस्विकारादिति । तथा च मातुरन्वयार्थं मुख्यस्य दुहितृपदस्यान्वयपदान्वयार्थं न पु
नर्लक्षणा युगपद्वृत्तिद्वयविरोधादिति भावः न शब्दोपात्ताया इति तदा बुद्धिस्थत्वेनैव उपस्थापिताया इत्यर्थः
दुहितृस्वरूपेणेति तथा निराकांक्षत्वं तदवस्थमिति भावः ननु अन्वयपदार्थस्य मातुरित्यनेनान्वये तत्पदस्यैवार्थे
न च तत्पदोपस्थिताया एव मातुरन्वयो वाच्यः मातुर्विशेषणत्वेनाप्रधानतया तदा परामर्शासंभवात् । तदानी
विशेष्यपरामर्शस्यात्कर्षितत्वात् तथा च प्रधानीभूतदुहितुरेव परामृष्टाया अन्वयेनान्वयो वाच्यः न च ज
न्यत्वेनापस्थिताया दुहितुर्जनकत्वान्नान्वये विरोधः एकनिरूप्यजन्यजन्यकत्वयोरेकैकस्मिन्धर्मिणि विरो
धेन भानानभ्युपगमात् । इहतु मात्रपेक्षया जन्यत्वं अन्वयपदार्थापेक्षया जन्यकत्वं दुहितुरिति निरूपक
भेदात् अत एव दुहितुश्चैवयेपुत्रा दौहित्रास्ते प्रकीर्त्तिताः इत्यादिवचनेषु दुहितुः पुत्रा इति संगच्छते इत्थं चात्र
दुहित्रन्वये निर्णीते एतदेकश्रुतिमूलकतया यत्रमदत्येनास्तीत्यत्रापि वचने दुहित्रन्वय एव वाच्यः इत्यत आह किंवे
ति किं न्विति । षष्ठ्यंतमपेक्षा षष्ठ्यंतपरिणामे नान्वये गौरवादिति भावः अविरोधात् एकश्रुतिमूलत्वे अविरोधादि

Indira Gandhi National
Centre for the Arts

स्वर्थः ननु तथापि नारदवचने मातुरन्वयेतत्पदद्वयेपर्थापातात् समर्थादिति पाठे सम्यगर्थः प्रयोजनं

दायभागटी० त्यर्थः ननु तथापि नारदवचने मातुरन्वयेतत्पदद्वयेपर्थापातात् सगोत्रत्वेन ऊढापेक्षया बलवत्वात् तद

११५/६॥ यस्येति पूर्वोक्त एवार्थः तथा च प्रथमं कुमार्यास्तदभावे वाग्दत्तायाः सगोत्रत्वेन ऊढापेक्षया बलवत्वात् तद

भावे समूढायास्तत्रापि पुत्रवती संभावितपुत्रयोस्तदभावेऽन्ययोस्येति क्रमः न च च कारश्रुतेरतादीनां पुत्रपदधि

कारेरत्नाकरसंमतो युक्त इति वाच्यं मातुश्चयोत्तुकं यत्स्यात्कुमारीभाग एव सदिति मनुवचनेनेर पेक्षकुमारी

पदश्रवणात् एवकारश्रवणात् कुमारीमात्राधिकारात् तत्तुल्योपकाराभावेन्यायविरोधाच्च सामान्येन प्राप्ति

र्याज्ञवल्क्यवचनादपि स्यात् तथेति ब्राह्म्यादिषु चतुर्षु विवाहेषु ब्राह्म्येणसह पुत्र सुभर्तुः शेषेषु आसुरादिषु

पितृगामिप्रसूता च तद्दुहितॄणां अर्थात्सर्वेत्यर्थः प्रथमं कन्याया इति पूर्वोक्तवचनेन क्रमलक्षतादिति भावः न चात्र

दुहितृपदं दौहित्रपरं अन्यथा मातुर्दुहितरः शेषमित्यनेन न पौनरुक्त्यापत्तेः इति मिताक्षरोक्तमिति वाच्यं मातुर्दुहित

दुहितृपदस्यासाधारणविषयत्वेनोपसंहारतया तदतिरिक्तपरिणयनलब्धविषयतया च तस्यापुनरुक्तत्वात् तस्य च क्र

मस्यासाधारणविषयत्वेनोपसंहारतया तदतिरिक्तपरिणयनलब्धविषयतया च तस्यापुनरुक्तत्वात् तद्वचनं कन्याधिकारार्थं इदं तु स

णाविशेषरूपविशेषानंतरमन्वाधिकारायत्वसार्थकत्वात् तद्वचनं कन्याधिकारार्थं इदं तु स

समूढाधिकारार्थमिति क्वचित् उभयत्रैव दुहितृपदमात्रश्रुतेर्विशेषादुभयाधिकारस्ये

व सिद्धेरपरवचनवैयर्थ्यस्य दुष्परिहरत्वात् दुहितॄणामेवेति न तयोस्तुकधनवत्पुत्रदुहि

त्रोरित्यरित्यर्थः ननु वचनबलात् दुहितृभावस्य वभर्तुरधिकारसंप्रेतेः कथमंतरापुत्रस्या

धिकारः इत्यत आह अप्रजास्त्रीधनमिति न तु गौतमवचनात् यौतुकधने समूढापर्यंतानां दुहि

तॄणामधिकारोक्तः अयोत्तुके तु स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी अप्रत्ताचेत्समूढान्

नत्वभेद मातृकधनेइति वृहस्पत्युक्तेर्न समूढानामभावादिसत्वेऽधिकारः स्यादित्याशंकायां त

च दुक्तवचनस्य वार्थमिति नत्त्रसमूढाधिकारे प्रमाणमाह वृहस्पतिनेति अप्रत्तापदेनेति अत्रा

र्थभावः अप्रदत्तापदं दुहितृपरं समूढापदेन दुहितुरप्रमात्वलाभात् किंतु अप्रमाचेतर्थानि

तदासमूढेन त्वमेवेत्यर्थः तथा चाप्रत्ताभावे समूढाधिकारो वृहस्पतिना प्रतिपादित इति

अप्रत्ताया दुहितुः पुत्रसमत्वात् अप्रत्ताभावे प्रतिपादिते अर्थात्पुत्राभावेपि प्रतिपादितमित्यत उ

क्त अप्रत्तायभावे तिब्राह्मणादिविवाहेन भार्यात्वं प्रत्तायायावत्तु न गोचरमेव वचनमिति मिता

क्षराकृन्मतान्कतुमाणं कैश्चनचेति नेदं वचनमिति किं प्रप्रजास्त्रीधनं भर्तुरिति याज्ञवल्क्यवचनमि

त्यर्थः बंधुदत्तमिति वचनस्योतिबंधुदत्तं यथा श्रूत्त्वा अन्वाधेयकमेव च अप्रजायामतीतायां बां

धवास्तदवाप्नुयुरिति विवक्ष्यमाणबाधकपदोपात्त भ्रात्रधिकारबोधकेत्यर्थं निर्विषयत्वे तितत्रा

चिह्न

अनेनवचनेनमवन्मतेभ्रात्राधिकारसिद्धेरित्याशयः अथतद्विरोधादस्यतत्सर्गवचनस्यवंधु
दायभागटी. अनेनवचनेनभवन्मतेभ्रात्राधिकारसिद्धिरित्याशयः अथतद्विरोधादस्यतत्सर्गवचनस्यबंधु
॥४७॥ दत्तशुल्केतरविवाहप्रवेशसमयलब्धविवाहोत्तरपुत्रादिस्त्रविषयत्वमस्त्वित्यतआह मनुविरो
धाच्चेति. अनुसंधत्तेइति. ननुभार्यात्वंप्राप्तायाःइत्यस्येतिभावः इध्याहारोऽनुषंगापेक्षयातस्यगु
रुत्वादितिभावः एवंचैदेतकवाकालयायाइकल्याचनेपिदत्तमित्यस्यैवाध्याहारोयुक्तोनतु
भार्यात्वंप्राप्तायाइत्यस्येतिभावः यत्तद्धनविषयत्वमितियोतुकधनेभर्तृसत्वेपिपित्राद्यधिकार
स्यैवस्थमाणत्वादितिभावः यौतुकायौतुकमप्रजास्त्रीधनाधिकारिणोनिरुप्याप्रजास्त्रीध
नाधिकारिणोविरुद्धःप्रतिजानीतेसंप्रतीति ब्राह्मेत्यासेनेअतद्गुणसंविज्ञानबहुव्रीहिणा
दैवादयश्चत्वारोधिकारसमुच्चीतेनब्राह्मेणसहपंचेत्यर्थः उक्तार्थकल्पनेहेतुमाह ब्राह्मेति
तथाचमन्वेकमूलत्वानुरोधादतद्गुणसंविज्ञानाबहुव्रीह्याश्रयणमितिभावः नपुनरित्यादि
उक्तस्याधियुक्तत्वेनप्रणिधानायपुनःकीर्तनंतदेवाह कालार्थत्वादितिनिर्देशस्यब्राह्मादि इना
पदस्यकालार्थत्वात्विवाहस्यदानाधिकरणत्वबोधनब्राह्माादिकालबोधकत्वात् गोषुदुह्य
मानासुआगतइत्यादिसतिसप्तमीस्थानेदुह्यमानोमागमनक्रियान्वयबोधनक्रियाकाल

लक्षणायानिरूढत्वादितिभावः ननुब्राह्म्यादिपदानांस्त्रीधनकुतोनलक्षणास्यादत्राह ब्रा
ह्म्यादिपदानामिति. एकत्वेनेति ब्राह्म्यादिपदंयदिस्त्रीपरंतदाअस्यादिति. उत्तरवचनस्थेन
लक्षणायानिरूढत्वादितिभावः दूषणांतरमाह विवाहका
सामाधिकरण्यानुरोधात् एकत्वेनषष्ठ्यानिर्देशःस्यादितिभावः दूषणांतरमाह विवाहका
ललक्षणायामिति. वर्त्तमानसंबंधेनेति. वर्त्तमानकालस्तत्राविवाहस्ययःसंबंधोऽधिकरण
त्वं तद्रूपेणलक्षणास्यादित्यर्थः अतिक्रांतेतिअतिक्रांतायाविवाहक्रियातत्संबंधेनतज्जन्यसं
स्कारत्वरूपेणजघन्येतिविवाहाधिकरणकालत्वापेक्षयातज्जन्यसंस्कारत्वस्यलक्षणावच्छे
दकस्यगुरुत्वादितिभावः उपलक्षणंचैतत् कालपरत्वेलक्षणानिरूढास्त्रीपरत्वेपुनरधुनिकी
लक्षणातासुतद्धनस्यतद्धनस्यचाधारत्वबोधोपीतिद्रष्टव्यं ब्राह्म्यादिपदानांस्त्रीषुलक्षणामस
हमानमाह. नत्वेतिस्त्रीवाचत्वमिति दारादिपदवन्नियतलिंगत्वमेषामित्याशयः मातामहली
यादिति. एवंचशेषेषु पितृगामितदिति याज्ञवल्क्यवचनेपितृपदेनशेषोद्दृष्टव्यःयद्यपिधन
संबंधस्यप्रत्येकपरिसमाप्तत्वेनसाहित्यासंभवेपिपालिभ्यांतत्प्रसङ्गग्रहइत्यादावद्वंद्वबलात्सहत्व
प्रतीतोयुगपद्धनाधिकारएवप्रतीयतेतथापित्रोरित्यनेनापितथार्थसिद्धेर्मातापित्रोरितिक्र

Indira Gandhi National
Centre for the Arts

४ दायभागटी नाभिधाने तन्मातुरभावे पितुरिति क्रमिकार्थमेवेत्याह युगपदीतिपित्रोरितिसकृदुच्चरित
द ॥ ४-८ ॥ पितृपदस्य जनकत्वेन लक्षणया युगपदुपस्थितिसंभवादितिभावः ननु लक्षणायां प्रमाणा
भावात् अत्रापि प्रातिपदिकपितृपदात्प्रथमं जनकत्वस्येनोपस्थितोपश्चाद्द्विवचनोपनीत द्वित्वा
न्वयानुपपत्त्यैवैकशेषकल्पनया मातुरुपस्थितिरिति क्रमाभिधानमस्त्येव अत एव पितरो भ्रा
तरस्तथेति याज्ञवल्क्यवचने अनयैव रीत्या पितृक्रमागमं वक्ष्यतीति चेन्नैवं पितरो भ्रातरस्त
थेति अत्र तदभावे मातुरिति स्फुटक्रमाभिधिकार इह तु तथाविधविशेषवचनाभावात् इह वलल
भ्यार्थपरित्यागे हेत्वभावात् युगपदुपस्थित्यर्थं लक्षणाया युक्तत्वादिति इत्थं मातापित्रोरिस्थु
क्षावपि क्रमीकाधिकारबोधकतथाविधप्रमाणाभावात् वाक्यावगतयुगपदधिकार एव कु
तो न स्यात् अत एव शेषेषु पितृगामितद्धितैकशेषेण युगपदधिकार एव याज्ञवल्क्य
वचनेनोक्त इत्यत आह कन्याधने इति अत्रापीति तथा च द्वन्द्वादेकशेषाद्वा साहित्या
वगमो न धनसंबंधापेक्षया तस्य प्रत्येकपरिसमाप्तत्वात् किंत्वभिधानापेक्षया यु
गपदुच्चारणश्राद्धं निषोडशादितियात् क्रमीकयोरपि संभवतीति किमधिकारः क्र

मेण युगपद्वेत्याकांक्षायामेकत्रदृष्टन्यायात् कन्याधनेन वक्तृ तथाविधोच्चाधाने
पि क्रमेणाधिकारः कल्प्यत इति भावः तदनेनेति न त्वेतन्निरूपणप्रकरणान्तरे
पुनः करणीयमितिभावः वाग्दत्तामरणे तु वरदत्तं च भिन्नं वरेण हरणीयात्
तथा याज्ञवल्क्यः दत्ता कन्या हरणं दण्ड्यो व्ययं दद्याच्च सोदयं मृतायां सर्वमाद
द्यात्परिशोध्योभयव्ययात् इति तथा चाहर्त्तीत्यनुवृत्तो शाङ्खः स्वयं शुल्कं
वोढेति वाग्दानकाले यद्येन तद्दत्तं तेनैव ग्राह्यमिति संप्रदायः अत्रापि यो
वोढेति वाग्दानकाले यद्येन तद्दत्तं तेनैव ग्राह्यमिति तथा स्यात् अतआ
न्तकधनेपि ननु वचनाभावेपि एकत्रदृष्टन्यायादेव तथा स्यात् अत आ
ह पित्रोरेवेति एवकारेणभ्रातृव्यवच्छेदः तथा च वचनेनैव तदधिका
र काङ्क्षा निवृत्तेर्न न्यायावसरः इतिभावः पितृमातृभर्तृ कुलादितिअ
न्वाधेयपदार्थ उक्तः भ्रातॄणामेवेति न पुनर्भर्तुः पित्रोरेवेत्यर्थः वचनानुरोधात्
प्रथमां बंधुदत्तामिति व्याचष्टे बंधुदत्तामिति कन्यादशायामित्यनुपदमेवव

Indira Gandhi National
Centre for the Arts

दायभागटी. वक्ष्यति अत एव वक्ष्यमाणवचनैकवचनवाक्यतया पित्रोर्बंधुपदार्थत्वावा
११५९॥ भावाघबावाधवाद्गतिवाधवस्त्यानी। नियोगादितिभावः बंधुपदवाधवपदयो
र्व्यक्तार्थत्वेप्रमाणमाह तद्देति अप्रज्ञात्वमात्रनिमित्तत्वेनेति अतः कन्यायाअपिअ
प्र-ज्ञात्वाविशेषात् तद्विषयत्वमक्षतमिति बंधुदत्तपदेनेति वक्ष्यमाणग्रंथसंगतिरिति
अतोराक्षसादौशुल्काभावादित्यादिवक्ष्यमाणपानिशसोस्पष्टांतकमाह सर्वेदि
ति प्रागुक्तमप्यन्वाधेयकमितिव्यवस्थितत्वादुपास्थितिसोकार्यत्वंपुनराह अन्वा
धेयमिहेति भ्रगुणहेतिशेषः गृहोपस्कारेति उपस्करः कनककुंडलहारादि
सर्पादीतिकेचित् वाह्यावलीवर्द्धादिः गृहादिकर्मिभिरिति शिल्पिभिर्गृहादिशि
ल्पकरणंतन्निमित्तं शिल्पिरूपभर्त्रापिरणार्थमितित्यर्थः नचस्वयमेवास्त्रियागृहा
दिशिल्पार्थनयन्मूल्यंलब्धंतत्पचेत्माकथंनव्याख्यातमितिवाच्यंतस्यप्राप्तांशिल्पे
त्वयन्नित्यंप्रस्याचेवद्वेयेन्यतः भर्त्तुः स्वाम्यंभवेत्तत्रशेषस्तस्त्रीधनंस्मृतामित्यनेनेव

धनत्वनिरासात् बंधुदत्तमिमितिवचनस्यप्रकरणात्स्त्रीधनविषयत्वादितिअ
न्यथाव्याख्याभर्त्रादिप्रेरणार्थमितितत्संकोचः कथंशुल्कः शून्यस्येवशुल्कत्वात् अतआहतदे
वेति व्यासोक्तंमेतिवासमुच्चयेतद्वेति एतेनवक्ष्यमाणासुरादिविवाहप्राप्तशुल्कपरत्वाभावमस्य
सूचितंवंडश्वरादिपुरस्कृतंप्राचीनमतंदूषयति. नपुनरिति आसुरादिमात्रेतितथात्वासुरादस्यादि
सूचितंवंडश्वरादिपुरस्कृतंप्राचीनमतंदूषयति शुल्कंनेतरयोरित्युक्तार्थत्वेप्रमाणमा
नाराक्षसपैशाचग्रहणासंभवतमितिभावः आसुरमात्रेशुल्कंनेतरयोरित्युक्तार्थत्वेप्रमाणमा
द् यथोक्तमिति शुल्कसाहचर्यादासुरादरात्रिषुयद्बंधुधनंतदेवभ्रातृगामीनियमत्केश्चिदुक्तंत
दपिदूषयतिअतइतिराक्षसादाविपातिनापेराचपरिग्रहः तथात्वतयोः शुल्काभावात्तत्साहचर्येण
तदुभयसंबंधिधनस्यभ्रातृगामित्वाभिधानंअसंगतमित्यादेयमित्यर्थः अथादिपदमपहायआ
सुरएवेति वक्तव्यमित्यतआहतथेति उपलक्षणमिति कन्यार्थंदत्तमात्रोपलक्षणमित्यर्थः
शुल्कसाहचर्यादिति यदुक्तंतस्यराक्षसादावादिपदग्राह्येशुल्काभावदोषेणास्यनेभ्रातृधनापुनरासुर
शुल्कसाहचर्यादिति यदुक्तंतस्यराक्षसादावादिपदग्राह्येशुल्काभावदोषेणास्यति अतइति यतः शुल्केकन्यादारेनकन्या
दिसुरमात्रेपिबंधुदत्तादिधनंशुल्कसाहचर्यभ्रातृगामीतिमतंनिरस्यति अतइति

Indira Gandhi National
Centre for the Arts

दायभागटी॰ ~~कृतेषु~~ याअतदूत्यर्थः किंतु जे तिगहोस्कारेइत्यादिनायदानेतुमित्यादिनाचाके त्यर्थ एषुशुल्कपरिभा
॥५०॥ षायाअथतदेवप्रयोजनं प्रयोजनांतरस्यादृष्टत्वादिसपिवोध्यं वाक्यादिति बंधुदत्तमित्यादवाक्यादित्यर्थः
विशेषाश्रवणात् आसुरादिविशेषाश्रवणात् कात्यायनसमानार्थमितिपितृभ्यांचेवयद्दत्तमि
त्यादिकात्यायनसमार्थः ~~कि~~ गोतमवचनमाह भगिनीशुल्कमिति अत्रशुल्कपदेनपारिभा
षिकशुल्कस्यैवग्रहणंशास्त्रीयपरिभाषाया अंतरंगत्वेनशीघ्रोपस्थितित्वात् नतुमूलरूपस्येति
भावः परमतमितिसोदरानंतरंपितुः तदनंतरंमातुरितिपरमतमित्यर्थः स्वमतमुपसंहरति अतःप्र
थममिति एषांभ्रातृमातृपितृणांबंधुदत्तंमातापितृदत्तंभ्रातृभावेभ्रातृभावएव पित्रोःपित्रो
रधिकारात् तयोरेवाप्रकृत्या भावेभर्त्रधिकारे तदभावस्य दंडापूपन्यायात्प्रसिद्धत्वादिति
भावः औरसपदेनेतिविशेषणीभूतलिंगपरित्यागेनकन्यापुत्रयोर्द्वयोरेवप्रकृत्यर्थत्वादिति
भावः लिंगपरित्यागेहेतुमाह तयोरिति तथाचालिंगस्यविवक्षणेपुत्रानंतरकन्याधिकार
विधिरोधेःस्यादितिभावः सपत्नीपुत्रस्येति एतद्दत्त्रिमादेरप्युपलक्षणंतद्भगिन्याअपीतिवोध्यं ~~स्या~~

अस्याअपिस्वपुत्रद्वारेणभ्रात्रादिपुरुषत्रयपिंडदातृत्वात् सपत्नीपुत्रस्याभावेदौहित्रस्याधिका
रितेति अयुक्तमेतत् दौहित्रस्योपादिष्टप्रजात्वेनस्वभोग्यभर्तृपिंडदत्वेनच प्रागधिकारस्यैवोचि
तत्वात् वंध्याविधवादुहितृसत्वेपिप्रागदौहित्राधिकारस्योक्तत्वात् अत्रऔरसपुत्रकन्ययोरित्यवि
शेषात्कन्यापदात्तद्भावेदौहित्राधिकारस्योक्त विरोधाच्चतस्मात्सपत्नीपुत्रवंध्याविधवादुहितृ
णांप्रयुक्तोदौहित्राधिकारइतिबोध्यं अतएवतत्सुतइत्यत्रापिपाठक्रमोनग्राह्यः पौत्रस्यवंध्यादिदु
हितृसपत्नीपुत्रादौहित्रेभ्योऽपीत्युक्तचनेप्रागधिकारस्योक्तत्वात्तनचदौहित्रएववंशे
सत्रवाशक्ताभ्यांजपधन्यत्वावगमात्वाचनिकएवसपत्नीपुत्रानंतरंदौहित्राधिकारइ
तिवाच्यंसुतपदस्यसपत्नीपुत्रपरतयाभिवंस्यात्तसैवसिद्धप्रमाणाभावात्तेनचैनंसपत्नीपुत्रस
त्वेपिभगिनीपुत्रस्याधिकारःस्यादितिचेदेतन्नाधोधिनापुपादानाभावात्तनत्वेपितर्हिकिं
नस्यात्नदृषितन्नाधिकारांतरंसहितायालिखनातेषामभावएवैषामधिकारइतिचे
त्तर्हिपुत्राद्यनंतरस्यापिसुतरांप्राप्तेरनधिकमौरसाधुपादानंतस्मादौरसादिपदंपूर्वपूर्वाधिकारिमात्रोपलक्ष
णंतेषामधिकारक्रमस्यवचनांतरेणैवप्राप्तेस्ताश्चानुचतेषामनंतरंभगिनीपुत्रादिनामधिकारएव

Indira Gandhi National
Centre for the Arts

विकेरह स्याक्षिव चनभित्तिरम्यं मर्तृ भार्याताना मभाव इत्यादि नो तु मुप संहरति तर्हि षामिति

दायभागटी. दौहित्री तस्य स्वजायाम श्वसुरभ्रातृ श्वशुरादिवगणानान्तु तेषु सत्सु इत्युक्तं वस्तुवत्तमिति

५१ पकारक स्वरूपं वस्तुवत्तमित्यर्थः तद्रूपवस्तुवत्तस्य धनहरणप्रयोजकत्वे मानमाह त्र

५२ त्रयाणामिति अधिक्रियते अधिकारी भवति ~~नतु~~स्वश्रयः पित्रादित्रयपिंड

दाताभर्तृभागिनेयश्वश्वशुरादीनांत्रयपिंडदातातथाचतुल्यपिंडदातृत्वे कथं

भागिनेयस्यस्वस्त्रीवाध्यतादृत्यत आह पुत्रादिति पुत्रत्वातिदेशेन पुत्रदेय

पिंडत्रयदातृत्वेन चस्वस्त्रीयस्य पुत्रस्थान पातिता भर्तृदेयपिंडत्रयदातृत्वेन

भागिनेयस्य भर्तृस्थानपातितेत्यर्थः तथा च न्यायबलेनैव भर्तृभागिनेयस्य स्व

स्त्रीयवाध्यतेतिभावः न च नाथाप्रदिशानेति उक्तमनुयाज्ञवल्क्ययोस्तात्पर्यार्थाप

रिज्ञानकृतमित्यर्थः व्यवहारः स्वस्त्रीयाधात्वितिपाठक्रमेणाधिकारव्यवहारः प्रमाणप

रतंत्रे प्रमाणैकसापेक्षः अतंत्रे अप्रयोजकं प्रमाणं मितियावत् अत्राय स्त्रीधनाधि

कारक्रमनिर्णय तत्र कन्याधने प्रथमं सोदरभ्रातुस्तदभावे मातुः तदभावे पितुरधिका

तदभावे पितुरेधिकारः। वरदत्ता त्रिस्कि वाग्दत्त धनेष्वेवं वरदत्तधने वरस्याधिकार इति ऊढा

यायौतुके प्रथमं कुमारि तदभावे वाग्दत्ताधिकारिणी। एतयोरभावे ऊढायाः पुत्रवती सं

भावितपुत्रयोर्युगपदधिकारः। एकस्याभावे चापरस्याः एतयोरभावे वंध्या विधवयो

स्तुल्याधिकारः इति विशेषः ततो ब्राह्म्यादि विवाहपंचकसमयलब्धयौतुकधने भर्ता

भ्रातामातेति क्रमः। आसुरादि विवाहत्रयसमयलब्धयौतुके माता पिता भ्राता

भर्तेति क्रमः तद्दत्ता देवरः ततो देवरपुत्रभ्रातृश्वशुरपुत्रौ ततो भगिनीपुत्रः ततो भर्तृ

भागिनेयः ततो भ्रातृपुत्र ततो जामाता ततः श्वशुरः। तत आनंतर्यक्रमेण सपिंडाः त

तो सकुल्याः ततः समानोदका इति यौतुकातिरिक्ते पितृदत्ते प्रथमं कुमारी ततः पुत्रवती

संभावितपुत्रे ततः पौत्रदौहित्रसपत्निपुत्रपौत्रप्रपौत्राः ततो वंध्याविधवायुगपदधिका

रिण्यौ ततो ब्राह्मणादिक्रमेण पूर्ववत्क्रमः पितृदत्तातिरिक्ते यौतुकधने तु पुत्रकुमार्यौ

Indira Gandhi National
Centre for the Arts

दायभागे दीपदधिकारः तयोरभावे पुत्रवती संभावितपुत्रा या। ततः पौत्रदौहित्र सपत्नीपुत्रपौत्रप्र
॥५३॥ पौत्राः क्रमेणाऽधिकारिणः ततो वंध्याविधवा च युगपदधिकारिण्यौ ततः पूर्वो वंध्यात्राधिका
रक्रम इति अथ दायभागनिरूपणीयइतिप्रतिज्ञायामम्माधिकारिनिरूपणमप्रस्तुतम
त आह तत्समर्युदासेनेति तथा च तदभिन्नाधिकारिकतया दायभागनिरूपणे तदपि प्रकृतम
वेति भावः। ज्येष्ठपीतिप्रतिपादयतीत्यनेनान्वयः वाननतन्नाम्नानिबंधकारेणेत्यर्थः भिन्नो
दकीकृतइति पातित्यादिदोषेणयेन सह एकमुदकं नापायातव्यमहराननर्हइति यावत् उत्तम
र्णाधमर्णेभ्य इति धर्मपरायेनिर्देशः उक्तमानादेवपितृणांअधमानांकीटादीनां ऋणमव
श्यतारणीयत्वेन ऋणतुल्यं तेभ्य इत्यर्थः। बहुवचनं तु व्यक्तिभेदात् असंस्कृतोऽनुपनीतः।
महाफलश्रुतेरित्यनंतरं महाविष्टनिवारणश्रुतेरित्यपि बोध्यं तेनोक्तं पुन्नाम नरकत्रैयास्य
पुत्रकर्तृकत्वाभावेपि नक्षतिः विकर्मस्थाः और्द्धदेहिकस्य कर्मणो विरोधीनियानिकर्माण्य



गम्यागमनादीनि तत्कारिण इत्यर्थः। जातपदमिति जन्मार्थकं जातिपदमित्यर्थः। तेन ज
न्मानुजन्मबधिरावित्यर्थः तत्कृतइति तैर्यातित्यानंतरं उत्पादितसुत इत्यर्थः यद्यपि पतितपुत्रस्या
पि पतितत्वमेव तथापि तस्य पृथगुपादानं तदितरेषां क्लीबादिपुत्राणां अंशित्वज्ञापनार्थ
मिति नच पातित्यानंतरोत्पन्नपतितपुत्रस्य पतितत्वेनैव प्राप्तेस्तत्सुतइति प्रागुत्पन्नपतित
पुत्रसंग्रहार्थमित्येव किं न स्यादिति वाच्यं क्लीबादिपुत्राणामितरस्यापि निर्दोषत्वाद्विभाग्दता
यान्याय्यत्वात् विशेषस्य वाचनिकत्वे चादृष्टार्थकल्पनागौरवापत्तेः। अचिकित्स्यरोगार्तइ
ति श्रुतेर्यदि विगानंतरमौषधादिनारोगनिवृत्तिस्सादा तस्याप्यंशित्वमेवेति प्रतिपत्तव्यं अ
सवर्णजातापीति उत्तमवर्णेनाधमवर्णायामुत्पादितापीत्यर्थः प्रतिलोमेति हीनवर्णेनोत्तमवर्णा
यामुत्पादितो नत्वंशविभागापीत्यर्थः स्वपित्र्यमिति यदा बंधुभिः स्वपित्र्यमेव धनं प्राप्तं न तु
तत्पितृधनं प्राप्तं तदा तद्ग्रासाच्छादनं राज्ञा बांधवा यद्दापनीयाः अपित्र्यामिति पाठे प्रतिलो

Indira Gandhi National
Centre for the Arts

दायभागटी॰ मजस्यनापित्रसंबंधीतिसएवार्थः।तथाचप्रातिलोमजायग्यासाच्छादनंबंधुभिस्तस्मी
॥५७॥ त्वधनप्राप्तावेवदेयंनान्यथेत्यर्थः क्लीबादेर्दारपरिग्रहासंभवात्कथंपुत्रसंभवइत्याशंका
मपनयितुमाह अस्तुचेतितथासंभवेतिमूकादेरौरसस्यक्षेत्रजस्यक्लीबस्यक्षेत्रजमात्रस्य
संभवइतिस्वापित्र्यनुसारेणेतिस्वपितुर्ब्राह्मणीपुत्रक्षत्रियापुत्रत्वादिनायादृशोभागस्तादृश
भागहारिणइत्यर्थः यावज्जीवमितिभर्त्तव्याइतिपूर्वेणान्वयः भर्त्तस्वात्कृतेतितेनतासां
विवाहोपिअवश्यंकारयितव्यमितिप्रतिपन्नसंप्रतिक्लीबादिभिन्नत्वेनाधिकारिनिरूप
णांतरमित्यर्थः पैतामहेचेतिसंबंधिधनमात्रोपलक्षणंसाधारणधनद्वारेणेतिशरीर
श्रमसाधारस्यनापिबाध्यंतथैववक्ष्यमाणत्वात्स्वीयस्वधनश्रममात्रार्जितंअसाधार
णंभ्रात्रंतरैरविभाज्यमनुविद्यालब्धस्यपृथगुपादानव्यर्थंअनाश्रियेतिसामान्या
भिधानेनतस्यापिप्राप्तेरतस्तद्योजनमाहस्वशक्तिप्राप्तस्यापीतिनिराकरणार्थमि

तितथाचविद्यालब्धस्यन्यूनविद्याविद्यैर्न्नविभागः तदन्येषांतुतथाविधानांकेनापिस
हनविभागइतिभागस्यद्वैविध्येनएकविधाभावात्तस्यपृथगुपान्यासइतिभावः॥
नचसाधारणधनसंबंधेनापिविद्यार्जितविभागनिषेधार्थएवाकिंनस्यादितिवाच्य
वैद्योवैद्यायेतिवक्ष्यमाणवचनविरोधात् औद्वाहिकंजामात्रतयाश्वशुरादितोल
ब्धंतत्तस्यैवेत्येवकारात्न्यूनाविद्याव्यवच्छेदकः माधुपर्किकमार्त्विज्यलब्धंभार्याधि
नस्यस्त्रीधनरत्वाद्विभागाप्रसक्तेरन्यथाख्यातेष्टभार्यालब्धप्राप्तिकालेइतियतःसो
र्यंभार्याधनंविद्याधनेप्रमाणलब्धधनंचएतान्यविभाज्यानिअतएतानिहित्वाअ
न्यद्विभजेदितिवचनार्थंदर्शयतिएतानीतिअन्यद्विभजेदितिवचनेनास्तिकुतोवि
वृत्तमित्तउक्तंअनुवर्त्ततेअश्रुतोमूरवः विभ्रयादित्येकेतिइतरेनैरपेक्ष्येणाकर्तृत्वेस्यएक
वचनस्य वक्तुंसंभ्यातिभावः इतरनैरपेक्ष्येणसाधारणेनैरपेक्ष्यंतद्भ्रातुरसाधारणेनैरपे

Indira Gandhi National
Centre for the Arts

दायभागटीका।श्यंचतेनाश्रुताभ्यांद्वाभ्यांत्रिर्वाभरणेसर्वेषामेवतेषामंशित्वेतिसमाश्रित्येतिएतच्चभोजना
॥५५॥ च्छादनातिरिक्तधनाश्रयणपरंतदर्थंधनोपघातस्यगार्हस्थ्येतेनाप्यवश्यकर्तव्यत्वात्साधा
रणधनपरमितिअन्यथापितामहादिधनोपघातिविभागानुपपत्तिरितिभावः।अवेद्यायेति
विशेषणस्वरसलभ्यार्थमाहवेद्यायेतिएतस्यैवविवरणंविदुषेइतिविद्याधनमात्रेतितद
तिरिक्तस्वयमर्जितस्यतुविद्वद्भ्योऽविद्वद्भ्योवाअदेयत्वादितिभावःतत्राचरितमितिसह
दुश्चरितमित्यर्थः।उभाभ्यामितिसमविद्यस्तत्रविद्ययैवसाम्यावगतेरधिकेतत्रापिविद्ययैवा
धिक्यमवसीयतेनतुधर्मान्तरेणअनुपयोगापेक्षयाअध्याहारस्यकल्पनगौरवादितिभावः।। दि
तस्यैवउपघाताऽनुपघातार्जितत्वस्यैवप्रयोजकत्वात्विभागेउपघातार्जितत्वस्याविभागेचा
चानुपघातार्जितत्वस्यप्रयोजकत्वात्कल्पनीयांश्रुतिमाहउपघातार्जितमितिसोर्यादिप
दवतीउपघातेनसोर्यार्जितंविभजेदित्येवंरूपाश्रुतिकल्पनगौरवान्न्यायमूलत्वमाहयद्

तिधनसाधारण्येपव्यापारसाधारण्येवाभ्यंतरस्याविभागोक्तेसक्तनानायमेवव्यभिचारमाश
ङ्क्याहसितीतितथान्वायमुत्सर्गइतिभावः।विशेषवचनंचसमविद्याधिकेत्याद्युक्तमेवन्या
यश्चात्रउपघातार्जितेअर्जकस्यद्व्यंशित्वाभिधानात्अनुपघातेतदधिकस्यसर्वस्यैवग्रहणं
युक्तमित्येवंरूपःयस्ययावत्शतविभिन्नजातीयभ्रातृसाधारणधनोपघातार्जितंब्राह्मणः
स्वपुत्रस्यचतुर्णामंशानांचत्रिद्व्येकांशानामुपघातस्तत्रवास्वस्वांशसमसंख्यमेवतेषामंश
कल्पनमित्यर्थः।कात्यायनवचनेएकत्रप्रतिवासिनइतिश्रुतेरेकएवसएवनियामकोनसा
धारणधनार्जितत्वंतथाचकथंन्यायमूलत्वमित्याशंकास्यापिन्यायमूलत्वंव्यवस्थापयति
किंचेतिविभक्ताइतिएकत्रप्रतिवासिनोयदाविभक्तजेषुतदायतोस्मात्एकत्रप्रतिवासिनो
भ्रात्रादेरूरस्यःधनार्जनंसएनंविभागेद्व्यंशंलभतेइत्यर्थःद्व्यंशवार्जितएवकोद्व्यंशमर्हतीत्येक
मूलकत्वातइतरेषामेकैकोभागःएकैकस्येतिशेषःमुनेःकात्यायनस्यतेनैकत्रप्रतिवासित्वोक्ता

Indira Gandhi National
Centre for the Arts

स्वभागद्वी- साधारणधनोपघातेनह्यंशित्वस्य प्रतिपादितत्वात् अनुपघातार्जितेभागानभिधानात् व्याख्या
॥५६॥ तः स्वीकारस्यतेनतथैवस्फुटमाख्यातत्वात् अभिप्रायप्रकाशयति अनुघेपेतइति एवंचेदुपघा
तार्जिताभिप्रायकं चेत्तत्तथात्वह्यंशित्वअविभक्तविभागप्रागभावः। संसृष्टत्वविभागप्रध्वंसः ए
कत्रप्रतिवासस्याभिन्नधनसंबंधस्यननुबन्धनबलात्संसृष्टप्रतीतिस्तद्विरोधात्कुतोऽवि
भक्तकल्पनमतोवचनमन्यथोपपादयति साधारणेत्यादिनकेवलमित्यत्रहेतुमाह होलाके
तितथाचयथाहोलाकानुष्ठानार्थंहोलाकाकर्त्तव्येतिश्रुतिः कल्प्यातेनकर्तृबोधकप्राच्यादिपव
तीतथासाधारणधनोपघातेनार्जितेअर्जकोद्वंशग्रहणीयादिय्यवश्रुतिःकल्प्यतेनत्वर्जकवि
शेषणत्तयासंसृष्टपदवत्तीतिभावः तथापिरपदवैयर्थ्यरूपबाधकाभावात्सामान्यश्रुतिक
ल्पनास्तुसमतोतुतथात्वेविशेषणवैयर्थ्यमितिविशेषकारश्रुतिःकल्प्यतइत्यतआह किंचेति
किंत्वधिकमितिभागद्वयादधिकमित्यर्थः अधिकस्यैवद्वैविध्यमाह सर्वमेववेति किंचिद्दूषणमि

तिशेषः तदभावेभ्रात्रंतरभागनिर्गमहेतुत्वेनसाधारणधनोपघातभ्रात्रंतरव्यापारयोरभावेम
नुअर्जकोद्व्यंशमर्हतियेनचेपाउत्पादितस्यात्सद्व्यंशमेवहरेद्दित्यादौसामान्यतयावअर्जकत
याद्व्यंशएवार्जकस्यास्ता अतआहद्विवर्जयित्विति एतस्यएतदर्थकस्यअर्जकोद्व्यंशमर्हती
त्यादेर्न्यायमूलत्वंयत्रैकस्यधनद्वारेणपरस्यधनशरीराभ्यासाभ्यामित्यत्रयुक्तिमूलत्वअन्यथा
न्यासमूलत्वेनअर्जकत्वानुप्रवेशोवाइतिपितागृहितांशद्वयंस्वयमितिमूलश्रुतावर्जकविशेष
णप्रवेशइत्यर्थः नन्वेवंअर्जकःपिताद्व्यंशग्रहणीयात्इतिश्रुतौकल्पनेपीतुरनर्जकस्यद्व्यंशानु
पपत्तिरर्जकस्यभ्रात्रादेर्द्व्यंशानुपपत्तिश्चेत्यतआह पृथग्वेति पितृत्वादिरपेक्षःपृथगर्जकएवाधि
कारीकल्प्यस्यात् तथाचोभयथैवश्रुतिकल्पनेगौरवात् न्यायमूलत्वमेवयुक्तमितिभावः उपसंह
रतितस्मादिति ननुन्यायमूलत्वेअर्जकस्यव्यापारता[illegible]रतम्येनविभागतारतम्यंस्यात् तथा
चसामान्यतएवतस्यभागद्वयाभिधानमयुक्तमतोऽविभक्तार्जितेअर्जकस्यभागद्वयमितरे

Indira Gandhi National Centre for the Arts

।षांमेकैकोभागइतिसामान्यश्रुतिमनुत्वत्वमेवोचितंअर्जकद्वांशस्यअसत्त्वानुपघाताजितेपि
प्रतिग्रहधनेअविभक्ताजितत्वमात्रेसर्वेषामविभागोलोकेदृश्यतेइतिश्रीकरमतमुत्थापयति
किंचविभक्तस्यादिसोर्याद्धिधनेअनुपघातार्जितसोर्यादिधनेत्यर्थः।संबध्यतेइति विद्याधनेतु
यद्धस्येति प्रागवचनोक्तधनेविद्यापिसंबध्यतेइत्यर्थः।विद्या विद्यायेति प्रागुक्तवचनेपेत्यद्वयं
समाश्रित्यनचेति तेनतदर्जितमितिश्रुतेरत्रापितदेकवाक्यतयाविद्याधनेप्यनुपघातान्वये
इतिभावः।क्रमादभ्यागतामिति।क्रमादागतामित्यर्थः।एतच्चसाधारणमात्रोपलक्षणंते
नभ्रातॄणांस्वार्जितधनेपि।यच्चवक्ष्याउक्तरेहिस्यकवचनेनान्येषांयौकोव्यापारस्याभाव
उक्तः याद्दृशेतिसवर्णाब्राह्मणादयश्चत्वारोवर्णास्तरलानानावष्टकरणादयःसंकीर्णजाता
रथकारादयःसर्वमेवेति अनुपघातार्जितसर्वमेवेत्यर्थः।निर्विषयो विधिरस्तिअनुपघाते
नसोर्याद्यर्जिततत्त्वहुनेतरद्विभक्तार्जितंविभजेद्धिति विधिर्भवद्भिमतःसचनिर्विषयःश्रा

।द्दृशमप्राप्तविषयंप्राप्यविधित्वंतादृशविषयशून्यःअत्रहेतुस्तादितरस्याभावादितिश्रा
यप्राप्तेतरस्याभावादित्यर्थः।उपघातार्जितविभागस्यतुन्यायत एवप्राप्तत्वमितिभा
वः।नन्वविक्तेभलक्ष्यमिपरकोस्तिविषयःकृपयाउदासीनदत्तंआदायकोवर्ततेएतया
श्चासाधारणव्यापारार्जितत्वेनतद्विभागस्यान्यायादप्राप्तेरितितत्कथमनेविषय
त्वमित्याशंकते अथेति स्वपदाद्विशेषरूपेणस्वबोधकपदान्नतुसोर्यादिनि नत्वनु
पघातेनसौर्याद्यर्जिततराविभक्तार्जितधनत्वयेत्यर्थः।बहुतरस्येति पदार्थस्यवाक्यार्थ
तयावाक्यघटकपदार्थानामुपस्थितौतदन्वितान्वयक्रमेणप्रकृतोपस्थितिरितिवि
लंबोपस्थितिकत्वादित्यर्थः।इत्थमुपलक्षणपदार्थोपस्थित्यादिकल्पनागौरवमपिद्रष्ट
व्यं बालप्रलपितमिति विद्याधनेतरद्विभजेत्सोर्यधनेतरद्विभजेदित्यादिप्रत्येका
भिधानेकस्मादप्यभिधानान्नविभज्यतावच्छेदकस्यउक्ततावद्धनेतराविभक्तार्जितध

Indira Gandhi National
Centre for the Arts

नत्वस्यापरिन्वाय:। तथाचतादृशधनविभागस्यप्रकृतस्याप्रतिपादकत्वयानिरर्थक
त्वेनवानप्रलापतुल्यत्वात् बालप्रलपितमित्यर्थः मन्यतेआनुपघातार्जनंयत्रयत्र
धनसंभवतितत्तदुदाहरणार्थत्वेननानर्थकमित्याह प्रदर्शनार्थत्वमितिअथात्राने
।प्रपएवनपर्युदास:।इत्येकानांसर्वकीर्त्तनेपिनक्षतिरित्यतआह किंचेतीतिचूडामणि:।त
न्वाकाभेद[illegible]कत्वनादिगोत्वापत्ते:।पर्युदासस्यैवन्याय्यत्वात् कितपघाताभावेविभागाभा
वइतिप्रागुक्ते: युक्त्यन्तरमाह किंचेति अविभक्तानामपीति।अविशेषेणवचनस्यविभक्तावि
भक्तविषयत्वादित्याशय:अपर्वत्वेनपर्वलेशसंबधलेशशून्यत्वेनपितृव्यविनाशासंभव
दर्शयतिद्रव्यंहीतिआनमनंसंतोष: एकेहायस्याद्विकमितिअरुणयाएकहायन्यादिगा
व्यासोमंक्रीणातिइत्यत्रविक्रेतुवशीकरणद्वाराग्यथेकहानीमत्यतउक्तकर्मोपयोगिनीत
त्वादित्यर्थ:आदिनावाससाक्रीणातीत्युक्तवाससःपरिग्रह:शरीरधारणमंतरा प्रकृतक

---

मंणइतिशेष: अतएवदूषयति प्रतिग्रहस्यचेति नचवाससोगोविकल्पकत्वंविषमशिष्टत्वा
त् तथाचवासोविषमशिष्टायाएकस्याएवगोःक्रमणसाधनत्वात् एथकूक्रयासाध
नस्यवासम:क्रयमादिपदग्राह्यत्वंवाससोसोमंक्रीणातीतिपृथग्वाक्यबलेनवासोविशि
ष्टगवात्क्रेयेप्राशस्त्यावगमात् प्रशस्तक्रयेवासोविशिष्टायाद्गोरादिपदग्राह्यत्वसंभवात्
स्य पण्यान्तरक्रयमौल्ययोक्तसुवर्णादिपदग्राह्यपसोत्वभ्याच्च पयोव्रतादिकमवाप्त दीर्घकाली
नज्योतिष्टोमादौपय:पानंब्राह्मणस्येत्यनेनाभिहितंक्षीरभोजनादिकयथाशरीरणद्वारा
युज्यतेनत्वाद्दीत्यर्थ:।द्रव्यं क्रमेणदूषयति तत्वेत्यादि प्रतिग्रहस्येत्यादिच दीर्घकालीनइतिसो
तिष्टोमस्यानेकाहायनसाध्यत्वाच्छरीरधारणार्थयागकर्तृर्यथाभोजनमपेक्षितं श्रोतेप्रवृ
त्तेनेतिव्यक्तिरेकदृष्टांत:उपहारप्रदानादिनापारितोषिकद्रव्यदानादिनाउपदानानीतिपाठे
उत्कोचदानादिनेत्यर्थ: कसोचेति तनसेवयावहुतरकालसाध्यत्वात् शरीरधारधारणार्थमपि

धनोपघातः क्वाचित्कइत्युक्तं अनुपगमेति अनुपगमउपसर्पणं तेनान्वियते दीयतेइत्यन्वयः तथा
चोक्तं कृतेतु दीयते गत्वा त्रेतायामाहूतायवे द्वापरे याचमानाय कलौत्वनुगमान्वितइति स्थिरा
वस्थितेरिति चिरावस्थितेरपि प्रतिग्रहादर्शनाद्दानतेर्व्यभिचारान्नकारणताइत्यर्थः आनतिहा
रणाआनतिआनतिद्वारेणैव नतुस्वातंत्र्येण तेनानतेर्व्यभिचार इतिभावः चिराश्रयणादीनामि
त्यादिना धनदानगुणानुसंबंधान्वयोः परिग्रहः ननु चिराश्रयणादीनां परस्परव्यभिचारेणाक
थमानतिकारणत्वमत आह पुरुषाशयेति पुरुषाशयस्यभावस्यानतिरूपस्यवैचित्र्येणेत्यर्थः
तथाचानतिगतवैजात्यव्याप्तानां प्रत्येकस्य चिराश्रयणादीनामेकैकस्य कार्यतावच्छेदकत्वा
न्नव्यभिचारइतिभावः वस्तुतस्तेषामेकशक्तिमत्त्वेन कारणत्वं तेनानतिगतवैजात्यकल्पनेनष्ट
तिरितिबोध्यं दर्शनादितिआनतेरितिशेषः ननु तथाप्यन्वयव्यभिचारः सत्यपि चिराश्रयणादौकस्यचि
दननुत्यादादत आह सहकार्यैति पुरुषाशयविशेषः सहकारी तदभावात्तत्रनानतेरितिनव्यभिचारइति

भावः केचित्तु ननु सत्यामप्यानतौ कश्चित्प्रतिग्रहं प्राप्याकथमानतिः प्रतिग्रहकारणत्वमत आह
सहकार्यैतीत्याहुः अनियतोपायेति परस्परनिरपेक्षनानोपायसाध्यत्वादित्यर्थः तेनैकशक्ति
सत्वाद्वैतासां द्वाकार्यकारणभावेतिभावः श्रीकरणैव प्रतिग्रहेपकरणांतरेणापि स्वद्रव्यापघा
तमावदिति यत्त्वातिबाधमुपन्यस्यनिबासितं तदपि दूषयितुमाह यदप्युक्तमिति निष्पादय
तीत्यंतं यदप्युक्तमित्यर्थः तस्यां स्थितौ प्रतिग्राहस्य वधिमदाह संनिधौ स्थितो प्रमाणतया
परस्परबाउक्तमर्थं प्रतिबंधिमुखेन स्वीकारो दूषयति तदस्यादिहियते इत्यंतेन उपकारकत्व
पिनातरियदीधयाउपकारकत्वेपित्वृथ्यर्थत्वादिति तथाच पुरुषार्थत्वपुरुषोद्देश्य प्रयत्नस्यफ
लसाधनत्वं क्रत्वर्थत्वं क्रतूद्देश्यकत्वमिति नत्वेवं भोजनस्य क्रतर्थत्वं क्रतूपद्देश्यकत्वाभावादि
क. तिभावः ऐदमर्थ्य इदमर्थत्वं क्रतूद्देश्यकत्वइतियावत् ननु तदुपकारकत्वमेव तदुद्देश्यकत्वे प्रमाणं
अतआह उपकारकत्वेतिव्यभिचारादिति अन्यावलोकनार्थं नीदीतदीपादलोअन्यालोकनादि

Indira Gandhi National
Centre for the Arts

दायभा०टी०
॥६०॥

व्यभिचारादित्यर्थः अत एवेति यत उपकारकत्वेपि न तदर्थत्वं अत एवेत्यर्थः पर्यनुयोगस्य दोषा
ज्ञावनस्य हेत्वंतरमाह यत इति केचित्तु अत एव वक्ष्यमाणो हेतोरेवेतमाहुः यतस्याहुः यत इति विशे
षणार्थकाघातोहेतोरित्यर्थः ननु भक्षणादित्यादि पदद्वयस्यानानुगमः आच्छादनमात्रस्यादि पद
ग्राह्यत्वेपि यत्र बहुतरव्ययेनौषधमुत्पाद्यतद्भक्षणेन नदीपर्वतलंघनेन महिम्ना बहुतर धनमर्जि
तं तस्याविभाज्यता स्यादत आह किंचेति तादर्थ्यमेवेति तथा चोपकारकत्वस्य प्रामाणिकत्वेना
पहन्तयितुमशक्यत्वात् तादर्थ्येनोपघातस्य विशेषणमिति भावः एतेनानुपघ्नन् पितृद्रव्य
मित्यादि रघुनंदनोक्तमेतेन धनोपघातं विना यदर्जितमित्येवार्थ इति बोध्यं अत्र वृद्धसंमतिमाह अ
मित्यादि रघुनंदनोक्तमेते न धनोपघातं विना यदर्जितमित्येवार्थः इति बोध्यं अत्र वृद्धसंमतिमाह
एवेति यतस्तादर्थ्यं विवक्षितं नोपकारकत्वमत एवेत्यर्थः दत्तस्यनेनतादर्थ्यं व्यक्तमेवं तेनाभिहित
मितिभावः अयमपि लोकार संवाद दर्शयति अत एवेति पुत्रोपनयेति व्रतभिक्षा ब्रह्मचर्य भिक्षा आ
दिना मावर्त्तनोत्तर राजप्रसाद लब्धा भिक्षा परिग्रहः तथा चोक्तं आत्वतानां गुरुकुलात् विप्राणां

प्रज्ञको भवेत् नृपाणामक्षये हेषविधिर्ब्राह्मो विधीयते वैवाहिकस्य विवाहे श्वशुरादितो लब्ध
स्य तत्रापि धनव्ययस्य कथं धनार्थत्वमत आह धनप्रेरस्योति उपसंहरति तस्मादिति असाधारण
शरीराद्यासाभ्यांयदर्जितं तदविभाज्यत्वापि प्राक् स्वयमभिहितो द्वयसंवादमप्याह जितं द्वियेणापी
तितदुक्तमाह तस्येति असाधारणोपायार्जितं साधारणधनानुपघातेन स्वयंवार्जितं उपव्यस्त
विद्याधनादिकमिति शेषः एतेषु प्रायेण साधारण्यसंभवादिति भावः एवंविधमेव विद्याशौर्यादि
लब्धमेव साधारणधनमपीति साधारणधनसमुत्थं एवंविधमपि साधारणमेवेति अथ वा शब्दया
वैपरीत्येन योजना कार्या अन्यथा क्रमागतस्यापि साधारणत्वेन एवं विधमेव साधारणमिति
त्तियथाश्रुतासंगते सुखावबोधार्थं विशेषरूपेणाशीर्घ बोधार्थं अर्थसाधारण्येति यथा साधार
णं समाश्रित्येत्यादि व्यापार साधारण्यं यथा अविद्यानां तु सर्वमीहते श्रेष्ठं न भवेत् समस्तत्र विभा
गः स्यात् अपित्र्यइतिधारणा इत्यादि संबंध साधारण्यं ऊढं पितुश्च मातुश्च इत्यादि इत्थं चामुकपुत्रत्वपुत्र

Indira Gandhi National
Centre for the Arts

त्वपुरस्कारेणैकस्मै दत्तं तत्र सर्वेषामेव तत्पुत्राणामधिकार इति प्रतिपन्नं प्रदर्शितं मुनिभिरिति शेष इत्यनेनेति किमस्यायुक्तमिति पूर्वेणान्वयः उक्तार्थसंवादान्तरमाह बालकेनापीति विद्यादिना लब्धे साधारणानुपघातेन इतरव्यापारैरनपेक्षेण चार्जिते ननु भ्रातृस्नेहेन यो हृष्टबुद्ध्या वादानेन नाधिकस्य संभवात् कथं समतया प्रतिनियतो विभाग इत्यत आह यद्वेति विद्याविशेषेति विद्यार्जितधनस्य यो विशेषः समाधिकार विद्याभ्यां विभाज्यलरूपस्तत्कृतो यं विभाग इत्यजातदंतद इत्यर्थः ज्येष्ठं पिगच्छतीति निरपेक्षश्रुतिबलात् ज्येष्ठ एवासाधारणधनश्रमाभ्यां अर्जयतीत्यर्थः पितापुत्रवदवस्थानादिति पितृपरमानंतरमिति शेषः वचनस्य पितृपरमप्रकरणीयत्वात् ज्येष्ठधनेन तु मध्यमार्जितधनेन ननु सामान्यात् वचनस्य पितापुत्रवदवस्थानविषयत्वे किं प्रमाणमत आह एतच्चेति पितरि प्रेते इति अनेन पितरि जीवति ज्येष्ठस्यासाधारणार्जितेन कनिष्ठानां भाग इति प्रतिपादनात् पितृपरमानंतर्यलाभः ज्येष्ठ इति यवीयसामित्येताभ्यामुत्तरवचने पितापुत्रवदवस्थितो ज्येष्ठयवीयःप

दप्रयोगात् अत्रापि ज्येष्ठयवीयःपदप्रयोगात् पितापुत्रवदवस्थानलाभः विद्यानुपालिन इति तेन विदुषामेवेति सिद्धं आनर्थक्यात् असाधारणार्जितस्यापि विद्याधनस्य समविद्याधिकविद्ययोर्विभाज्यत्वमुक्तं एतच्च विद्याधनं किमित्याकांक्षायां तन्निरूपणार्थमाह तत्रेति तत्रेतेषु विभाज्यमानेषु अत्रेति पाठे अस्मिन्नवसर इति वार्थः उपन्यस्तेनेति एतत्सर्वं स्वयमेव व्याख्यास्यति मूल्यादिति साधारणस्वर्णादिकमादाय कुंडलादिकं निर्माय स्वर्णादिमूल्यात् शिल्पगुणेन यदधिकं मूल्यं स्यात्तद्विद्याधनमित्यर्थः विद्ययेति विद्यातिशयेन पण्येन दूतसर्वं कृपण्लधं इत्यर्थः वचनार्थान् क्रमेणान्वयात् इत्यादि उपन्यासं निस्तीर्य भद्रकमुपन्यस्य स्वज्ञानसंशनादिना नाभिधास्यमानप्रतिग्रहधनेन पौनरुक्त्यमपाकर्तुमाशंक्याह दक्षिणयेति न प्रतिग्रहत्वेन लब्धं धनं प्रश्ननिस्तीर्णं प्रश्नस्य सम्यगुत्तरे दत्ते एषां प्रश्नादित्यस्य व्याख्या संदिग्धप्रश्नेति व्याचष्टे तथा याद्यास्मिन्निति अत्रैव विकल्पेन व्याख्यांतरमाह वादिनो वेति स्वज्ञानसंशनादिति व्याचष्टे

Indira Gandhi National Centre for the Arts

हस्यभागटी ॥६२॥

तथाशास्त्रादष्विति वादादित्यस्यार्थकमाह तथाद्वयोरिति निर्जीसएककोटिव्यवस्थापनेनवि वाद्यमपनीयलब्ध वादिपणितराज्ञो वासोपदद्त्तमित्यर्थः अध्यापनादिलिप्याचएतथैकामि निलिष्विमेष्वपीत्यस्यार्थमाह तथाशिल्पादिलब्धं शिल्पगुरोनयदधिकलब्धंसर्वानुकमाह तदयमिति तर्हिएतदेवमुनेरभिधानमुचितं किंचित्स्वरेणेत्यतआह प्रदर्शनार्थमिति अ नुपघातार्जितविद्याधनोदाहरणार्थमित्यर्थः श्रीकरएदिति अविभक्तार्जितत्वमात्रेणैवावि भज्यत्वमितितेषां भ्रमः विद्याधनमेवेति तेनानकस्यपरेषां तथाविधभ्रमस्यनिरसार्थमित्यर्थः अतइतिकात्यायनेनविद्याधनस्यम ध्येपठितत्वादित्यर्थः विद्याधनमेवेति तेना त्रसमाधि कविद्ययोरवभागेनतरषामितिभावः प्रतिग्रहस्ययौगिकत्वमाह विषयेवेतिप्रमाणमाह तथा यमइतिधर्मयुक्तः नित्यनैमित्तिकस्वधर्मत्यागीप्रशांतः स्वल्पलाभेनापिपीडितोपिसमर्थः सन् तथापीडापरसुखः दांत इंद्रियादिदमनशीलः कृतज्ञः प्रत्युपकारेसयत्नः वृत्तिग्लानः शीलो

च्छादिवृत्तिः स्वहीनोवागोहितो गोग्रासाहर्त्ता शरणेप्याव्याघ्रादितोदुर्गात्त्रपरित्रायकः आह इत्याहुः तदुअतेउक्तवचनदर्शनेनकात्यायनवचनदर्शनेनविद्ज्ञानेइतितेनशिल्पप्राप्तादि लब्धस्यापिग्रहणमित्युक्तं संकीर्णत्वमितिसंकीर्णत्वभेदः तथाहियाजनस्यविद्याधनत्वेवि विद्याधनत्वेयवार्त्तिज्यकरणात् एमेवेध्यापनप्रतिग्रहयोरपि तित्रयाणमेवाविद्याधनत्वे नपरस्परंभेदाभावइतिश्रीकराशयः संकीर्णानामिति तथाचयाजनादीनांविद्याधन त्वाविशेषपियाजनत्वादिपरस्परभेदसत्वात्संकीर्णत्वमितिभावः गोत्वेपियथानीलक पीत गौव्यक्तीनां गोत्त्वाविशेषेपि परस्परसंकीर्णत्वविशेषरूपेणभेदसत्वात्तद्वदस्य र्थः अतएवसामान्यरूपाणामपिविशेषत्वाभेदसत्वेदेवकथमिति केनापिप्रकारेणवि भेतित्यर्थः पक्षग्रहणानितिपूर्वपक्षग्रहणमात्रेणेत्यर्थः तदभिधानसंकीर्णत्वाभिधानंहेय मिति यतः पूर्वपक्षवचनंनतुसिद्धांतवचनंतत् अतोहेयमित्यर्थः यद्वापक्षग्रहणमात्रेण

Indira Gandhi National
Centre for the Arts

दायभागटीका ॥६३॥

याजनादिना अर्जकस्यपक्षग्रहणमात्रेण आपातमुखेनयाजनादिधने विद्याधनेवि
द्याधनत्वानिविवुनतस्त्रसमाधिकाविषयो भोगनिरासात् तत्पक्षग्रहणस्यस्फुटत्वात्
तदभिधानंपक्षाश्रितस्तदभिधानं अतोदृयमित्यर्थः संशयमारूह्य उक्तदसेमेवनाविषयम्
रणमप्यंगीकृत्यतत्रलब्धतस्मिन्प्रसादेसतिलब्धतत् ध्वजाहृतमिति यद्यप्येतस्यापिसोर्य
धनत्वेनैव अविभाज्यस्यसिद्धेः पृथग्विधानंव्यर्थं तथापिध्वजाहृतपरिभाषायायुसादनार्थ
मवेत्तद्वचनारंभइतिबोध्यं भार्याप्राप्तिकालइतिउपलक्षणमेतत् जामात्रलपुरस्कारेनल
न्यदापिलब्धं बोध्यं अंगयोजितमितितेनविक्रियवस्त्राभरणंत्रयाणमुद्ध्यमन्वयीतिवृह
स्पतिवचनमेतद्याप्तिरि कृवस्त्रपरं बहुमत्यपरमित्यन्ये प्रचारोपयुक्तेतेनयावद्धि
र्यस्यनिर्वाहस्तेनतावत्स्ययोविह्या मन्तन्नितुतत्रसमांशनियमइतिभावः एकास्त्रीकार्य
तकर्मयथांशेनगृहेगृहेइतिवृहस्पतिनादासीविभागोवहुदासीष्यितिक्ताइतिरण्येति

तथापिसर्वेषामेवव्यावहारिकेवस्तुषुप्रत्येकेनयत्तुलुल्यमल्पेषुवस्त्रावचकारादि
षुवसत्सुयद्यस्यतत्तस्यैवनत्वेषांविभागइतितात्पर्यार्थः नतुमूर्खैरितिरतत्त्वपुस्त
कतुल्यमूल्यद्रव्यान्तरसत्वेपुस्तकंपडितैरेवमूर्खैस्तुद्रव्यान्तरमेवग्राह्यंग्राह्यमतत्पर
अन्यथाक्रमागतस्यपुस्तकमात्रस्यधनस्यसत्वेतत्रमूर्खादीनामनधिकारेतेषांत्वति
लोपापत्तेरितिबोध्यं अनुपयुक्तस्त्रीवाससामितिअनुपयुक्तंमूर्खादीनांपुस्तकादि
स्त्रीवाससीप्रागुक्तेनवास्तुविभागः इतिव्याचष्टेपितृजीवतीति पाठंवनाकारविति
अनुवाप्येतुपाठे अन्येषुनिरस्तोपिसध्याहारस्यानवाप्यमितिपाठेत्तुअन्येरशक्येउद्धा
रमित्यर्थेलक्षणायाप्रसंगादितिभावः तदभावेतुतनयाइति अत्रसमानांशाभिधानंवि
शोद्धारंनिरस्यति अधिकइति तथाचउद्धृत्रेउद्धृतमूमेश्चतुर्थांशमधिकंदत्वातेनसमंसर्वेस
र्वेसमांशभजेरन्नितिवचनार्थनतुअन्यइति श्रवणात्तस्मैतुरीयांशमात्रदानंतथात्वे अनुद्

Indira Gandhi National
Centre for the Arts

दायभा.टी. नैरुक्तत्वादित्वा वोद्धुरिव स्वल्पप्राप्त्या विषमांशित्वापत्तेरिति भावः भूमिपदेति भूमेश्चतुर्थो
॥६५॥ शङ्कस्युक्तार्थे प्रमाणमेतत् सम्प्रतीति पूर्वजातविभागानन्तरं भूमौ ...र्थः यथाशास्त्रमित्यनेन
न शास्त्रानभिज्ञतया यदि पिता स्वस्य गृहीत्वा विभक्तस्तदा विभक्तजस्य दातव्यो भागग्र
हणं ध्वनितं अत इति यतो विभक्तानन्तरमाहितगर्भेजस्यैतस्यैव विभक्तजत्वमत इत्यर्थः
भ्रातृभ्य इति एतच्च यदि पिता स्वयमंशं गृहीत्वा अवशिष्टं पुत्रेभ्यो दत्वा विभक्त एव तिष्ठ
ति तदा बोध्यं पितृमरणानन्तरं पितृभ्रातृभागानेकत्रीकृत्य यथाशास्त्रं सर्वैर्विभाज्यमिति
चूडामणिस्तु पितरि जीवति पितृद्रव्ये तद्धि शादेव शास्त्रीयतया सर्वमिश्रणेन पुनर्वि
भाग इत्याह अत्र ज्ञातगर्भायास्तु यदि गर्भस्थस्य भागः प्रागेव विवक्षितस्तदा पित्र्यभागं वि
भक्तजाभावे सर्वैरेव विभजेयुः अथापि ते चेद्गर्भस्थं निश्चित्यापि प्रसुतया पुत्रेभ्यो भागो दत्तस्त
दा पित्र्यभागं विभक्तजस्तेषामेव तत्र साम्यात् न तत्र गर्भस्थस्याधिकारः किन्तु पित्र्य एवेति

---

विभक्तजसत्वे तु तेन सह तुल्यांशित्वं बोध्यं पित्रा सहेति जघन्यजो विभागानन्तरं पुत्रोत्पादितो
स्तु पितृभागं हरेत् न तु विभागात्पूर्वजाता अत्रैव हेतुमाह अनीशा इति स्वामिनामेव विभागार्हत्वादिति
भावः पूर्वोक्तविवरणमेतद्विति केचित् यथेति निवृत्तस्पृहस्य तिरेव इत्यर्थः स्वयमर्जितमित्यनेन पुत्रा
न्तरेण विभक्तसंसृष्टिना पितृपित्रा भ्रात्रा वा रणशरीरायासाभ्यामुदुपार्जितं तदपि विभक्तजस्यै
व न संसृष्टिनामित्युक्तं यथाधनं इति विभागानन्तरं लब्धधनं हरेदेव द्विभक्तपितृधनेन ऋणाप
रिशोधनमपि विभक्तजेनैव कार्यं एवमेतादृशेन पित्रा यद्दत्तं प्रतिश्रुतं पश्चाद्गृहीतं बन्धकं विधया
दत्तं वा क्रीत्वा मत्स्येन दत्तं वा तत्सर्वं तस्यैव समाधेयमित्यर्थः निरस्य निवृत्तस्पृहस्य तिरेव भूम्यादिक
मित्यनेन नवर्द्धिपयोग्रहणं अनियुक्तादिस्वार्जिततुल्यत्वात् निवृत्तेरजसीति तथा च तद्विभागस्या
शास्त्रीयत्वात् निवर्त्तनीयत्वमिति भावः द्रव्यादिति नाशयेदेवं पाश्याणार्थः तेन भुक्त्वा व्यय ... उभयु
क्तेरिति भावः मातुर्निवृत्तेरजसीत्युक्तयुक्तेरित्यर्थः तथा च ज्ञाताज्ञातगर्भे गमात्रजा निवृत्तिं विना

Indira Gandhi National
Centre for the Arts

दायभा॰ टी॰ वाकृतपितामहधनविभागस्याशास्त्रीयतया निवर्त्तनीयत्वेन तद्धनविभागविषयत्वमेव न गुरुवचनयो
॥६५॥ रिति पूर्वेषां संलापि वचनानां पितुः स्वार्जितत्वविषयत्वमेवेति नैव परीक्षाशंका कर्त्तव्या इति भावः अ
थेति यद्यपि विभागानंतरागतस्याधिकारित्वया विभागः सिद्ध एव तथापि तद्दृशापरं प्रजातस्य स
प्तमपर्यंतस्य विभागज्ञापनार्थं पृथग्वचनारंभः स्वदेशावस्थाने चतुर्थपर्यंतस्यैव विभागार्हत्वादिति
बोध्यं कृते देशांतरस्थिते सति द्वितीयविभागे कृते सामान्यं साधारणं विभागार्हमिति यावत् लेह्यं
साशनावरूढं यद्धनं पैतामहं पूर्वपूरुषसंबन्धितेन पूर्वपुरुषवित्तस्यैव तत्कृतस्यापि क्रमेणस्यो
श्रितागृहादिकं साधारणद्रव्यमात्रोपलक्षणं सप्तमो वेति वाशब्दः सप्तमान्तर्गतानुक्तसमुच्चायकः
तेन सप्तमपर्यंतानामेव देशांतरादागतानां भागितेति न त्वष्टमादेरिति अत एव सप्तमादूर्ध्वं विच्छि
र्भवतीति वचनमप्येतद्विषयमेव केचित्तु वाकारोऽनवस्थायां तेन वीजिथामिमरणादिदशायां य
दि तु [illegible]त्पौत्रपर्यंतोऽस्य पूर्वजास्तिष्ठेन तदेतस्य स्वामित्वेन तत्परस्य प्रजातस्य सप्तमादूर्ध्वं स्याप्य

---

धिकारः पर्योत्तरधनस्य संक्रान्तत्वात् यदि तु दाजीस्वामिमरणादितः प्रागेव तत्पौत्रपर्यंतास्य पूर्व
जोर्ध्वं पूर्वं तदा पंचमस्य पिंडवहिर्भावेनानधिकारात्तत्पुत्रादेरप्यनाधिकार इत्याहुः तदस
त्तथा सति दृशस्थादिशस्यायोर्ध्वं चतुष्ठायां विदेशाभावेन नव चनवैयर्थ्यापातात् अत एवम्
ऊढीभूतश्च संततकृत्यनापि प्रामाणिकीति सुधीभिर्भाव्यं मौनावंशपरंपराक्रमेणैतद्देशावच्छे
दिनः सामन्ताः प्रतिवासिनः इत्यर्थः एकपितृकाणामित्यादि एकपितृकाणां विभिन्नजातिमा
तृकाणां पुत्राणामित्यर्थः अनुलोमेति नेन प्रतिलोमपरिणयनं सर्वथैव नेति सूचितं ननु प्राति
ज्ञेयं बालप्रलाप एव एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वर इति याज्ञवल्क्येन सवर्णाया [illegible]विवाह
मात्रस्य प्रतिपादनात् असवर्णाविवाहस्याप्रसक्तेः अत आह आसंश्चेति प्रसंगागार्हस्थ्याचितय
ज्ञादिधर्मोपयोगिनी सवर्णा एव सहत्वेन धर्माधिकारस्य भर्तुः शूद्रस्य शूद्रा धर्मकार्ये चनैमित्ति
कं स्वसैव कुर्यात्सर्वेषां नान्यजातिः कथंचनेति मनुना प्रतिपादितत्वात् कामतः विषयोपचाराति

Indira Gandhi National Centre for the Arts

दायभागटी० र्गत न तु गृहिधर्मत्वसिध्यानेनैतासां विवाहो भवत्येव किंतु केवलं रागाधीन एव स इति प्रति
१६६॥ पन्नं अत एव चतस्रो ब्राह्मणस्य विवाह्या इति स्मृतिः ब्राह्मणस्य क्वचित् इतरेषां मानि उक्ता एव अत एव
वात्रापि वैदिककर्मतया पूर्वं वृद्धिश्राद्धं कर्त्तव्यमेव गोभिलेन संस्कारपञ्चकमभिधाय सर्वाण्ये
वान्वाहार्यवन्तीत्युक्तेः दोषसत्वे हेतुमाह तद्धेतुरिति अत्रानुकल्पत्वकथनेन मुख्यकल्पासंभ
व एव कर्त्तव्यता सवर्णापरिणयनसंभवे तथाविधवचनस्याबोधकत्वेन तद्धर्मे मे सुसवायः
प्रतिपादितमिति बोध्यं निन्दार्थं व्युत्क्रमोढाविषयिणीति प्राचीनमतं निराकरणाद्दर्शयति काम
तस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृताः इति क्रमिकोढां शूद्रा
मुपक्रम्य निंदावचनेनेत्यर्थः व्युत्क्रमोढाविषयत्वे च क्षत्रियादीनामपि व्युत्क्रमोढात्वेऽपि
वणात् ऊढाविषयत्वेन तदेकवाक्यतया मन्वादिवचनस्याप्यूढाविषयकं विधिनिषेधोत्तुभ्य
नवदुपपन्नाविति भावः अत एवाति यतः शूद्रापरिणयनेन तस्यामपत्योत्पादनाद्दोष इत्येवेत्यर्थः

स्वयमनूढायामिति अन्येनोढायामित्यर्थः तनदत्तदपरिणीता शूद्रा स्कृताभिप्रायमिति वक्ष्य
माणेन नाविरोधः किंचिद्गुणवत्त्वेन शूद्रापुत्रस्य किंचिद्गुणत्वनिर्गुणत्वाभ्यामित्यर्थः द्विजातिपुत्रा
णां किंचिद्गुणवत्वे इति केचित् कीनाशो गोवृषो यानमलंकारश्च वेश्म च विप्रस्योद्धारिकं दत्वा एकां
पञ्चप्रधानकः इत्युद्धारस्य प्रागभिहितत्वात् पूर्ववचनस्योद्धारविषयमिति रत्नाकरः तदसत् क्षत्रि
यविशोरुद्धारानुक्तेः तयोस्तदभावाद्आधिक्यविधानानुपपत्तेः कीनाशो हलवाहकः ब्राह्मस्येत्यादि
आदिनापि अत्र अवर्णे दशधा विभजेयुः ब्राह्मणीपुत्रश्चतुरोंशानादद्यात् क्षत्रियापुत्रस्त्रीन् द्वावंशौ
वैश्यापुत्रः शूद्रापुत्रस्त्वेकं अत्र शूद्रापुत्रवर्जं ब्राह्मणस्यायं भवेत्तदा नवधा विभजेयुः चतुस्त्रिद्वि
भागीकृतानांशानादद्युः वैश्यवर्जे अष्टधा विभज्य चतुरस्त्रीनेकं च समादद्युः क्षत्रियवर्जे सप्त
धाकृत्वा चतुरो द्वावेकं च ब्राह्मणवर्जे षड्धा कृत्वा त्रीन् द्वावेकं च क्षत्रियस्य क्षत्रियवैश्यशूद्रेषु
वं विभागः अथ ब्राह्मणस्य ब्राह्मणक्षत्रियो पुत्रो स्यातां तदा सप्तधा कृत्वा ब्राह्मणश्चतुरोंशानम्

Indira Gandhi National
Centre for the Arts

दायभागटी· ॥६७॥

हरेयात्त्रीन्त्राजन्यः ब्राह्मणस्य ब्राह्मणवैश्यौ चेत्तदा षड्धा विभज्य चतुरोंशान् ब्राह्मण आ
दद्यात् द्वौ वैश्यासुतः अथ ब्राह्मणस्य शुद्रोस्यातां तदा पंचधा विभजेयातां चतुरोंशान् ब्राह्म
ण आदद्यात् एकं शुद्रः अथ ब्राह्मणस्य क्षत्रिवैश्यौ स्यातां तद्धनं पञ्चधा विभजेयातां त्रीन्
शानू क्षत्रियस्त्वादद्यात् द्वावंशौ वैश्यः अथ ब्राह्मणस्य क्षत्रीयस्य वा क्षत्रियशुद्रसुतौ स्यातां
तदा तद्धनं चतुर्द्धा विभजेयातां त्रीनंशान् क्षत्रि आदद्यात् एकं शुद्रः अथ ब्राह्मणस्य क्ष
त्रियवैश्ययोर्वा वैश्यशुद्रौ पुत्रौ स्यातां तदा तद्धनं त्रिद्धा विभजेयातां द्वौ वंशौ वैश्य आदद्यात् एकं शुद्रः
यदि ब्राह्मणीपुत्रा द्वौ स्यातां शुद्रापुत्र एकः तदा ब्राह्मणीपुत्रो अष्टभागानादद्यात् एकं शु
द्रासुतः अथ शुद्रापुत्रौ द्वौ स्यातां एको ब्राह्मणीपुत्रः दैत्त षड्धा विभज्य चतुरोंशान् ब्राह्मणा
स्त्वादद्यात् द्वावंशौ शुद्रापुत्रौ इति अनेन क्रमेणांशकल्पना अन्यत्रापि भवतीति विज्ञस्तत्र वि
स्तारभयादनेन नालिखितं अन्यत्रेति ब्राह्मणीपुत्रमेकः क्षत्रियपुत्रकौ द्वौ क्षत्रियापुत्रः

कः ब्राह्मणीपुत्रो द्वाविंशादिद्विसर्थः जन्यज्येष्ठे ब्राह्मणीपुत्रोपेक्षया भवेदिति ब्राह्मणपुत्रेण
सहसमांशो भवेदित्यर्थः विप्रेण वैश्याजातास्तथा जातस्तथाविधः क्षत्रियेण समांशाइत्यर्थः दत्त्री
ताइति सवर्णापुत्रानंतरापुत्रयोरिति सामान्याभिधानादिति भावः विशेषेणेति पितामहा
मित्ति विशेषमनाभिधापकमागतमिति प्रपितामहादिसंबंधसाधारणसामान्याभिधानादि
त्यर्थः न प्राचीनामिति क्षत्रियादिपुत्रादीनामित्यर्थः अनअज्ञानं आधिकारे अनुमसभावःसि
धइति शेषः संबंधिनो ऽनधिकारे ऽसंबंधिनो ऽनधिकारस्य दंडापूपन्यायसिद्धत्वादिति
भावः उक्तं च हनुमता विधानात् विधायुक्तो धर्मेणाच धनानि इत्यादिना दानपुत्रस्य कथ
नादिति भावः अर्जनस्थानाह आवृत्तानामिति गुरुकुलाद्विद्यामाधीत्य स्वगृहागतानामि
त्यर्थः एष विधिरर्जन विधिर्व्याक्षुस्यो ऽभीधीयते इत्यन्वयः अर्च्चनरूपत्वात् क्षयति अर्चनं सान्त्व
गौरवितप्रीतिहेतु तया तथा च दूनक्रियापरितोषार्थेरनादृष्टार्थो अतस्तत्स्वीकारेन प्रतिग्रहः अदृष्टा

दायभागटीका र्थयत्कद्रव्यस्वीकारस्यैव प्रतिग्रहरूपत्वेन ह्रस्यति ना तथा च उभयरूपाभ ब्राह्मणीपुत्रस्यैवेत्यर्थः त्री
॥६८॥ लेवदायाधनयस्यैति योगाद्ब्राह्मणस्य सर्वाभस्य र्थमाशंक्याह नन्विति ननु तथापि गृह्णक्रमागत
क्षेत्रातिरिक्तभमात्रक्षत्रादेर्नाधिकारः स्यादत अत आह केनबलेनेति तद्दर्शयति यथोति
सजातावितिश्रद्धाश्रद्धाज्ञानदुस्यर्थमत्र्वमिति ननु तत्र भूमिकृतविशेषः ज्ञातिभावः तथा चो
तद्वचने शूद्रपुत्रमात्रस्य निषेधेन प्रतिग्रहीतातिरिक्तभूमौ क्षत्रियादेरधिकारसिद्धे नयोगबलेनत्र
सुदायागतयज्ञस्य ब्राह्मणस्य देधिक्रस्य र्थत्वमिति× ग्रहत्वात इतिभावः प्रतिग्रहभमात्रपरत्वेत्रहलपदार्थ
वे [illegible] क्यमाशंक्याह अर्थेतिइयमर्थनस्पार्केनमनुना अन्यापात××

भावः॥ इत्थं चैतद्वचनैकवाक्यतया मनुवचनमपि शूद्राधिकारनिषेधार्थं॥ पा-
रिसङ्ख्यार्थविधित्वेन तु द्विजातीनामधिकारविधिः॥ तत्थ विध्यंतरप्राप्ततय
विधानासम्भवादिति ध्येयं॥ वक्ष्यति अपुत्रधनाधिकारप्रकरणे इति शेषः। तथा
च विज्ञ्मरिति॥ अत्र हि जातिपदं क्षत्रियवृश्योभयपरं॥ न तु ब्राह्मणपरमपि
विप्रस्य तत्तीयाभिधायकदेवलनारदविरोधात्॥ बहुवचनं तु व्यक्तिभेदादिति
भावः॥ सत्पुत्रविधमानाद्धि जातिपुत्रः। अपुत्रशूद्रातिपुत्रशून्यः। विबोध्यमिति
ज्ञेयमिति॥ यदेवास्यपितादद्यादित्युक्तेरिति भावः। अपरिणीताविषयत्वेहे
तुमाह॥ परिणीतायाइति॥ तथा च परिणीताजातस्य विधिबोधितपुत्रत्वे न प्र
शस्तांशभागितायुक्ता॥ अपरिणीताजातस्य प्रतिसिद्धपुत्रत्वेन न भागिताकिं
तु मासाच्छादनमात्राहंता इति न वैपरीत्यशंकेति भावः॥ केचित्तु वैधत्वादिति
तथा चाविरोधितत्वेन निंद्यापास्तहि तरविषयत्वेसैव युक्तत्वादि साशयेना

Indira Gandhi National
Centre for the Arts

६९

हः॥ तदसत्सपायान्नेवशवइतिनिंद्यया वैधावैधसाधारणत्वेन शंकोचेहेत्वाभा
वात्॥ ननु सकृदभिगमस्य वैधत्वेपि न पुत्रोत्पत्तेर्वैधत्वमत आह॥ तत्रैवेति
॥ प्राथमिकाभिगम एवेत्यर्थः॥ गर्भस्थिते गर्भोत्पत्तेस्तथा च सकृदभिगमस्य
वैधत्वे नैमित्तिकस्य पुत्रजननरूपफलस्यापि वैधत्वं तदर्थमेव तत्प्रतिपा
दनात्॥ यथा फलचमसमस्मैभक्ष्यं प्रप● छ्रुता यत्र ऋत्विजे फलचमस
भक्षणमपि वैधमिति भावः। ननु पर्ववर्जे हृतौ इति विधौ सत्वभिगमनसामा
न्यस्य वैधतया सकृदिति। कथं तत्राह नेति उक्तार्थप्रमाणमाह यथेत॥ दृष्टा
र्थमिति पुत्रजननरूपदृष्टप्रयोजनार्थमित्यर्थः। अन्यथा अन्यस्याभिगमन
स्यापि पुत्रोत्पत्तिहेतुत्वे सकृदभिगमनाविधानस्य॥ तथा च पुत्रार्थप्राथमिक
गमनमेव शास्त्रार्थः। द्वितीयाद्यभिगमनं तु दृष्टप्रयोजनमात्रार्थ इति अनु राम
क्रमसकृदिति भावः॥ अतएव सदैवेवापर्ववर्जे तासां वरमनुस्मरन्॥ इतिस

दाभिगमनं॥ वरस्मरणनिमित्ततया निर्दिष्टा॥ अन्यथा पुत्रमिच्छन्नित्येव निर्दे
श्ये तत्प्राधान्यादिति॥ मंगलेति। अभिप्रेतार्थसिद्धिर्मंगलं तदाचारार्थे तमस्य
र्थमित्यर्थः॥ नरपरिणतास्रूज्ञापुत्राभिप्रायमित्युक्तं॥ उपसंहरति अत इति
॥ दृस्यामिनिदासस्यापरिणीतरक्षितामित्यर्थः॥ सतीति समंस्यादश्रुतत्वात्॥
विशेषस्य इति न्यायादिति भावः। ज्येष्ठताश्रेष्ठता सा च पुत्राम नरकत्राणनिर्व
धनात तदभावाच्च श्रेष्ठताभाव इत्याह। स्वतइति साक्षादित्यर्थः। ज्येष्ठ इति ज्येष्ठपुत्र
कार्यं पुन्नाम नरकत्राणं नरकरणं तु। तर्हि पुत्रिकाकरणं किमर्थमत आह
पुत्रद्वारेणेति स्वधाकारं त्रिविधक्रियाकरं अन्यथा स्वधाकारणाद् स्वश्राद्धक
रणार्थत्वेदौहित्रां नरसाधारणयात्। पुत्रिकाकरणवैयर्थ्यापते॥ एतेन पुत्रिका
रणार्थत्वे... पुत्रसत्वेपि पुत्रिकाया एव प्रेतकृत्साधिकार इति मतमपि निरस्तमिति वेदित
व्यं— तथा च ●धारस्यारोपकार्थमेव पुत्रिकापुत्रकरणमिति भावः॥ ज्येष्ठाद्वि

नितितस्यसमक्षादेव ज्येष्ठपुत्रकार्यकरणादिति भावः पौत्रत्वाहिति॥ आनिदे
शिकपौत्रादिरित्यर्थः॥ ननु विरोधादिति न च विनिगमनाविरहः किं ननु विरो
धाद्वशिष्ठोक्तं पुत्रत्वं गौणं किं वा वशिष्ठविरोधात्। मनूक्तपौत्रत्वमेव गौण
मिति वाच्यं॥ मनुस्मृतेः सर्वस्मृतिप्रबलस्यैव विनिगमकत्वात् उत्रत्वपु
त्रव्यपदेशः॥ गौणमिति पिंडदातृत्वस्य मुख्यपुत्रगुणस्य योगात्॥ गौणतावो
ध्यापिंडदानयोगमेव उपपादयति। तद्द्वारेणैवेति॥ एकस्य पुत्रिकापुत्रस्य
अन्यस्य पुत्रिकास्वरूपस्य तद्योगात्। न च परस्यापि ददानापेक्षातिपिं
डदानस्य वस्तवत्वेन पुत्रिकापुत्रस्यैव वस्तवत्वं न्याय्यं न च पुत्रिकाया अग
जत्वात्। तदधीनजन्मतया च तत्पुत्रस्य पिंडदानयोगात्। तस्या एवौरकु
र्वेण पुत्रत्वौचित्यात्॥ एतन्न्यायादेव अपुत्रिकाया एव दुहितृभाव एव दौ राम
हित्राधिकारवक्ष्यति अन्यथा तत्र साक्षादुपकारतया दौहित्रस्यैव प्राग २

धिकारापत्तेः॥ अत एव समस्तत्रेत्यनेन पुत्रिकैवौरसयोरेव समभागितामनुक्ता
न तु तस्याः पुत्रौरससमभागिता केनाप्युक्ता इति॥ इत्थं च पुत्रिकापुत्र एव वेति
द्वादशविधपुत्रस्यान्यथ्यं कर्मधारयो न तु तत्पुरुष इति विभावनीयं॥ सवर्णोक्त
विभाग इति समभाग इत्यर्थः॥ असवर्णत्वे औरसस्यासवर्णे तु औरसक्षेत्र
परिणीतायां स्वयमुत्पादित परः न तु सवर्णायां संस्कृतायां स्वयमुत्पादये तु
यं॥ औरसं तं विजानीयात्। पुत्रं प्रथमकल्पिकं। इत्युक्तौरसपरं तस्यनुस
वर्णत्वासंभवात्॥ असवर्णौरसपुत्रवदिति॥ सवर्णौरसेन महासवर्णौरस
स्य क्षत्रियाद्र्शस्त्रिद्व्येकांशरूपो भागस्तादृश इत्यर्थः॥ दुहित्रंतरतुल्यत्वा
दिति- एतावता यथावध्यायाम पुत्रिकासांतरतनत्लोगता पुत्रस्तथा पुत्रि
कायाम पीतिप्रतिष्ठिता। द्वादशपुत्रानिति पुत्रिकया सत्वेत्यर्थः॥ आसजा
औरसपौनर्भवपुत्रिकाः। परजाः क्षेत्रजादयः त्वध्यः दत्तः क्रीतसाहोढ

Indira Gandhi National
Centre for the Arts

कालो न कृत्रिमाः। यादृच्छिकाः अपत्नोपस्थिताः। अपविद्ध स्वयमुपागत
गुडोत्पन्नः। येष्वपि तत्सवर्ण इति ब्राह्मणस्य ब्राह्मण्यां जातः। क्षेत्रजः औ
रस वैश्यापुत्रापेक्षयाऽनमवर्णः पितुः सवर्णः इत्येवमादय इत्यर्थः अप
मेवेति। औरसेन सह तेषां यो विभागक्रमः स एव पुत्रिकयापि सहेत्यर्थः॥
एतदर्थमेव स्वयं द्वादशविधपुत्रगणनायां पुत्रिकायाः प्रथममुद्देश इति
बोध्यं॥ गुणवद्गुणनयेति। सगुणत्वनिर्गुणत्वाभ्यामित्यर्थः इति संप्रदायः॥ वस्तु
तः पितुर्हीनवर्णस्य विभागानुक्तेः॥ अनध्यवसायापत्तेरिति बोध्यं गुणवद्गुण
पेक्षयेति पाठे अगुणो निर्गुणः तेन गुणवन्निर्गुणरूपविषयभेदादित्यर्थः॥
तुल्यत्वाभिधानादित्यर्थः तितुल्योरा प्रतिपादनादितर्थः। आत्र शांस्यमनुक
त्वात तदर्थं तन्निमित्यर्थः॥ तेन जीवनदानोपि इच्छामात्रं प्रयोजकं न तु तेषां
अधिकार इति भावः। जीवनमरणमिति हीनवर्णपरमिति॥ न तूत्तमवर्णप राम

३

रमपि देवत्त्वेनेति॥ तेनउत्तमवर्णस्य भागिता याहीनवर्णस्य ग्रासाच्छादन
मात्रस्य चोक्तत्वादिति भावः अनियोगोत्पन्नेति॥ औरसमुत्पाद्य क्षत्रिनिमि
त्ते तस्मिन्नेव क्षेत्रे अन्येन शुल्कं दत्वा यत्याहितु तस्य तदौरसेन सहेत्यर्थः। अ
पमेवेति। शुल्कदाने तु स क्षेत्रिण एव पुत्रो न बीजिनः तेन तस्य न बीजिधना
धिकारिता॥ किंतु क्षत्रिणएव धने औरसतनीयांशहारितेति॥ अशुल्को
पहतायां तु पिंडदा वोढुरेवेत्युक्तरिति बोध्यं॥ अथाऽपुत्रधनाधिका
रिता॥ अपुत्रपुत्राधिकारनिरूपणानंतरमित्यर्थः॥ आम्नायते अभ्यस्यतेऽ
त्याम्नायो वेदः पुण्यनि॥ एकैककृते ये पुण्यापुण्यकर्मणि विहितानि निषिद्ध
कर्माणि तु योः फले स्वर्गनरकरूपे भोक्तृत्वेन समेत्यर्थः इदे च प्राणिनादे
मित्युक्ताभेदे हेतुः। स्वकर्मफलभागस्याऽनतिरिक्तत्वस्यैवोत्सर्गित्वात्॥ क
देहार्द्धमिति देहार्द्धं न प्रत्यक्षतया सजीवतीत्यर्थः॥ सकुल्यैः स्वनाभिभि

Indira Gandhi National
Centre for the Arts

रिमितनीयाइत्यंससम्यर्थः॥ तेनसकुल्यादिषुसत्सुसनाभयःसहोदराः॥ श्री
तस्यमतस्य पतिव्रतापतिशुश्रूषाव्रता॥ नतुव्रतेभिर्येनयानारीसाध्वीज्ञेया
पतिव्रतेत्युक्तपतिव्रतामरणेनैवतन्निष्पत्तेरत्रासंभवात्॥ साध्व्योऽव्य
भिचारिणीतेनतद्विपरीतानामधिकारनिवृत्तिः॥ सनातनोऽनादिपरम्परागत
तः॥ कुप्यंस्वर्णरूप्याभ्यामन्यत्तैजसंलोहादि॥ अंबरंवस्त्रं॥ आदायस्त्रीकृत्य
दापयेदिति॥ स्वार्थेणिचामासषण्मासिकेस्यनेनपाठेणनिषेधः॥ आदिना
आद्यादिश्राद्धं॥ तत्परिग्रहःपित्र्येतिद्वितीयांतद्वयं भर्तुस्त्वत्रान्वेतिक
र्त्यं मृतोद्देशेनस्वकृतपूर्तमन्नपानादि॥ सततवचनेतिसत्तानामेववचना
र्थं नोपत्न्यधिकारतात्पर्यकत्वादितिभावः॥ सब्रह्मचारिणःएकदेवगुरो
रध्ययनवेदाभ्यासेनसमानव्रताचारिणः॥ पूर्वस्येतिवोत्तितंस्वर्णं तस्य
मृतस्यउपलक्षणमेतत्॥ पतितादेरपिबोध्यं॥ सकृत्॥ श्रुतास्वेएकस्यध रम



नपदस्यपत्न्यन्वयेवर्तनोचितधनबोधकत्वंभ्रात्राद्यन्वयेचकृत्॥ स्वध
नबोधकत्वंनसंभवतीत्यर्थः॥ भर्तुःशयनंपालयंतीतदीयशयनेपुरु
षांतरंवारयंती॥ अव्यभिचारिणीतियावत्॥ व्रतेपालौकिकभर्त्रुपकारेस्थि
ता नतुक्ताव्रतेएकादश्यादिव्रतेस्थितातत्कारिणीत्यर्थः॥ इतिकेचित्॥
तदसत्॥ भर्तृमरणक्षणेतदसंभवात्॥ पिंडं भर्तृपिंडं॥ अनुषज्यतेइ
ति॥ यद्यपिसमासस्थविशेषणमात्रस्यानुषंगोव्युत्पत्तिविरुद्धः॥ अन्यथा
चैत्रस्यघटमानयघटमानयेत्यादौचैत्रस्यानुषंगेनघटान्वयापत्तेः॥ तथा
पितदितिषष्ठ्यंतमव्ययमितिसमभिप्रायःचूडामणिमतमाह॥ आकांक्षेति
॥ आकांक्षासत्त्वेसमासस्थस्यापिवृत्तौबाधकाभावः॥ भर्तुरित्यस्यानुषंगः
स्तुव्यवस्थितत्वादसंभवोत्तोत्तिचूडामणिः॥ वस्तुतस्तदित्यर्थपरंइदं
त्यनेनतरंउपस्थितमितिशेषः॥ तथाचतद्धनेस्वरूपमनुषज्यतेअं

Indira Gandhi National
Centre for the Arts

शुश्रूषकस्य स्वसंबंधिकतया व्युत्पत्तिवशेनोपस्थितत्वात्। संबंधितयाऽन्वो
यतेइत्यर्थः। ननु तद्वाक्यघटकतयापदोपस्थितायाः पत्न्या एवान्वयो युक्तः
। न तु भिन्नवाक्योपस्थितस्य भर्त्तुस्तथा च पत्नी स्वांशं कृहमेवन्तेनोचितं
त्वमतेइत्येवार्थः॥ किं तस्यात्र त आह तन्विति अनुपपत्तौ हेतुमाहस्वामिभा
वेति स्वत्वज्ञापनार्थत्वादित्यर्थः॥ अस्य वचनस्य नच नहि स्वांशेसत्वतज्ञा
यतेज्ञातत्वादि तथा च प्राप्तत्वाद्विधित्वासंभवो वैयर्थ्यं निराकांक्षत्वं चेतिभा
वः। नियमार्थः॥ न च ग्रहणेति। तथा च ग्रहणविधिरयं न स्वत्वविधिरितिभा
वः॥ ग्रहणे पृथक्त्वविनियोगान्नक्षणे॥ वासादेरिति तथापि विधित्वासंभव
स्तदवस्थ एवेतिभावः॥ नियमार्थमिति स्वांशग्रहणमायादेवेति। नियमार्थ
मित्यर्थः॥ अदृष्टेति विधिनियमितस्य नित्यतया तस्मात्। पंडनित्यापूर्वक
ल्पनोयं तच्च दृष्टार्थत्वे संभवति गौरवादन्याय्यमिति भावः॥ गौरवांतरम राम
५

प्याह नियमे वेति। नियोज्येति ममेदं कार्यमिति बुद्ध्या नियोज्यः॥ गुरुमते स्व
र्गकामो यजेतेत्यादौ स्वर्गकामनियोज्यकतयाऽभयथापि आच्छयवत्त्वेपि॥
ग्विषयकं कार्यमिति बोधस्य सिद्धत्वेन प्रकृतेपि प्रत्यवायपरिहारफल
कामरूपनियोज्यकत्वं आदिपदादकरणे प्रत्यवायकत्वमपि स्यादित्य
र्थः॥ नियोज्यकत्वं नायाऽभयथा त्याज्यवश्यकत्वेपि कामनारूपाधिकाराधि
कामत्रेति बोध्यं॥ अनंधीति॥ अधादिमिन्नः॥ स्कंदस्मृं शेमिति॥ अवगम्ये
ते गूँइति शेषः॥ ननु अनंधादिमयाहृष्टं न तथा नोक्तं॥ किं तु हृष्टार्थेबुत्य
त्तिकत्वं नास्थानतया तच्च वैदिकस्येव लौकिकस्यापि वाक्यस्यादिशिष्टं
॥ तथा च तत्र वचनाभावोऽकिंचित्कर इत्यत आह भवतु वेति॥ अभ्यु
पगमाद्राह भवतु वेति कश्चित्पूर्वोक्तहेतुनास्वांशं लभेतेति विधानानुपप
त्तिरूपेणापि अंशापेक्ष्यमिति अनर्द्धाहरिस्तु नावाक्येपोति शेषः॥ नच पु

Indira Gandhi National
Centre for the Arts

त्रीं तरस्याप्यंशादेकवचनमनुपपन्नमिति वाच्यं तस्योद्देश्यविशेषणतयाऽ
विवक्षितत्वात्। एकपुत्रस्यत्नाभिप्रायेण वा तत्। अतएव सत्वविधानासंभवा
देव॥ संबंधिशब्दत्वेनेति॥ संबंधिशब्दस्येत्यादिः॥ संबंध्युपस्थापकत्वंस्वा
र्थस्यापरः संबंधो प्रातियोगिनिरूपकरूपस्तद्घटितस्वार्थबोधकत्वं तं विहा
यस्वार्थान्वयार्थान्वयबोधकत्वासंभवात्। तद्घद्इति भूर्तिकत्वात पुत्रत्वादिरू
पसंबंधितया घटकतापुनरुपस्थितस्यैव संबंधिन इति भावः। उक्तव्युत्पत्ति
कल्पनस्यत्वं दृष्टान्तयति तथा मातेत्युक्ते उपस्थितस्य वक्तुरेव संबंधित
याऽन्वयित्वं तथा प्रत्यक्तेपि अंशशब्दस्य स्वर्वाधेकतयाउपस्थितायाः प
त्न्याएव तदर्थान्वयित्वमिति तत्कथं भर्तुः त्वं तहृत्तमंशात्तमेति भर्त्रन्वयं व्या
स्यसितिति पूर्वपक्षः। यद्यपि लोपदस्य संबंधिकृततया तदर्थान्वयित्वेन भर्त्रो
व्युपस्थितएव तदा तथापि विशेषणतया विशेष्यतया च नासंबंध्युपस्थिति राम
६

स्थले विशेष्यतयोपस्थितस्यैवान्वयित्वं न तु विशेषणतयोपस्थितस्येति व्युत्प
त्तिः कथमन्यथा यज्ञहरत्तमित्रं पितरं गृहं प्रविशतीत्यादौ न यज्ञदत्तस्यापि चान्वयो
ऽपि तु मित्रस्येति नियमउपपद्यत इति भावः॥ दूषयति। तदयोगि॥ अनुपात्तेति सं
बंधिपदार्थान्वययोग्यतयासंबंधिनः शब्दोपात्तत्वेन स्यैव तदन्वयित्वे नसम्बन्धान्तर
स्योपस्थितेनपत्न्यंशान्वयः तस्याः प्रथमोनोपस्थितत्वेन षष्ठ्यं तस्याकांक्षेण संबंधि
नाऽन्वयायोग्यत्वादिति भावः प्रयोज्यस्येति प्रयोजकस्येति च द्वयं प्रमाणान्तरेण तत्व
स्योपस्थितेर्बोध्यं प्रकृते भर्तृरूपसंबंधिनः शब्दोपात्तत्वं प्रतिपादयति तदुक्तपिंडमि
ति॥ पत्न्यपेक्षतापत्नीरूपसंबंधिघटितस्वार्थबोधतयाऽशपदस्येति शेषा पत्न्यन्वयेबा
धकमप्याह विधानानुपपत्तेश्चेति॥ उपसंहरति तस्मादितितदंशग्रहणं॥ तुल्याः
सवर्णाः भ्रियमानः निर्दोषः सनजितवदवस्यः॥ सवर्णाभ्रातरो वैमात्रेयाः सहोदराणां
प्राप्तकाल॥ कुल्यानां सहवासिनः॥ स कुल्याः सजे दाश्रमांतरं प्रविष्टो दित्यर्थः॥ भ

Indira Gandhi National
Centre for the Arts

मिनीं अनूढांशं विवाहोचितं॥ विधवापि वक्तुं नोचितमिति केचित्॥ इदमप्यसंसृष्ट
विषयं कुतो न स्यात्॥ अत आह उपक्रमोपसंहारयोरिति॥ ननूक्तविरोधपरिहारान्य
थानुपपत्त्या संदेशापत्तिरन्ययोनादरणीयइति विभक्तविषयत्वमेव वाच्यं इत्यत आह किं
चेति लोपाशंकायामिति लोपोऽविभज्यत्वे अमोघां त्वहस्यति वचनात्॥ निरुक्तविषय
विभागे हेतुमपि विकल्प्य दूषयति किं चेति॥ विशेषज्ञापनपरत्वेन समानसंबंधिनाम
ध्ये संसर्गिनिबंधनाधिकारबोधकत्वेन अन्यथा पुत्रसत्वेपि संसृष्टभ्रात्रधिकारप्रसंगा
दिति भावः॥ अस्तु न विरुद्धमेव वचनमस्तीत्याह॥ अनंतरे पुत्रदुहित्रेत्यादि॥ अनप
त्यस्य धर्मोयमभार्यपितृकस्य चेत्यभिधानादिति भावः॥ असंसृष्टविषयमेवेति॥ एं स्वा
दिवचनामिति पूर्वोक्तमनुषज्यते॥ युक्तामिति संसृष्टत्वे पत्न्यभावे भ्रात्राधिकारस्य द
संसृष्टत्वे पत्नीसत्वे भ्रात्रधिकारस्य स्वरससिद्धत्वादिति भावः॥ असंसृष्टविषयत्वमे राम
वाह॥ तथाहीति तदपस्यापीति सर्वेषां संसृष्टानां सर्वधन एव समांशस्वत्वं नयादेकिक ७

प्रीति भावः॥ ननु दंपत्योर्मध्यगं धनमित्यनेन तत्र पत्न्या अपि स्वत्वस्यावेद्यमानतया
अनंतरं पत्न्या एव युगपदुभयोर्वा तद्धनं कथं कथं न स्यादत आह नन्विति भर्तमर
णेनंतरं स्वत्वापगमे न भर्तमरणं तु। तत्पत्नी स्वत्वनाशे प्रमाणमाह यथेति इत्थं च पत्न्य
धिकारस्य लोपिभर्तमरणान्तस्याः प्राचीन स्वत्वं नष्टस्येव सामग्रीसत्वात्॥ किं तु पुनः
सत्वान्तरमुत्पद्यते॥ अत एवाद्धनस्य दायत्वमपोतिभावः॥ किन्त्विति अविज्ञातं चैत्री
यत्वादिनाविशेषरूपेण धर्मिणेथ निश्चितं॥ एकादशमिध्यपदस्तोपि समासाश्रयणे
नएकदेशो देशाश्रयो यस्य तादृशं च तदित्यर्थः॥ नन्विति न तु समग्रमेवद्वयोरि
त्यन्वयः॥ न तु समुदितमेव उभयस्वामिकमित्यर्थः॥ प्रमाणाभावादिति वैशेषिकव्य
वहारानर्हत्वेन प्रमाणाभावादित्यर्थः॥ परिणयोत्पन्नेतदधीनदाम्पत्यसंस्कारोत्पन्नं॥
अन्यथा परिणयनानंतरभाविभर्तधने स्वामित्वानुपपत्तेः॥ परिणयस्यविनष्टत्वादि
ति॥ तथा वपत्न्याः स्वत्वस्य विरोधिनः स्वलात्मभार्तस्वत्वसंभव इति भावः॥ तदधिका

रशास्त्रेति तथा च भर्तृमरणात्स्वत्वनाशे पुत्रस्वत्वकालः॥ सहकारी कल्प्यते नत्विभावः॥ अ
सिद्धिरिति तथा च संसृष्टभ्रात्रधिकारबोधकशास्त्रमेतत्तु वचनं न भवतीत्यर्थः॥ ननु
भर्तृमरणात्पत्न्याः स्वत्वनाशात्॥ भ्रातुः स्वत्वात्पत्नीबाधकाभावइत्यतआह सिद्धे हो
त्तिसंसर्गविषयत्वे संसृष्टविषयत्वे सैतत्तोतिशेषः॥ सतिसिंतुद्धे तु पत्नीस्वत्वनाश
इतिस शास्त्रवलेनैव पुत्रस्वत्वकालेऽस्यापि सहकारित्वकल्पनाइति भावः॥ ननु दम्प
त्योर्गधनमित्यनेन पत्न्याः स्वत्वे तत्रैव पत्न्याः॥ स्वत्वे प्रत्याज्यन्ते न तु वैपरीत्यं स्त्रीध
नेव्यभिचारात्॥ तथा च पाथुःस्वत्वनाशात्॥ पत्न्याः स्वत्वनाशः सिद्ध एवेति॥ शास्त्रस्य सं
सृष्टविषयत्वे निष्प्रत्यूहं मितिकान्योन्याश्रयः॥ पत्नीस्वत्वनाशस्य प्रमाणांतरसिद्धत्वा
त्॥ अत आह किंचेति॥ तद्विधो विभक्तसंसृष्टान्यतरः॥ तस्य भ्रातुस्तथाविधस्यैका
न्यतरस्य पत्न्ये दुहितरु स्यादि याज्ञवल्क्यवचनस्य विभक्तासंसृष्टविषयत्वमेव
कुत इति चेदत्र चूडामणिः सवर्वोध्याः पत्न्याः प्रथममधिकारिबोधकतया तत्परस्ये रामः ८

वनिश्चयादित्याशयादिति व्याचष्टे वस्तुतः शंखादिवचनानां संसृष्टविभक्तभ्रातुःप
त्नीतः पूर्वमधिकारबोधकत्वे पित्रोरपि तथाविधयोरेव पत्नीतः पूर्वमधिकारबोध
कत्वं तुल्यन्यायादितिः परिशेषादेव याज्ञवल्क्यवचनस्य विभक्तासंसृष्टविषयत्वमि
ति भाव्यं॥ पत्नीतः सर्वमिति॥ शंखादिवचनादिति शेषः॥ तथास्मद्धानावहूनामत्र
विवादएव याज्ञवल्क्यवचनादिभक्तासंसृष्टत्वस्यापि तु भ्रातृवाधकत्वे सिद्धे शंखाद्युक्त
भ्रातृवाध्यतायाश्चविभक्तसंसृष्टगोचरत्वस्यैव संभवात्॥ अत आह किंचेति॥ ननु भ्रा
तृदेयपिंडेत्रयेसपिंडेने न भोक्तत्वात्॥ भ्रातुरेव प्रागधिकारो युक्त इत्यत आह जीवति
चेतिइतरत्वापि संसृष्टाविभक्तधनेपि॥ यदि चोक्तहेतूनपेक्ष्यापि संसर्गविभक्तद्वयो
रुतत्कर्ष इत्युच्यते तदापि तन्मात्रोर्द्वयोरेव तद्विशेषायुगपदधिकारः स्यादित्याह॥ अ
विभागेत्यादि॥ अथ शंखादिवचनया याज्ञवल्क्यवचने प्रुक्तमेणाधिकारावगमात्॥ यो
गपद्यासंभवः तथा च तत्र द्रोग्यपिंडद्वयदातृतयापि त्रपेक्ष्या तत्र ज्ञोग्यपिंडत्रयदात्त

Indira Gandhi National
Centre for the Arts

तथा तद्देयमातामहादिपितृत्रयदात तत्पाचभ्रातुरुत्कर्षात् । तत्र क्रमेणैवाधिका
रो युक्तः विभक्तासंसृष्टपितुः प्रागधिकारस्तु वाचनिक एवेत्यत आह ॥ विंचेति ॥ अ
विभागः साधारण्यं अत एव विभागविरहादेव उत्पत्तितन्मात्रत्यारतिस्तस्याधन
संबंधस्य परिणयाधीनत्वहतु ॥ विभागध्वंसेनयतत वेति यावदेकत्रस्यापनमिति
शेषः ॥ अन्यथा विभक्ताःपि तत्रित्ताच्चेत्संप्राप्तो कत्रसंस्थिताः ॥ पुनर्विभागकरणे तेषां
ज्येष्ठं न विद्यते इत्यादि वचनोपदेशितपुनर्विभागस्य वैयर्थ्यापपत्तेः एतेन संसर्गे
सति सत्वसवेषांसंबंधने शुसामुद्रायिकत्वात्ये वन नु विभागात्पूर्वमिवप्रादे
शिकमिति सिद्धं तत्र चाक्ताभिसंधानवत्वेन साधारणशरणयासाभ्यां संसृष्टिनैके
नार्जितधनेपि सर्वेषामेव संसृष्टिनो सामुदायिकसत्वमेव बोध्यं ॥ अधिकारबोधः ॥
अनिकारियोर्थ विरोधः ॥ सुसिद्धां तमाह संप्रतीति ॥ न च स्वार्जितधने प्रथमं भ्रात्रधिका राम
रः पितृसंबंधिधनेपि तु रधिकार इति रत्नाकराद्यभिहितमिति समाधानं युक्तमिति ९

वाच्यं ॥ प्रमाणाभावाद्धि निगमनाविरहेणैव परीत्यस्यापि संभवात् च ॥ धीमाद्भिरस
द्भिमतार्थवादिभिर्हेत्वा पुधादिभिरित्यर्थः ॥ विद्ध्यित्यादिना याज्ञवल्क्यपरिग्रहः
वचनेभ्यः अपुत्रधनं पत्न्यभिगामीति ॥ पत्नी दुहितरश्चेत्यादिवचनेभ्यः वच
नस्थपुत्रपदस्य वक्ष्यमाणयुक्त्या प्रपौत्रपर्यंतपरत्वादाह ॥ आदीति पौत्रप्रपौत्र
परिग्रहार्थं ॥ सप्तमीति अपुत्रधनं पत्न्यभिगामीत्यभिधानात् ॥ एषामभावे पू
र्वेयो धनभागोत्तरोत्तरस्याभिधानाच्चेति भावः ॥ अस्यन्यायमूलत्वमाह युक्तमिति
॥ नित्यो नरकः नैरय इति निस्यगामीत्यर्थः ॥ इति केचित् ॥ तदसत् । तत्रत्यनन्व
यापत्तेः किंतु नरक एवार्थः ॥ तद्धितस्मात् ॥ विरक्षणात् । तत्र तस्याप्रसक्तस्येति भा
वोक्तेः ॥ तेन जन्मन इत्यर्थः ॥ ब्रह्मस्यादित्यस्यपि स्पष्टं लोके श्रुतं ॥ न्यायमूलत्वश्रुतिबोधि
तं ॥ अत एवोपकारकत्वेन धनसंबंधस्य मनोरनुमतत्वादेव ॥ अन्यथान्यायमू
लत्वभावे ॥ ननु वाचनिक एव अयमधिकारक्रमः ॥ पौत्रयोरपि वचनांतरादेवा

Indira Gandhi National Centre for the Arts

धिकारो भविष्यतीत्यत आह॥ पौत्रधिकार इति कथंचिदिति॥ पौत्री मातामहस्तेन
दद्यात्पिंडं हरेद्धनमित्यनेन पुत्रिकापुत्रस्य पौत्रतया धनाधिकारप्रतिप्रतिपाद
नात्। पौत्रस्यापि धनाधिकारस्यार्थतः प्राप्तेरित्यर्थः एवं अपुत्रपुत्रे संसारे दौहि
त्रा धनमापुयुः इत्यनेनापि तथैव पौत्रस्यात्राधिकारत्नाभ इति॥ दौहित्रादीत्यादि
नाजौवत्सुत्रात एदि परिग्रहः॥ प्रतिप्रनत्तुः प्रपौत्र पुत्रात्। सात पौरुष सांपिद्य
विधिवोधितवोधमाशंक्याह इदमिति॥ पुरुषत्रयमात्रविश्रांते वैधर्म्यात्प्रभती
ति॥ अनेनजन्मप्रभृत्युपकारकेभ्यः पुत्रादिभ्यो जघनत्वमुपपादितं॥ एवं पार्व
णपिंडदानाभावात्। अपितथात्वं वोध्यं। न च पुत्रादिभ्यः पूर्वं परिणयनात्प्रभृ
त्याश्रमधर्माचरणेनोपकारकत्वात्तस्याश्च्युत कथं संभवइति वाच्यं॥ अत्ना
भे चैव कन्यायाः स्नातकव्रतमाचरेदित्यादिना॥ आश्रमधर्माचरणे तस्या॥ अ रम
नियतत्वात्। जन्मप्रभृति महोपकारक पुत्रादितो जघन्यता या दुर्वारत्वात् १०

च स्वभ्रात्र इति उपलक्षणमिदं॥ श्वशुरान्यश्वशुराभ्यामपि वोध्यं तर्पणं प्र
त्यहं कार्यं भर्तुः कुशतिलोदकैः तत्पितुस्तत्पितुश्चापि नामगोत्रादि पूर्वकं॥ इ
ति काशीखंड वचनात्। उपवासांश्चेति अत्र प्रत्यहमिति विधानादेषां तर्पणा
नित्यं अन्येषां काम्यमिति वोध्यं। विदमोरिति अराधनेपति वुध्या विदमो श्वपू
जनं कार्यं पतिवुद्ध्या न चान्यथा इति काशीखंडवचनात्। उपवासांश्चेति शा
स्त्रोदितान्नित्यान्काम्यांश्च वा॥ अहोरात्रभोजनरूपान्॥ भोजन च तुष्ट
यनिवृत्तिरूपानेवोपवासांश्चेत्यर्थः॥ काम्योपवासा महाभारतोक्ताः अथ
त्रिरात्रे पंचरात्रे पक्षव्रततथापि वा॥ मासोपवासान कुर्याद्वा चांद्रायणम
थापि वा इति त्रिरात्रोपवासो न वैश्यशूद्रयोः॥ त्रिरात्रं पंचरात्रं वा तेषांपु
ष्टिर्न विद्यते॥ वैश्याः शूद्राश्च ये मोहादुपवासे प्रकुर्वते॥ इति भारतवचना
ज्जपुष्टिर्व्रतफलमिति॥ कश्चित्तु उपाहृतस्य शूपेभ्यो यस्तुवासो गुणैः सहा

Indira Gandhi National
Centre for the Arts

उपवासः स विज्ञेयो न शरीरविशोषणमिति॥ पारिभाषिकउपवासपरमेव॥
अत्रोपवासपदमित्याहुः॥ तन्न तस्य संवादितस्यैकविधत्वनविधानित्युपप
त्तेः॥ न चउपवाससामान्यपरत्वे वाशक्यनुष्ठास्थैं न दोषः सर्वास्मिन्नेवास्मि-
न्नेवाह्निकाम्योपवाससंभवात् इति वाच्यं॥ एतस्य संभवपरत्वाज्ञानवत्।
त्नोकांतरस्थं दुःखदायकस्थानत्वे स्थं तास्यति सुखदो तत्केष्टस्थानं प्रा
पयति श्रुतेरिति युक्तं पत्न्यः सत्वमिति वक्ष्यमाणहेतुः पुण्यापुण्य इति॥
शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समेति वचनादिः। पातयती त्यत्तोपी
त्यर्थः॥ अत इति। पत्न्यधिकारस्यन्यायसिद्धत्वात्। यतोऽत इत्यर्थः संत्या
दिवचनेष्विति अपुत्रस्य स्वर्यातस्य भ्रातृधनं तदभावेपितरौ जननी तो स
पत्नी वा ज्येष्ठा इत्यादिशा गुक्तेष्विधित्यर्थः॥ व्यवहितयोजना मा वा हस पुत्रस्ये राम
ति अविरोधाहिति॥ विदसुयात्तवल्क्यशंस्ववचनानो परस्परविरोधः प ११

रीहारायेत्यर्थः इदं च व्यवहितयोजनायां मध्यपतितस्योभयत्रान्वयेवाउभयत्रै
व हेतुः॥ ननु विदस्मृादिवचनेपि व्यवहितयोजनया विरोधपरिहारसंभवे व्यवहितयो
जनायां विनिगमकाभाव इत्यत आह न्यायस्येति वैधव्यातप्रभस्युक्तन्यायस्येत्यर्थः
तथा च न्याय एव विनिगमका इति निराकृतमपि केचिद्वादिमतं हेत्वंतरेणापि पुनर्नि
राकरोति नन्विति तथा चाश्रुतकल्पनागौरवपराहतमपि तदिति भावः॥ स्वविशेषणेव
विभक्तादिविशेषणोपादानेनैव विभक्तत्वादनपेक्ष्यमित्यत्रायं हेतुः वक्ष्यमाणनार
दवचनविरोधपरिहाराय सवर्णायास्तदभावे वानंतरवर्णायाश्च पत्नीत्वेन त्वन्यासां
भार्याणामिति व्यवस्थापति पत्नीत्वं चेति प्रथममित्यनेन तदसंभवेऽनंतरवर्णाया
अपि तथात्वं सूचितं॥ अत्र प्रमाणज्येष्ठेति अभिधानाज्ज्येष्ठा वा पत्नीत्यादिनाशंखादि
भिरिति शेषः॥ ननु शंखादिवचने ज्येष्ठायाः पत्नीत्वमवगम्यते तेन तु सवर्णाया
इत्यत्राह वर्णक्रमेणेति स्याः सजातीयाः एतच्चानुलोमजातायाः प्रतिलोमपरिण

पनविरोधान्तथाचैतद्वचनप्रासवर्णेष्वस्यसवर्णायामेवपर्यवसानेसवर्णायाःपत्नी
त्वंसिद्धमितिभावः॥अतोवर्णक्रमेणज्येष्ठत्वंयतःपरिणयनकनिष्ठापीतिक्षत्रियायो-
सत्यांप्रथमपरिणीतब्राह्मणीमरणेपश्चात्परिणीताब्राह्मणीपरिणयनकनिष्ठाप्येया
अन्यथाव्युत्क्रमविरहापत्तेरितिबोध्यंननुज्येष्ठायाःपत्नीत्वेअन्यासांपत्नीत्वेबाध
काभावः॥तथाचपत्नीत्वंसर्वासामेवज्येष्ठपत्न्याःपुनर्यज्ञाधिकारइत्येवकिंनस्यात्‌।अ
आहतस्याएवेति॥यज्ञादिति तथाचपत्युर्नोयज्ञसंयोगइतिव्याकरणस्मृत्यायज्ञसं
बधएवपत्नीपदस्यसाधितत्वात्‌।सवर्णायाएवयज्ञाधिकारात्पत्नीत्वंनान्यासामिति
भावःसवर्णायाएवयज्ञाधिकारइत्यत्रप्रमाणमाह तथाचेतिस्वजात्यास्थितयेतिए
तेनस्वजात्याअभावेअन्यासामपिपत्नीत्वंप्रतिपादितं॥ननुसवर्णायाअभावेइतरासां
सर्वासामेवपत्नीत्वंस्यात्‌।ततकथंसवर्णानंतरवर्णयोरेवपत्नीत्वमभिहितं॥अतआ रम
हसवर्णाभावपुनरितिप्रमाहयथेति॥अनंतरवर्णेवेतिएवकारेणव्यवहितवर्णाव्य ९२

वच्छेदः॥वैश्यानंतरवर्णत्वेनशूद्रायाधर्मकार्यप्रशक्तौनिषेधतिनत्वनेनेति॥ए
तेनेदमपिसिद्धंयद्ब्राह्मणीक्षत्रिययोर्द्वयोरप्यभावेअत्यंतापदिवैश्यापिब्राह्मणस्य
धर्मचारिणीद्विजत्वपुरस्कारेणैवशूद्रामात्रविधानात्‌॥अन्यथाब्राह्मणक्षत्रिययोः
शूद्राप्रशक्त्यभावेविनाद्विजइतिविहायवैश्याइत्येवब्रूयात्‌।अतएवानुपदंवक्ष्य
तिद्विजपरस्यचशूद्रानिषेधादिति॥चूडामणिस्तुपत्नीत्वंचइत्यादिग्रंथमन्य
थाव्याचष्टेयथापत्नीत्वंचेति॥याज्ञवल्क्यविहितवचनेनैवपुत्रत्वेनंपत्न्यभिगामी
स्युक्तेशंखेनतथाएवज्येष्ठत्वमुक्तंज्येष्ठत्वंयदिस्याश्चेतिवक्ष्यमाणादुत्तमवर्णाया
एवतत्रचमनुःशरीरशुश्रूषामित्यादिमनुवचनात्पतिशुश्रूषामेवप्रयोजकंविष्णु
नाचानरानंतरवर्णायाअव्युक्तेसकलवचनैकवाक्यतयाज्येष्ठायाधनहारित्वावगतेः
धनहारिण्योचयाज्ञवल्क्यादिभिःपत्नीपदप्रयोगात्‌।वक्ष्यमाणवचनेचानुतथा
भूतयोर्वर्तनमात्रंदत्वाश्राद्धीनोधनाधिकारित्वावगमात्‌।सवर्णानंतरवपत्नीत्वे

Indira Gandhi National
Centre for the Arts

णो योरेव पत्नीत्वमिति॥ अप्रजा इति पुत्रादिमात्रपर्यंताभाववानित्यर्थः॥ शेषा इतरभ्रा
तरः तेषामेव प्रकृतत्वात्॥ अतः स्त्रीणां भरणमात्रविधानात्तत्स्वेपि भ्रातॄणामधिका
रः प्रतीयते॥ तस्यैव नारदस्यैव वचनांतरमिति शेषः॥ अपत्नी नामिति व्यवहितवर्ण
शूद्राणामित्यर्थः॥ अतः स्त्रीणां पत्नीत्वापत्नीत्वाभ्यां द्वैविध्यात्स्त्रीयो भेदेन पत्न्यपत्न्योर्भे
देन उक्तार्थे स्मृतिप्रमाणमाह। अत एवेति म्रियमाणो धनाधिकारयोः यस्त्वेन पतितादि
व्यावृत्तिः विशेषानुपपत्तेरिति॥ अव्यावर्तकत्वेन वैयर्थ्यादिति भावः। विस्वदिविरोधा
दिति अत्र विनिगमनान्याय एवेति प्रागेवोक्तमिति भावः। असवर्णाविषयं वेति। एतन्मं
ते पत्नी वा ज्येष्ठत्यादिशंखवचनेऽकारप्रश्लेषात्त्वाज्येष्ठाइत्यर्थोऽवशेषः। तेन न विरोधः
पुवत्सभिप्रायम्वेति॥ विधवा योवनस्था च नारी भवति कर्मणा॥ आयुषः क्षपणार्थाय दा
तव्यं स्त्रीधनं सदेति युवत्याः। प्राणधारणमात्रोपयोगिधनदानमात्रविषयकहारीतवच राम
नैकमूलत्वादिति भावः॥ अविभक्तेति केचिद्वायुक्तन्यायो त्र हेतुः तेन वाक्येनोपस्थित १३

शास्त्रार्थकथने निर्णयानहे शास्त्रार्थकथनेन वाक्यरूपत्वं वाक्यस्यत्वस्य योग्यवाग्गा
दित्वसंदेहादिति॥ त्रिषूक्तकोटिषु विहितत्वाविहितत्वसंदेहादित्यर्थः। एकगोचरेति
अनुष्ठाने प्रवृत्तिः। अत्र पूर्वोक्तपक्षद्वये हारीतवचनविरोधोपि द्रष्टव्यः॥ यच्चत्तेनैवा
परमुक्तं स्त्रीणां त्वस्वधनाधिकारवचनानां वर्त्तनमात्रविधायकवचनानां च विरोध
परिहाराय वर्त्तनवचनमनूढावरूढाविषयं कृत्स्नधनाधिकारवचनं तूपरिणी
ताविषयमिति व्यवस्थापितं तदपि दूषयति यद
वरुद्धानामि
पीति॥ अवरुद्धा अंतःपुरचारिणी भोग्या कर्मकरी धर्मपत्नी नामिति अवरुद्धासु धर्मपत्नीत्वोक्तिरि
त्यर्थः॥ अनुग्रहो वर्तनविरोधादनेन सोपहासा चेयं॥ यथाश्रुतार्थक
स्तसामभार्यत्वाद्वर्तनमपि कुतः इत्युपहासः। यद्वा धर्मपत्नी नामिति। यथाश्रुतार्थक
मेव अनुग्रहार्थमिति। तासामधिकारबोधनादित्यभिप्रायः। किं पाल्ली गोचरेति सं
सगायोजकत्वावश्यकत्वे किमधिकेन सवर्णत्वासवर्णत्वादीनां प्रयोजककल्पने

नेति भावः। ननु मास्तु विशेषकत्वं न किं तु संसर्गासंसर्गाभ्यामेव विशेषः सर्वव्यापी
भवत्वित्यत आह। अयमपीति संसर्गासंसर्गकृतमित्यर्थः। पूर्वप्रपंचेन केचित्त्वाहिमतदू
षणावसरे तद्बृहस्पतिवचनविरुद्धमित्यादिप्रपंचेनात्र पत्नीतः पूर्वं सोदरस्याधिकारः।
पश्चादसोदरस्येति केचित्समादधिरे तदपि दूषयति सोदरेति। अत्र रत्नकरादयः ब्र
ह्मचर्यव्रते स्थितेति वचनात् सम्यग्विधवानां व्रतानुष्ठस्त्रीणां प्रथमं सर्वधनाधिका
रः किंचित्तद्व्रतचारिणीनामव्यभिचारिणीनां तदनंतरमधिकारः व्रतशून्यानां तथा
विधानां वर्तनमात्राधिकारः व्यभिचारिणीनां वर्तनेपि नाधिकारः। इति व्यवस्थामाहुः। अ
त्रापि किंचेत्यादि दूषणं द्रष्टव्यं॥ दानाधानेपि॥ अधमर्णेन बन्धकः स्वं तापरिमिताहारेण
स्त्रीणां दायादा दुहित्रादयः दुहित्रादीनामधिकारहेत्वेतरमाह पत्नी होति॥ हि यस्मात्।
पत्न्येव तेषां बाधिकेत्यर्थः। तेषां बाधिकेत्यर्थः॥ तेषां दुहित्रादीनां प्रागभावे इति इदं नरका
नुषज्जस्यमानस्यापि प्रागभावोस्तीति मतावलंबनेनाभिहितं॥ तन्मते दुःखपन्न राम
१४

स्यमानस्यापि दुःखस्य प्रागभावार्थिनः प्रायश्चित्तादौ प्रवृत्तेः प्रायश्चित्तं मा मे दुःखं मम मो भूदिति
कामनाया आनुभाविकत्वादिति प्रागेवास्य प्रतियोगिव्याप्यत्वनये तु प्रागभावपदमसत्ताभा
वपरं तेन पतिसत्त्व एव मरणे पत्न्याः प्राक्कालीनासत्ताभावे इत्यर्थः बाधकाभावस्येति स्वत्व
प्रत्यासत्त्येव तस्या बाधकत्वमित्यभिप्रायः वस्तुतो लाघवात्तस्याः स्वत्वस्यैव प्रतिबंधकत्वं
न तु तस्या इति बोध्यं॥ नाधीति दुहितृदौहित्राभावे पतिदायादसत्त्व इति शेषः स्त्रीधनाधिका
रिणो भ्रात्रादयः तेषामिति तेषां धनाधिकारप्रतिपादकवचनस्य स्त्रीधनगोचरत्वादित्यर्थः
ननु प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः॥ भर्तुः स्वाम्यं भवेत्तत्र शेषस्तु स्त्रीधनं
स्मृतं इति कात्यायनवचनात्तदपि स्त्रीधनं भवत्येवेत्याशंक्याह कात्यायनेनैवेति न पुन
रुक्तेति तथा च दायाधिकारवचनस्य पुनरुक्तत्वापत्त्या दायो न स्त्रीधनमिति भावः। तथात्वेन
कस्यैव मुनेः स्त्रीधने तिरुद्धाधिकारिद्वयकथनेन विरोधोपि द्रष्टव्यः। न च गोबलीवर्दन्यायात्त्वं
दायपदं तदितरस्त्रीधनानां ग्रहणार्थं स्त्रीधनं द्विधा मेदो वचनाभ्यां भविष्यतीति नोक्तदोष इति वाच्यं दायस्य

Indira Gandhi National
Centre for the Arts

स्त्रीधनवचनानां दायतरत्वेन संकोचापोक्षयाशेषस्तु स्त्रीधनमिति ॥ तत्र स्त्रीधनवचनानां दा-
यत्रैव वचने शेषपदस्यैव मुनिपरिगणित स्त्रीधनपरतया संकोचस्य न्याय्यत्वात्॥ दा
यस्य केनापि मुनिना स्त्रीधनमध्ये गणनाताश्र तएवविनियोगे सई श्वर इति नापहरं स्त्रि
यः कुर्युरित्यादिना दाये तस्याः स्वातंत्र्याभाव उपपद्यते चूडामणिस्तु दायपदस्य स्त्रीधना
धिकारिभ्रात्रादिपरत्वे दोषांतरमाह पुनरुक्तत्वापत्तेरिति व्याचष्टे स्वेऽपसेहरत्तिश्र
त इति प्रागभावे इति पूर्वोक्तार्थकं युक्तिमाह तदानो मितिइति पत्नीमरणोत्पर्थः ननु
दानाधानेति यदुक्तं तत्र प्रमाणमाह तथेति क्षानेति पूर्ववचनस्वरसात् व्याचष्टेऽप
भोगोपोतिएवं च भर्तुरुपकारस्यापेक्षणीयत्वे च औदेहिकक्रियात्वोर्थंपारलौकि
कोपकारार्थविनियोगे दाविति एवं च तद्धनदाधाने मतविक्षपरतेत्र तायदितदानदा
स्य एमेव तदहुमत्याकादाचित् पितृपक्षेभ्योपि दानमिति एवं चेति दुहितृतोऽभ्यर्हिता
याः पत्न्या एवं भागावशिष्टधने यद्धनं तराधिकारिणामधिकारस्तदासु तरां दुहितृनंतरं तद एम
९५

भावोक्तानंतराधिकारिणामधिकार इति भावः पितृधनाधिकारिणः स्वपुत्रपितामहाद
यः दुहित्रधिकारिणस्तु दुहित्रभावे दौहित्रादयः॥ दंडापूपायितमिति दंडापकर्षेतत्संबं
धस्यापकर्षः तथा पुत्रसंक्रांतधनस्य पत्नीगततयापकर्षेतत्संबंधस्य कन्याधनावशिष्ट
विशेषणस्यापकर्ष इति भावः दुहित्रधिकारो निरूप्यत इति शेषः॥ विशिनष्टि संतानचे
तु ए याधिकारिणीत्वेन अन्यसंतानादिति॥ अन्यस्य संतानो यथा नपिडदस्तथाऽयमपी
त्यविशेषः॥ असंतानामानाघ्वरादेः ततपुत्री दुहितृत्व पुत्रो विपर्यस्त पुत्रविपरीतापत्या
॥ उक्तादादिदोषगस्तावाइति केचित्॥ तदसद्दुहितृप्रसूत्यादिनेति हेत्वनुपपत्तेः कन्ये
वेति न तु दत्तया सहेत्यर्थः॥ पूर्वोक्तविशेषोऽविपर्यस्तपुत्रपरं नग्निकानागतत्रर्तु
कानाग्निकानागतातेवाइत्यमरकोषात्॥ परिणीतायाअनंतरं विवाहितायाः पुत्रदा
रेणेति दुष्टायाएतदुपकारणविशेषेपि धनाभावेनापरिणीताया ऋतुमत्तया संभावित
स्य भविष्यतो नरस्य प्रतिकर्तृत्वमेव कुमार्याः प्रथमं धनग्रहणे निमित्तमिति बोध्यं॥ स

Indira Gandhi National
Centre for the Arts

हृशेनोढाया अपि न धनाधिकारित्वमित्युक्तं कृतापुत्रिकाऽकृता लब्ध्या। अपुत्रस्येति। अ
पत्नीकस्येत्यपि बाध्यं॥ पत्न्यभाव एव कन्याधनाधिकारावगमात्। निषेधादिति। निषेधस्त
स्मादेव विशेषणात्। कन्यनीयइति कृताकृतावेत्येकवचनोपात्तत्वात्पुत्रिकाया अपि प
त्नीकुमार्योरनन्तराधिकारः स्यादित्याशंकामपनेतुमाह पुत्रिकापुत्रस्य त्विति। अनेन द्वारा
तोत्कर्षउक्तः स्वतोप्युत्कर्षमाह पुत्रिकाया इति तुल्यत्वे च पुत्रिकायां कृतायां त्विति॥
अनेन मनुना समविभागोक्तेरिति॥ पुत्रादिति॥ आदिना पौत्रप्रपौत्रपरिग्रहः॥ एवं
तर्हि यद्युपकार एव प्रयोजकस्तदेत्यर्थः॥ यत इति अत एव। विधवासधवयोः पुत्रव
त्योः विधवाया एव प्राक्पुत्रद्वारेणापि उपकारत्वात्प्रथममधिकार इति निरस्तं॥ भर्तृशुश्रूषा
यापि शुश्रूषाकारत्वाभावात्। धनग्रहणप्रयोजकत्वमाशंक्याह॥ भर्तृशुश्रूषापरत्वेति पू
र्ववचनेति॥ अंगादंगात्संभवतीत्यादिवचनोपात्तेत्यर्थः। तस्यैव हि हस्तेरेव सामान्य
र्यास्तेरिति यद्यपि विशेषकत्वेपि सामान्यवचनवैयर्थ्यं तथापि सामान्यवचनभावे कुमा

राम
५६

रीणामनूढात्वेनानधिकारप्रसक्त्या न वैयर्थ्यं दुढायास्तु दुहितृत्वपुरस्कारेणासामा
न्यवचनादधिकारप्राप्त्या विशेषकस्यापुनरुक्तत्वेनिभावः तस्याः पितृधनेत्वन्यः क
थमित्यनेनान्यवाधार्थत्वेनावैयर्थ्यमिति केचित्। विपर्यस्तपुत्रीयाः पुत्रात्यंताभावव
त्यास्तद्धनं ग्राह्यमिति तदपि पत्न्यभावे कुमार्यादीनां पत्नीबाध्यत्वादिति वाच्ये अतइ
त्तिउक्तोभयसूत्राभ्यां विपर्यये पुत्रिकाया मरणे मरणे कुमार्यादीनामधिकारे प्राप्तेभ
र्तुरधिकारस्य व्याहतिरिति समस्तोपसंहारः। प्राञ्चस्तु यतः पुत्रिकाया एव विपर्यस्तपुत्रा
यामारणेन तत्संक्रान्तदाये भर्तुरधिकारो न त्वधिकारेऽन्यासां दुहित्रादीनामप्याधिका
रे अनन्तरं विपर्यस्तपुत्राणां तासां मरणे भर्तुरधिकारस्य व्याहतिरेति व्याचक्षुः तदविप
र्यस्तपुत्राया इति एतस्यैव विवरणं उत्पन्नमृतपुत्राया इति अत्र पक्षान्तराभावाच्चका
रः काचित्कः पाठः न प्रामाणिकः अपात्रत्वं स्वल्पितविवक्षितादिवचनमेवचनमेवउ
त्पन्नमृतविषयं॥ मनुवचनं तूत्पन्नपुत्राविषयमिति वैपरीत्यमिति वन कुतः॥

Indira Gandhi National
Centre for the Arts

अनुत्पन्नपुत्राया इवाविपर्यस्तपुत्राया अपि पिण्डोपकाराभावेनाविशेषादिति चेन्नवि पर्यस्तपुत्रायाः पुत्रोत्पत्तावपि तुः पुन्नामनरकनिवर्तकत्वेन कृतोपकारकतया स्वामित्वे निर्व्यूढे पितुरितरापेक्षया तस्या एवाधिकोपकारत्वादधिकारो युक्तः। अतएव दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसीत्यनेन दौहित्रमुखदर्शनस्यापि नरकनिस्तारकतेति॥ पुत्रानुत्पत्तौ तु पिण्डोपकाराभावात्तन्न स्यादेव न स्वामित्वं कुतस्तस्य स्युरिति तत्पितृधनाधिकारित्वं कन्यादौ नामैव तत्रानौ तत्राधिकारस्यान्याय्यत्वात्। यद्यपि वंध्यात्वेनावधृतायां जीवेत्यामप्युचितं तथापि प्रेतायाम् इति प्रेतपदग्रहणान्न जीवेत्स्यां तस्यामन्यदुहित्रादौ नामधिकार इति परं तु नेदं वचनं पुत्रिकापितृदायपरं किंतु तत्तोयसोदर्यादिकादिधनानां तदादिविषयं। पुत्रिकायाः पुत्रत्वेन तस्यास्तद्धनेपित्रधिकारे प्रसक्तौ तदपवादकमित्याहुः॥ दौहित्राधिकारार्थमाह पिंडदानमेव चेति चकारो युक्तं तदैरसूचनाय एवकारश्चोपकारस्य प्राधान्यार्थः।

राम

५७

एतेन विपर्यस्तपुत्रायाः पिंडदानायोग्याया दुहितुः सुतरां नाधिकारः इत्यपि सूचितं॥ यथेत्यस्य विवरणं येनेत्यादि तथैवेत्यस्य विवरणं तेत्यादि॥ न च पुत्रिकापुत्रे तथा वद्दौहित्रसामान्याधिकारे नेदं वचनं किंतु पुत्रिकापुत्राधिकार एवेति॥ एतेनोक्तवचनस्य पुत्रिकाविषयतस्या एवाधिकारे पिंडदानोपकारस्य हेतुतया निर्देशात्॥ अपुत्रिकाणां दुहितृत्वपुरस्कारेणैवाधिकारात्॥ नाद्यस्या विपर्यस्तपुत्राया अपि धनाधिकारस्य निर्व्यूढत्वात्॥ तदनंतरं तद्भर्तुरेवाधिकारो न्याय्यः। इति पूर्वोक्तपूर्वपक्षोपि सूचितः॥ परमशोदिति॥ एतद्वचनांतरमेवैतस्मै वचनस्य बृहस्पतिना अभिहितत्वात्तदतिभावः। प्रत्यासत्त्येति कृतापेक्षयाः कृतायाः पश्चान्निर्दिष्टनाम्नि मतस्या इत्यनेनद्विति एतेन स्या एवाव्यवधानातिरेकादित्यर्थः। अतएवेति। निर्दिष्टतो त्यक्ते लान्वयः। नद्विति एतेन नति एतद्वचनेन न पुत्रिकापुत्रविषयं किंतु दौहित्रसामान्यविषयं॥ देहसत्त्वस्य हेतुत्वेन नति एतद्वचनेन पुत्रिकापुत्रविषयं किंतु दौहित्रसामान्यविषयं॥ अकृतापरमभिसंधिक हैशादित्यतोपि सिद्धं॥ ननु पौत्री मातामह इत्यनेन इत्यभिधानात्॥

Indira Gandhi National
Centre for the Arts

नापरं॥ अपुत्रिकापुत्रस्य मातामहपौत्रत्वानुपपत्तेः॥ अभिसंधिमात्रात्पुत्रिकेयमिति॥ गौतमदर्शनात्। अभिसंधिमात्रेणापि पुत्रिकासंभवात्॥ तथा चाहुर्नेसर्थाश्नेतद्वचनमपुत्रविषयमत आह किं चेति॥ अन्यं दौहित्रमिति। एतेनाक्तनेति वचनेपौत्रीसत्तुवादादर्स्तुपुत्रिकापुत्रपरं। दौहित्रा घ्यखिलं आकल्पमिति वचनं तु दौहित्रपदश्रवणात्। अपुत्रिकापुत्रपरएवेत्यक्तेनापुत्राधिकारः सिद्ध एवेति दर्शितः॥ अभ्युपगम्यपुत्रिकात्वेनस्वीकृत्य अत एवेति यथापि तद्धनेस्वाम्यमिति वचनस्योक्तानन्तदौहित्रविषयत्वादेवेत्यर्थः॥ बृहस्पतिवाक्ये पौत्रादिपदाभावादुक्तनापुत्रिकेत्येवार्थः इत्याशयेनाह स्मृत्येनेति। विरोधादिति॥ एतेन पुत्राभाव एव दुहितुरधिकारस्य प्रतिपादनात्। सुतरांमेव दौहित्रं तदनन्तरत्वादित्यर्थः प्रागुक्तरूपायाविपर्यस्तपुत्रयोः दुहितवद्भागविधानात्॥ नन्तुल्याभिधानात्। जघन्यतावगतेरिसमेणान्वयः॥ अन्वेतुः उपमेयस्य उपमानापेक्षया हड तकर्षवोधस्य सार्वलौकिकत्वमिति। हेत्वेतरमाहता

सुतेपिति चकारोभिन्नक्रमे। यथेतयाप्यर्थोत्रित्यार्थवोधकतस्सुतोपीति शब्दार्थनेयानि द्वैशब्देत्यर्थः॥ अत एवानंतरमिति॥ यथापि तद्धनेस्वाम्यमित्यनन्तरमित्यर्थः॥ ततभशब्देनेति अन्यथापि चोरसूचने दौहित्राभावएव भ्रात्रधिकारे पितरौ भ्रातरस्तथेत्यादिनायाज्ञवल्क्यादिविरोधः स्यादिति भावः॥ स एव दृष्टान्तोपि एडाविति मनुवचनं पुत्रिकापुत्रपरमेव पितृधनग्रहणपक्षेऽभयपक्षपिंडदानविधायकं पितृधनाग्रहणे तु केवलमातामहपक्षस्यैव पिंडदानमिति अपुत्रिकापुत्ररूपदौहित्राद्यधिकारस्तु पत्नी दुहितरश्चेत्यादिना निर्दिष्टाधिकारिणामनंतरमेवेति वालोकतमं तदपाकर्तुमाह। यत्त्विति बृहस्पति वचनेति। तथैव तत्सुतोपीत्येमातामातामहधनेइत्यनेन॥ र्थः वाक्यवचनमिति शिशोरिवानभिसंहिततात्पर्यस्य वचनमित्यर्थः॥ नन्वेवं याज्ञवल्क्याद्युक्तक्रमविरोधः। तेद्दुहित्रनंतरं दौहित्रस्यानिर्देशादत आह वक्ष्वचनेति दुहितृरूपानूप्यभेदेनहैविध्याद्द्वचनान्वयानुपपत्यातथैवता सुतोपीति

रम ९ 

Indira Gandhi National
Centre for the Arts

हस्पतिना दौहित्रस्य दुहितृधर्मातिदेशेन चा॥ हतु स्वार्थलक्षणया दुहितृपदस्य दु
हितृदौहित्रोभयपरत्वादितिभावः॥ लक्षतावच्छेदकस्तु अनूढो दौहित्रान्यतमत्वा
दिकमिति बोध्यं॥ असगोत्रत्वे सति साक्षात्परस्परासाधारणपार्वणकर्तृत्वमिति कश्चि
द्वा प्रपौत्रपर्यंतपरमिति। अत्र लक्षतावच्छेदकसतिपार्वणकर्तृत्वं वक्ष्याम इति संक्षे
पवचनस्यावसरेऽद्यस्यर्थः॥ दुहितृपदस्य दौहित्रपर्यन्तपरत्वाभावे दोषमप्याह किं
चेति॥ दौहित्राधिकारं निरूप्य कन्याधिकारे विशेषमाह यदेति। केचित्तु पुत्रिकायां विप
र्यस्तपुत्राया अभावे तत्पितृधनं न भर्तुः किं तु किं तु पितृधनाधिकारिणमित्युक्तं॥ अपु
त्रिकायास्तथात्वे किं स्यादत आह॥ यदेति इत्यादुः म्रियेत इति। पुत्रमनुत्पाद्येत्यादि तस्येति
तस्याधिकारार्थवचनस्येत्यर्थः॥ आदिना पितृमातृभ्रातृणां ग्रहणं॥ उक्तार्थे युक्तिमाह
भुक्तितेति। अधिकारे अधिकारसाधारणे अयमर्थ इति जाताधिकाराभावे अनन्तर
धिकारिणामूढादीनामधिकार इत्येवरूपोऽर्थ इत्यर्थः॥ ननु यावद्वचने हि वाचनि राम १९

कमिति न्यायात्यल्यधिकार एवं तथात्वे अन्यथा तत्र पत्नीपदोपादानवैयर्थ्यापत्तेः अ
तः पत्नीपदस्य स्त्रीमात्रपरत्वमाह यद्वेति पत्नीति पत्नीति भुञ्जीतामरणात्क्षान्ता इत्यत्र
पदं स्त्रीमात्रोपलक्षकमित्यर्थः॥ ननु किमत्र स्त्रीमात्रोपलक्षकत्वे बीजमिति चेदत्रा
यं भावः स्त्रीसंज्ञानधनस्य स्त्रीधनत्वाभावादधिकारिविशेषस्यात्र वचनादप्राप्त्याका
ङ्क्षायां कल्पने सादृश्यात् स्त्रीसङ्क्रान्तधनमात्रस्य पूर्वस्वामिदायादरूपोधिकारीक
ल्प्यत इसे तदर्थे पत्नीपदस्य स्त्रीलक्षकत्वमिति॥ अथैवं पत्नीतोऽभ्यर्हितोयाः पु
त्रिकायास्तथादर्शनात्। पुत्रिकौरसयोः साम्यात्पुत्रादिरहितस्यानंतरं तदैद्धनेत
त्पत्यानस्यात्। स्याच्चेद्दायादानां दुहित्रादीनामिति चेन्मैवं पुत्रस्य जन्मनैव कृतो
पकारतया तत्र तस्य स्वामित्वेन निर्व्यूढे तदनन्तरं तद्दुत्तराधिकारिणां तत्पत्न्यादी
नां तत्राधिकारस्य न्याय्यत्वात्। विपर्यस्तपुत्रायास्तु पुत्रिकायाऽपकारलेशाभावात्त
दधिकारस्यैव निर्व्यूढे तथा तदनंतरं दायाधिकारस्यैव न्याय्यत्वादिति॥ ॥ दौहित्रा

धिकारं निरूप्य तदनन्तरं पितुरधिकारमाह तेहि त्रस्याभाव इति न मातुरिति पितुः
पूर्वमिति शेषः पाठे वक्ष्यवचनेपि पितराविति द्वंद्वनिर्देशात् योगपद्याधिकारमाशं
क्याह नापि युगपदिति॥ तदभावे इति एतेन तदभावे मातृगामि तदभावे पितृगामीति
रत्नाकरादिमितिस्वितपाठो वक्ष्यमाणविरोधाद्भ्रम एवेति ध्वनितं तत्पितृपर्यन्ताभा
वे इति वक्ष्यमाणन्यायोपलब्धविष्णुवचने न मनुवचने अपसपदस्यपत्न्या दर्हेह
स्पति वचने च भार्यासुतपदयोः पौत्रादेरुपलक्षकत्वस्यावश्यकत्वात् पितुरुप
लक्षकत्वयुक्तत्वादिति भावः न्यायमाह न्यायागतेत्यादि तेहि त्रासरतोऽधिका
रो हेतुमाह मतपिंडेति मातृतः पूर्वं अधिकारे हेतुमाह मात्रादिभ्य इति युगप
दधिकाराभावे हेतुमाह पितरावित्यत्रापि पितृक्रम एवेति पितुः प्रतिपादित
त्वादिति भावः प्राकृप्रतिपत्तिं दर्शयति तथाहीति तथा च पितराविति पितृक्रमा राम
भिधानपरमेव तत्मापक्षं तूक्तन्यायोपबृंहित विष्णुवचनमेवातो वृद्धिवचन २०

नमेवातो वृद्धिवचनावः। तत्साहित्यमभिधानक्रियापेक्षयैव गर्गा भुज्यतामिति
वदिति वैःभो॥ केचित्तु पितरावित्यत्र युगपदेव पित्रोरन्वयबोधं तथा च क्रमिका
न्वयबोधस्य क्रमिकपदार्थस्मरणव्यापकतया प्रकृते व्यापकस्य क्रमिकान्वयबो
धस्याभावेन व्याप्यस्य क्रमिकपदार्थस्मरणस्याप्यभावात् युगपदेव द्वयोरुपस्थि
त्या युगपदेवाधिकारः पित्रोरिति वदंति तन्मतं दूषयति अत इति उक्तमेव क्रमेण क्रमि
कोपस्थितेरावश्यकत्वादित्यर्थः क्रमज्ञानं क्रमिकपदार्थस्मरणक्रमिकाभिधानं क्र
मिकान्वयबोधस्तत्साधनमित्यर्थः॥ ननु क्रमिकाभिधानं इत्यनुमानमिति इति व्याप्त
हेतोयेरनुमानं व्याप्याभावसाधने व्यापकाभावरूपं लिंगं प्रमाणं अर्थासाधनं अ
र्थासाधने स्वरूपासिद्धि हेतुमाह व्यापकनिवृत्तेरिति तथा च तयोरन्वयबोधः क्र
मेणैवेति भावः॥ ननु द्वंद्वस्थले साहित्येन युगपदन्वयबोधान्न तु क्रमिकस्तथा च कथं
व्यापकनिवृत्तेरसिद्धिरित्यत आह। विष्णुवचनेति तथा चान्वयबोधस्य यौगपदिके

Indira Gandhi National
Centre for the Arts

त्वेपि नाधिकारयौगपदिकः। विह मुविरोधात् किंतु क्रमिक एव यथा पत्नी दुहितर
श्चैवेत्यत्र सर्वत्र दुहितॄणामेकान्वयविरोधकत्वे विषयत्वेपि वचनोत्तरवत्वात्
कुमार्यादिक्रमेणाधिकार इति॥ पितुरनन्तरं मातुरधिकारमाह पितुरिति अस्यन्या
यमूलत्वमाह युक्तं चैतदिति। भ्रात्रादिभ्यः पूर्वमिति॥ यद्यपि भ्रात्रापि तद्भोग्यान्न
पिण्डदस्तथापि पिण्डदस्तथापि गर्भधारणाद्युपकारकत्वेपि न भ्रातुर्मातृसंबंधीनस्वा
म्यो न प्रथमं मातुरेवाधिकारः इति गौरवातिरेकेति। सहस्रं तु पितुर्माता गौरवेणाति
रिच्यत इत्यादिनेत्यर्थः। उपसंहरति अत इति पितृतः इति भ्रात्रादिभ्यः पूर्वमित्यादि परतः
बोध्यं॥ पितृसंतानाद्भ्रात्रादेः पितामहसंतानात्पितृव्यादेः अन्यथेति उक्तक्रमेणाधि
कारकल्पनेइत्यर्थः। क्रमविरोधादिति ननु वाचनिक एव पितरौ भ्रातरस्तथा इति क्र
मः स च पितामह्याः कल्पनां विना कथमनुपपन्नः मैवं मातुः पदस्य रयापिण्डत्रयस्य राम
धनिभोग्यस्य दानेपि साम्यात्। ततश्च पिण्डत्रयदातृतया श्रेष्ठात् भ्रातृतः पूर्वमधिका २२

रो गर्भधारणाद्युपकाराद्वेवदन्निति भिरुक्तः एवं पितामह्याद्यधिकारोपि यदि साक्षात् तद्भो
ग्यपिण्डद्वयदातुः पितृव्यादन्यद्वारेण तद्भोग्यपिण्डदायापि तामह्या धनिपितृजनने न पितृव्य
धनसंबंधमूलतया चाधिकोपकारकत्वे न पितृव्यं बाधित्वा धनाधिकारो न भवेत्तदोक्त
रूपस्याप्रयोजकत्वात्। मातृभ्रात्रोः क्रमाभिधाने मुनीनां नस्यादिति भावः केचित्तु पिता
मह्योपि पितृव्ययोः पर्यायेकि नापि नोक्रमतः कल्प्यं तथा चान्यथा कल्पने मातृभ्रातृस्थ
लोक्तस्य उपकाराधीनाधिकारक्रमस्य विरोधादित्याहुः अपि शब्दः समुच्चितार्थ इति व्या
ख्यानवाक्यस्यापि शब्दसमुच्चितार्थ इत्यर्थः एतच्चापि तदभ्रातरस्तथा इति मातृगामी स
भिधाय तदभावे भ्रातृगामी त्यादौ कथं श्रुतिमूलत्वादुक्तं॥ मातुरनन्तरं भ्रातुरधिका
रं वक्तुं शेनिरूपयति मातुरभाव इति तथा भ्रातृपुत्रो पौत्रेति तथा च भ्रातृतत्सुत्रयोर्युगप
दधिकारः स्यादिति भावः। तत्स्थानपादिति धानिकार्यकारित्वेन धनिस्थानपादित्यर्थ
अनेन रूपादि मृतभोग्यपिण्डत्रयदातृभिन्नादित्यर्थः नन्वेवं भ्रातुर्बलवत्वान्मातृतः

Indira Gandhi National
Centre for the Arts

प्रागधिकारः स्यात्॥ अत आह मातृमातृमृतत्वाच्चेति॥ अथापकारकत्वेपि भ्रातरस्तु
भ्रातस्सु तद्इसनेन्यथासिद्धवचनत्वाद्युगपदधिकारोस्तु इत्यत आह किं चेति अन्यत्रा
पि भ्रातृपुत्रयोरधिकारेपि॥ एवं चेतदिति उपकारक्रमेणैवाधिकार इदुपकारता
रतम्येन क्रम इति स्थिते चेदित्यर्थः अत एव भ्रात्रनन्तरं भ्रातृपुत्रस्याधिकार इदेवपू
र्वोक्तेति तदभावे भ्रातृपुत्रगामीति विदसुवचनेत्यर्थः अन्यथा पुत्रत्वानिदेशवत्त्वे
नैवाधिकारः स्यादिति अधिकारस्तिशेषः॥ भ्रात्राधिकारविशेषमाह तत्रापीति प्रथ
मं सोदरस्याधिकारे प्रमाहतदुक्तमिति॥ किंच एकमातापितृजन्यपुंस्त्वमेव भ्रातृप
दशक्यतावच्छेदकं तथा च सोदर एव भ्रातृपदवाच्यः वैमात्रेयादौ च पूर्वरूपसंज्ञानत्वे
न रूपेण गौण एव भ्रातृपदप्रयोगः॥ एवं च सति सोदराभावे भ्रातृत्वस्याधिकारेयुक्तः त
दभावे भ्रातृपुत्रगामीति विष्णुवचनात्तत्कथं सोदरत्वरतः सापत्न्यभ्रातुरधिकारेव एम
बुधेरित्यत आह एकप्रभवत्वेनेति तथा च मातापितृत्वानि वेशेन एकशरीरजन्यपुंस्त्वमेव २२

भ्रातृपदशक्यतावच्छेदकं त्वालाघवादिति भावः वैमात्रेयस्य भ्रातृपदवाच्यत्वे मुनेः स्वरस
माह तथा चेति संसृष्टिन इति संसृष्टिनो ज्ञातस्य संसृष्टिनाऽन्तरस्य पुत्रस्यापरः संसृष्टिर
घातद्दर भ्रातृपुत्रयोरनंतरेत्यर्थः सोदरादिति संसृष्टसंसृष्टिसाधारणोक्तिः जघन्यत्व
मिति सोदरस्य तु सोदर इत्यनेन सोदरस्यैवाधिकारप्रतिपादनादिति भावः न वेति एतद्वच
नस्यासोदरेणासंसृष्टिनासोदरस्य तु न्याधिकारकर्तृपक्षे जघन्यत्वकोटिः नान्योदर्यधन
स्यार्थमाह न पुनरिति अन्योदर्यमात्र इति संसृष्टसंसृष्टिसाधारणार्थः॥ प्रथमे संसृष्टिवैमात्रे
यातू॥ सोदरपदमिति सोदरस्य तु सोदर इति पूर्ववचनस्थसोदरपदमित्यर्थः नान्यमातृ
ज इति तथा च पूर्वापरविरोधमयादेवकारोऽध्याहार्य इति भावः॥ अनुषंगकल्पने गौरवा
दाह संसृष्टपदमेवेति अभिधत्त इति गर्भसंसृष्टार्थकत्वादिति भावः॥ अत एव संसृष्टप
दस्य सोदरार्थकत्वादेव पूर्वार्द्धस्येति तथा चान्यमातृजसंसृष्टः केवलो न गृह्णीयादित्यु
त्तरार्द्धार्थः॥ निर्गलितार्थमाह तेनेति अपि च शब्दमिति तयोः समुच्चयार्थकत्वादिति भावः॥

Indira Gandhi National Centre for the Arts

अथेदं चिन्त्यते संसृष्टसोदरासंसृष्टसोदराभ्यां विभज्य ग्रहणं न युक्तिवचनप्राचीनस्वरसासि-
द्धं॥ तथाहि संसृष्टित्वं विनिगमकं तदभावएव विनिगमकं॥ अन्यथापितृव्ये संसृष्टिनि
वैमात्रेयस्याधिकारो न स्यात्॥ न वैतद्वचनं भ्रात्रधिकारमात्रविषयं सामान्ये बाधकाभावा
त्। पितृआदिसंसर्गविषयवत्वस्य वक्ष्यमाणत्वात्। वचनस्य यथोक्तरीत्या व्याख्यानेव
॥ इत्यादिन्निक्रियानुषंगः नान्योदर्यद्रव्यं वैयर्थ्यं मात्रपदाध्याहारश्चेति दूषणं नि प्राचो
नाश्च श्रीकरादयो युगपद्विभागं तयोर्निषिद्धवन्त इति तस्माद्वचनस्यायमर्थः संसृष्टी चेन्ने
दानस्य धनं अर्थादपरः संसृष्टी अन्योदर्यो नैहरेत् सोदर्यो न हरेत् तदा को गृह्णीयादित्यत आह असं
सृष्ट्यपि॥ अपि नासंसृष्टसंसृष्टी वा सोदर एव गृह्णीयात्॥ अन्योदर्यस्याहरणे हेतु
माह॥ अन्यमातृज इति अन्यमातृजत्वेन षाट्पुरुषपिण्डदानं सहोदरेणान्यत्वप्र
तिपादनात्। यतोऽन्यमातृजो न गृह्णीयादित्यर्थः॥ इत्थं च व्याख्याने संसृष्टसोदरासं
सृष्टसोदरयोस्तुल्यवद्ग्रहणयुक्त एवेति सुधीभिर्भाव्यं॥ श्रीकरमतं दूषयितुमुत्थाप राम
२३

---

यति यच्चेति असोदरसंसृष्टिमात्रेति असोदरः संसृष्टी केवलो यत्र तद्विषयत्वे त-
स्मिन् विषये तस्याधिकारबोधकत्वे इत्यर्थः। केवलत्वेनेन सोदरसत्वव्यवच्छेदः॥
न्यानपेक्षणाद्वि दौध्यन्तरानपेक्षप्रवृत्तत्वात्। विध्यन्तराविषयविषयत्वादिति
यावत्। सोदरमात्रेति सोदरः केवलो यत्र तद्विषयत्वे तस्मिन्विषये तस्याधि
कारबोधकत्वे इत्यर्थः। अत्र केवलत्वेनासोदरसंसृष्टिव्यवच्छेदः॥ निरपेक्ष
त्वादिति पूर्वोक्तार्थः कं उभयोस्तथा विषयोः सोदरासोदरयोः प्रवृत्तौ प्राप्ति-
मितं॥ द्वयमेवेति संसृष्टिनस्तु संसृष्टीति सोदरस्य तु सोदरः इति च विधिद्वय-
मित्यर्थः॥ अन्योन्येति संसृष्टिनस्तु संसृष्टोत्यन्तसापेक्षं सोदरस्य तु सोदर इत्यस्य विधा-
यकत्वात्। सोदरस्य तु सोदर इत्येतत्सापेक्षं संसृष्टिनः स्तस्यस्य विधायकत्वामित्यर्थः॥
स्यापेक्षत्वं चेति॥ अस्य विषयः प्रागेव दर्शितः॥ विधिवैषम्येति संसृष्टी कश्चिदन्यनिरपेक्षः
स्वयमेव गृह्णीयात्। सोदरेऽसंसृष्टिनि सति तु तत्सापेक्षस्तेन सहेत्यर्थः इति संसृष्टी

Indira Gandhi National
Centre for the Arts

स्वविधिभेदरूपं वैषम्यं॥ एवं सोदरो ऽसंसृष्टी कश्चिदन्यनिरपेक्षः स्वयं गृह्णीयात्। सति सं
सृष्टसोदरे तु सापेक्षस्तेन सहेति सोदरस्य तु सोदर इति अस्य च विधिभेदरूपं विधिवैषम्यं तत्
प्रसंगादिसर्थः॥ विधिवैषम्ये दृष्टान्तमाह द्वयोः प्रणयन्तीति॥ पर्वं च तु ष्ट्येति॥ चातुर्मास्यया
गप्रसंगे वैश्वदेववरुणप्रघासशाकमेधशुनाशीर्याख्याश्चत्वारो यागाः। चातुर्मास्यसाध्या उक्ताः
तत्र उपाद्रवंति न वैश्वदेवे उत्तरवेदिमुपकिरंति॥ न शुनाशीर्ये उभयवा एतौ यज्ञस्य यद्वरुणप्रघा
सः शाकमेधश्चेति द्वयोः प्रणयन्तीति श्रुतिरास्ते॥ अस्यार्थः अत्र पर्वसंज्ञके यागे चतुष्के उत्तरवेदिं
अग्निप्रणयनोपयोगिपात्रेविशेषं उपद्रवंति निर्माणं संपादयंतीत्यर्थः॥ उत्तरवेदिरग्निप्रणय
नार्था॥ अत्रोत्तरवेदेः पर्वत्वेन यागचतुष्टये सामान्यविधिः अत्र प्रकृतीभूतदर्शपौर्णमासौ यस्या
ग्निप्रणयनस्याग्निदेवप्राप्तेस्तदंशे न विधिः॥ किंतु तदर्थे उत्तरवेदिमात्रं विधीयते इत्थं च द्व
याः प्रणयंतीति न्यायागमेष्वेवोक्तं॥ अग्निप्रणयनार्थकोत्तरवेदे यागद्वयविधाने अग्निप्रणय
नस्यापि यागद्वयोपयत्वस्य सिद्धत्वादिति॥ न वैश्वदेवे न शुनाशीर्ये उत्तरवेदिमुपकिरंति॥ अत्र एम

२८

यागद्वये वैश्वदेवत्वादिना विशेषविधिद्वयं यागद्वयोरेवाग्निप्रणयनस्य वास्तविकत्वात्तत्
द्धेतुभूतं यागद्वयप्रशस्त्यमाह॥ उभे वेति सहान्ताविल्यर्थः यज्ञस्याप्यज्ञानां मध्ये अन्तौ द्वयोः प्र
णयंति अग्निमिति शेषः॥ अतो विशेषविधिद्वयस्य निषेधरूपत्वे निषेधविधेः सामान्यविध्यप
ओदकत्वात उपजीव्यबाधायोगात्सामान्यविधिरपि निषिद्धसानयागद्वये प्रवृत्तौ सामान्यविधेरपिनि
षेद्धमानयागद्वये प्रवृत्तौ सामान्यविधेर्निरपेक्षविधायकत्वं शाकमेधादियागद्वये विकल्पसा
पेक्षविधायकत्वे च वैश्वदेवादियागद्वये॥ तथा च शाकमेधादिद्वयोः सदैव एव वेदिं वपेति वैश्व
देवादिद्वयस्त्विच्छया वपंतीति॥ विधिभेदरूपं वैषम्यं स्यात् तस्मादत्र पर्युदासलक्षणया वैश्व
देवशुनाशीर्यभिन्नपर्वाख्यमार्गे उत्तरवेदिं वपन्तीत्येक एव विधिर्द्वयोः प्रणयन्तीत्यधिकरणीय
था विधिवैषम्यं तथा प्रकृते प्रीतिपूर्वेणान्वयः॥ यत्रैवेति सोदरासत्त्वस्थले असोदरे संसृष्ट
सत्वस्थले च संसृष्टिने तु संसृष्टीस्ये तत्रये विपक्षविधायकत्वं बोध्यं॥ उभयोः संसृष्टिनन्तु
संसृष्टीति सोदरस्य तु सोदर इत्येतयोः प्राप्तनीति विशेषवचनाभावादिति शेषः॥ इत्थंनि

Indira Gandhi National
Centre for the Arts

रपेक्षयापेक्ष्यविधानेन दोषमुपन्यस्य स्वयं विधिद्वयमुत्सर्गापवादभेदेन व्यवस्थापयति। त
स्मादिति अत्र संसृष्टस्यैवेति न त्यापि सोदरपदार्थत्वेनापवादविषयत्वादिति भावः। इत्यन्त
मिति श्रीकरमिश्रैरुक्तमिति पूर्वेणान्वयः॥ नहीति द्वयोर्विध्यो॥ उभयत्रेउदाहरणद्वयोः
एकैकशः प्रवृत्तयोः परस्परनैरपेक्ष्येण प्रवृत्तयोः विधिवैरूप्यमिति॥ सापेक्ष्यनिरपेक्षो
दासीन्येन संसृष्टिनस्त्वित्यादिना संसृष्टिमात्राधिकारविधाने सोदरस्येत्यादिना सोदरमात्रा
धिकारविधाने च परस्परापेक्षा नास्ति युगपदुपस्थितौ तु उभयोरेव युगपत्प्रवृत्तिरिति न वा
क्यार्थैव दक्तरीत्या प्रसक्तं विधिभेदरूपं विधिवैषम्यमिति भावः। अत्र प्रतिवधिमाहके
वलोद्गात्रिति ज्योतिष्टोमे हविर्धानो साम गृहमेके॥ अपरं वहिष्पवमानाख्ये तत्र च यथो
क्तक्रमेण हविर्धानीगृहात्। आत्विजो वहिष्पवमानाख्यं गृहं गच्छन्ति गच्छतां च मध्ये
उद्गाता आत्विग्यदि रवलति तदा सर्वस्वं दक्षिणाविधिः यदि प्रतिहर्त्ता आत्विक रवल
ति तत्रासर्वस्वदक्षिणाविधिश्चेति विधिद्वयमस्ति एतयोश्चैकैकस्य स्खलनस्थले ए राम

२०

के कशः प्रवृत्तत्वात्। युगपत्स्खलने नैकस्यापि प्रवृत्तिः स्यात्। भवत्यतो विधिवैरू
प्यात्। तथा चात्र प्रथमतः प्रतिहर्त्रे सर्वस्वं किंचिद्दक्षिणां दत्वोद्गात्रे सर्वस्वं दायते
इति युक्तिसिद्धः पावस्करेनः सिद्धान्तो भवन्मते व्याहतः स्यादिति भावः अपच्छेदनतिस्ख
लनेनेत्यर्थः॥ अत्रैव प्रतिबन्ध्यन्तरमाह॥ चेति। अयमर्थः दर्शपौर्णमासयागेऽनूयते
चातुर्होत्रा पौर्णमासीमभिमृषेत्पंचहोत्रामावास्यामिति॥ अत्र चातुर्होत्रपदेन सप्तवि
होत्रेत्येको मंत्रश्च तेन तस्य यत्र नियोगस्तच्चातुर्होत्रा पौर्णमासीमिति च समभ्यर्थे द्वि
यातेन पौर्णमास्यामिति। तदर्थः। चातुर्होत्रामिति च परिभाषा प्राप्तिः पृथिवी होत्रेत्या
दिमंत्रस्य करणता प्राप्तये न तत्र पौर्णमास्यां पृथिवी होत्रेति मंत्रेणाभिमृषेत स्पृ
शेदिति विधिप्राप्तौ किमिति स्पर्शकर्मापेक्षायां वाक्यान्तरोपाश्रितानि ऐन्द्रे दध्या
दीनि हवींषि प्रकर्मत्तयान्वीयन्ते॥ चूडामणिस्तु पौर्णमासीपदेन कुर्मी धीयते भि
कर्मणस्तु स्पर्शाभावात्। कालोनं मुख्यं हविरेवोपांसुयागीये ऐन्द्रे दधिरूपं प्र

Indira Gandhi National
Centre for the Arts

त्यायत्नते एवमग्निमवाक्येपि अमावास्यापदेनापि तदानीकतेव्याग्निसोमीयस्थपयो
रूपंचमुख्यं हविः प्रसाध्यते इतिव्यावष्टे॥ एषचविधिर्दर्शपौर्णमास्यन्तर्गतपौर्ण
मासीकर्त्तव्यस्योपांशुयागस्य केवलदधिरूपहविःस्पर्शनोधस्यनतरनिरपेक्षःप्रवृ
त्तिः उपांशुभागस्य केवलहविकरणकत्वात्। तथा पंचहोत्रा ममावास्यामित्यत्र पं
चहोत्रपदेन अग्निहोत्रेत्यादिको मन्त्र उच्यते तस्ययत्रविनियोगस्तत्पंचहोत्रा अ
मावास्यामितिसप्तम्यर्थेद्वितीया पंचहोत्रामितितन्मन्त्रस्यकरणत्वेनाभाय॥ ते
नामावास्यामितिमषेदि विधिः अत्रापिकर्मकाक्षायां पूर्वोक्तानिरूढोव्येवान्वीयं
तेअयंचविधिर्दर्शपौर्णमास्यन्तर्गतस्यदर्शकर्तव्यस्याग्नीसोमीययागस्य केवलने
नैन्द्रपयोरूपद्रव्यस्पर्शेनिरपेक्षप्रवृत्तिः॥ अग्नीसोमीयकेवलपयोद्रव्यकरणक
त्वात्। आग्नेयेचदर्शपौर्णमास्यांचकर्त्तव्योदधिपयोरूपोभयद्रव्यकेहविर्हयस्पर्श एम
र्थविध्योर्युगपत्प्रवृत्तौ भवन्मतेविधिवैषम्यपातात्॥ नकोपिप्रवर्त्तेत॥ तथाचा २६

द्वयोरेवविषयसत्वाक्षत्स्यामन्त्रद्वयेनहविर्द्वयस्यदधिपयोरूपस्यस्पर्शइति
॥ सिद्धान्तापिभवन्मतेव्याहन्येति॥ इदंचनसम्यग्युगपत्। प्रवृत्तावपिसामान्य
विध्योर्बाधाभावात्। तद्रूपविधिवैरूप्याप्रशक्तेरतः प्रागुक्तप्रतिबन्धिमात्रंसा
धीयइतिधीमद्भिर्विभावनीयं॥ अथैवंविधिवैषम्यलक्षणंकिमित्याकाङ्क्षा
यामाह नस्मादिति उपात्तेतिउपात्वपन्तीतियेवेदिविधिस्तत्सापेक्षइत्यर्थः। त
द्बाधेविनेति वेदिविधिबाधंविनेत्यर्थः विधिरेवनस्यादितिसामान्यविध्येवैश्वदे
वादियागद्वयाविषयकत्वेतत्रविध्यभावादेववेघकरणस्यप्राप्तप्रापकत्वाभावे
नविधिनस्यादित्यर्थः इतीतिहेतोयतोनिषिद्धमानयोगयोरपिसामान्यवि
धिविषयत्वेनतद्बाधेनैववैकल्पिकस्यनिषेधस्यप्रवृत्तिरनइत्यर्थः॥ ननुनिषे
धविधेर्विषयत्वेनबलवत्वात्। सर्वदैवसामान्यविधिमुन्मूलयेत्। तथाचसामा
न्यविधेस्तत्राप्रवृत्त्याकथंतद्बाधेनवैकल्पिकनिषेधविधानमित्याशङ्क्यते

Indira Gandhi National
Centre for the Arts

न चेत्ति तस्य सामान्यविधेर्विफलत्वं इति नित्यवदेव बाधे सामान्यविधेस्तदितरविष
यत्वमेव वाच्यं अन्यथा तद्देशे तद्विधेरनुष्ठानलक्षणप्रामाण्यापत्तेः। तथा च विध्यभा
वादेव निषेधस्यासिद्धत्वात्। निषेधविधिर्विफलः स्यादित्यर्थः एतदेवोक्तं निषेधं वि
नापीति वेद्यकरणस्येति सामान्यविधेर्निषिद्धमानयागद्वयाविषयकत्वे च इत्यर्थः। नि
षेधविधिबाधेत्ति॥ विरोधे न निषेधबाधं विना सामान्यस्य प्रवृत्त्यसंभवादिति भावः॥
विधिवैषम्यमिति एकस्यैव वेदिविधेः पर्वद्वये नित्यवद्विधायकत्वं पर्वद्वये च निषेध
बाधसापेक्षविधायकत्वमिति विधिवैषम्यादित्यर्थः विकल्पश्चेति निषेधाङ्गीका
रे निषिद्धमानयागद्वये वेदिकरणाकरणयोर्विकल्पश्चेत्यर्थः॥ अयं च विकल्पो न व्य
वस्थितः नाहरणविकल्पस्य त्वे करणे फलाधिक्यादधिकफलकामपरत्वं स्याधिका
रिणो भेदात् किं त्वैहिकः तथा चाष्टदोषोपहतो वा कुमदश्चेति गौरवमतो लाघवा
त् पर्युदासलक्षणया वेदिदोषादिभिन्नेपर्वण्ययागे तत्र वेदिं वरपत्नी का एवं वि एम
९८

धिः कल्प्यत इति भावः॥ न्नं च वे न कलञ्जं भक्षयेदित्यादौ रागप्राप्तो निषेधो विकल्प्यः
स्यात्। रागस्योपजीव्यत्वे न निषेधेन नित्यवत्तद्बाधायोगदत आह रागप्राप्तेत्विति॥
केचित्तु कलञ्जेतरभोजनकलञ्जभोजने तयोरागप्राप्तत्वेन कलञ्जातिरिक्तभु
ञ्जो न कलञ्जभोजनेतरत्र नक्वोतेति पर्युदाससंभवात्॥ निषेधो विकल्प एवेति
भ्रमनिरासार्थमाह॥ रागप्राप्तो त्विति नीत्याद्युः कादाचित्। करणस्येति न हि निषिध्यमान
मनुतिष्ठन्। यावज्जीवमहनि शीतदनुतिनि षिध्यानुष्ठानस्य रागाधीनत्वेन रागस्यानि
यतत्वात्। सहकयोत्तरविलम्बाच्चेति भावः तथा च निषेधविधिवैयर्थ्यापत्त्या विकल्पो
न किन्तु नित्यवद्बाध एवेति भावः॥ अत एवेति यत एव सामान्यविशेषयोरेव विधिनि
षेधयोः क्वचिदेकत्र प्रवृत्तौ सामान्यविधेर्वैरूप्यं न तु एकविशेषनिष्ठयोरत एवेत्यर्थः
षोडशीति तथा च श्रुतिः अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति
॥ अतिरात्रो यागविशेषः। गृह्णातीति लिङर्थे लट् अत्र विधिनिषेधयोर्द्वयोरेवातिरात्रा

Indira Gandhi National
Centre for the Arts

ख्यपागरूपविशेषनिष्ठत्वेन विधेः क्वचिन्नित्यवद्विधायकत्वाभावेन विधिवैरूप्याभावा
त्। निषेधाविषयविषकत्वाभावेन पूर्वोक्तन्यायेन पर्युदासासंभवाच्च विकल्प इत्यर्थः। अ
त एवोक्तमेवाष्टदोषोपि यद्व्रीहियववाक्ययोर्विकल्पः संश्रितस्तत्र गतिरन्या न विद्यत इ
ति। अन्यागतिः पर्युदासरूपा गतिः विकल्पः स्यादिति रागातिदेशयोरपि निमित्ताविशेषा
दिति भावः। ननु प्रमाणयोस्तुल्यबलत्वे हि विकल्पः। अत एव गौतमोपि तुल्यबलविरो
धे विकल्प इत्याह तथा च षोडशिग्रहणाग्रहणयोर्द्वयोरेव वैदिकप्रमाणत्वाविशेषात्तुल्य
बलत्वात् विनिगमनाविरहे ऐकेनापरस्य नित्यवद्बाधायोगात् पक्षतो बाधेन विकल्पो युक्तः।
इह तु रागस्य शास्त्रात् दुर्बलत्वात् विकल्पासम्भवात्। निषेधेन नित्यवद्बाधः एवमतिदे
शस्यापि सामान्यविधित्वात् विषयान्तरे चरितार्थत्वेन पर्युदासासंभवात् तुल्यबलत्वाभावेन
नित्यवद्बाध एवेति कथं विकल्पापत्तिरत आह किं चेति प्राप्तेरिति प्रापकविधिरित्यर्थः। प
रमतन्निराकरणमाह येति॥ याहच्छिकेति स्वारसिकीच्छा या सा हच्छा रागइति यावत्॥ = राम
२८

तया प्रोक्तं यद्ग्रहणं तु द्विवर्ज्यं यन्निषेध इत्यर्थः प्राप्तीत्यस्य क्वचिद्विहितभावत्वेन प्राप्तार्थमाह॥
नन्विति तथा च वैधग्रह॥ नित्यसमे वेत्याशयः युगपदिति यौगपद्येऽपसंहारस्याविरोधस्या
सम्भवादित्यर्थः उपसंहारसंभवादिति पाठे युगपदेकदोपसंहारस्यैकत्रावस्थानस्यासम्भ
वादित्यर्थः विकल्पाभावेति॥ तथा च विरुद्धयोरेव भावाभावयोर्विकल्पत्वं इह ग्रहणनैध
ग्रहणयोरविरोधात्। विकल्पाभावप्रसक्तेरित्यर्थः ननु विकल्पो नाश्रीतः किं तु कल्प्यः
ग्रहणयोर्विरोधात्। विकल्पाभावप्रसक्तेरित्यर्थः ननु विकल्पो नाश्रितः किं तु कल्प्यः
ग्रहणनिषेधरूपरागस्यत्त
अस्य चाष्टदोषग्रस्ततयागत्यन्तराभाव एव कल्पना प्रकृते रग्रहणनिषेधरूपरागस्यत्त
रसत्वात्। कथं तत्कल्प्यं अतो विकल्पाभावे इष्टापत्तिरेव इत्यत आह क्रत्वर्थतया
चेति क्रत्वङ्गतयेत्यर्थः। न क्रत्वर्थः स्यादिति ननु क्रत्वङ्गतया प्राप्तस्य प्रतियोगिनो
निषेधस्यैव क्रत्वङ्गत्वमिति। नियमे प्रमाणाभावः यागानङ्गस्यामिषभोजनस्य निषेधे
यागाङ्गेऽव्यभिचारश्चेति कथं याहच्छिकग्रहणनिषेधस्य क्रत्वर्थापत्तिरिति वत्त्वेन ना
क्रत्वर्थत्वापादनं किं त्ववे वाक्यार्थः क्रत्वर्थतया हच्छिकग्रहणस्यप्रसक्तभावात्। तथी चनि

षेधविधिना प्रकरणोपस्थितवैधग्रहणस्य। एवं च सति वैधग्रहणनिषेधस्यैव क्रत्वगत-
याविरोधित्वात्। अवैधग्रहणेन क्रत्वर्थः स्यादिति। न च षोडशिग्रहणत्वेन वैधावैधसाधा-
रणेन रूपेणैव प्रकरणादुपस्थितिर्न तु वैधग्रहणत्वेन तथा च यादृच्छिकग्रहणमप्युपा-
स्थितमेवेति वाच्यं तथापि भवदुक्तावैधग्रहणविशेषाभावस्य क्रत्वर्थानुपपत्तेः ग्रहण-
सामान्याभावस्यैवाङ्गताया विधिप्रतिपाद्यत्वात्। एवं च सति विरोधादिकल्पनमेवेति हृदयं
॥ केचित्तु क्रत्वर्थतयेत्यादिग्रन्थे अन्यथा योजयन्ति॥ तथाहि नातिरात्रे इति वाक्ये न ग्रहणस्या-
ङ्गस्याभावात् ग्रहणाभावस्याङ्गत्वं पुरुषार्थत्वेव प्रत्याख्यते आद्येषु। क्रत्वर्थतयेति॥ नि-
षेधो निषेधविधिर्न तु क्रत्वर्थः। न तु क्रतुविशेषः हितो ये सन्निहितवैधग्रहणस्य पहाया-
सन्निहितावैधग्रहणाविषयत्वकल्पने गौरवं तत्। तीपे प्रकरणविरोध इति तदुक्तम्। अ-
स्मदुक्तक्रमेणैव यथाश्रुतार्थनिर्वाहे॥ आश्रयकल्पनानौचित्यात्। तस्मादिति॥ यस्मा-
द्भवदुक्तं तस्मादित्यर्थः। इक्त नयादिति॥ अस्मादुक्तन्यायात् नित्यनिषेधे विधिनिषेधो भयवै- राम
२९

---

यर्थ्यात्। नित्यविधौ च निषिध वैयर्थ्यं स्यादित्येवं रूपात्। एवकारस्य भिन्नयोज-
नया विकल्पनावेत्त्व। न च भवदुक्तसमुच्चय इत्यर्थः। तदस्तु मते दूषणान्त-
रमतान्तरस्य दूषणमप्यन्यदा निबन्धनमेवेति षु तु किं विस्तरेण ग्रन्थकादु-
ल्येन तथा वग्रन्थगौरवतयाऽङ्कार्थे दूषणाभावे मतान्तरतदूषणे च नोपनिब-
न्धमिति भावः॥ स्वोकरमतदूषणस्यैव प्रकृत संसृष्टिनस्त्वित्ति सोदरस्यात्विति निव-
चेन योस्तद्याख्यानमनूद्य दूषयति यद्वेति वर्णनमेवाह असोदर इति इत्यनेन
वचनेन असोदरस्य संसृष्टिनो धनसंबन्धप्राप्तो धनाधिकारप्राप्तौ तदपवादार्थे
तद्वाधार्थे विनिगमनेनेति एकतरपक्षपातिनी युक्तिर्विनिगमना तद्रूपकारणा-
भावादित्यर्थः। अन्योदर्यः संसृष्टी यः स अन्योदर्यः धनं न हरेत्। सोदरे सतीत्यनेन तु रख-
रसान्वन्यते तर्हि को गतिः इत्यादित्यत्राह असंसृष्ट्यपीति अपि रेवार्थो भिन्नक्रमे-
ण योजनीयः तथा संसृष्टी सोदर एव गृह्णीयादित्यर्थः किं पुनः संसृष्टी सोदर इति

Indira Gandhi National Centre for the Arts

केन्यायसिद्ध्यधिकारेपि संसृष्टीसोदरस्य कारेण समुच्चीयते इति पूर्ववचने यत्सोद
रस्य संसृष्टसोदरापवादकत्वमुक्तं॥ तदेव द्वितीयवचनेवि वृतमिति। यदुक्तं तद
पि दूषयितुमुपन्यस्यति यच्चेति आनर्थक्यापत्तेरिति विवरणवचनादेवउक्तार्थ
लाभे विध्रियमाणवचनवैयर्थ्यादिति भावः वक्ष्यमाणदूषणान्तरं स्पष्टयितुं तदुक्ते
वेवरणं दर्शयति किं चेति तथाऽयं वक्ष्यमाणोर्थः स्त्रीकारोक्त इति शेषः न पुनरुक्त
त्वादिति॥ अन्योदर्यः संसृष्टी न गृह्णीयादित्यनेनैव प्रकृतार्थसिद्धौ अन्योदर्यपदानु
रस्य व्यर्थत्वादित्यर्थः नुं नेसर्वमिहं भवदुषणमकिंचित्।करं तथाहि सोदरवचनस्ये
वापवादकत्वं सोदरस्याधिकोपकारकत्वेन न्यायसिद्धं इत्यतः न तु संसृष्टिवचनस्यान्या
याभावात्॥ अन्योदर्य इति नान्यमातृज इत्यनयोर्भवदुक्तव्याख्यानेर्थविशेषानात्र
पि शब्दस्याव्ययानामनेकार्थत्वेन एवकारार्थेपि वर्तमानाद् एव विवादास्पदाभूमिः
पिशब्दस्याव्ययानामनेकार्थत्वेन एवकारार्थेपि वर्तमानादेव विवादास्पदा भूमिः राम
पौरुषेणापि मुच्यते इत्यत्र अपिरेवार्थो दृष्ट इत्यत आह किं चेति अप्रवर्तत्वादिति अ ३१

पवादस्य उत्सर्गाविषये अप्रवृत्तत्वादिति भावः। तुल्यवदिति अविशेषकाभावादप्रा
न्तर इति सामान्यवाक्येनोक्तत्वाविशेषात्। द्वयोरेव युगपदधिकारः स्यादित्यर्थः न
वा कस्यचिन्निर्दिष्टा अधिकारबोधकसामान्यवचनस्य संसृष्टादिविषयकतायाम
दृष्टत्वादिति भावः। अथेति सोदरपरस्य संसृष्टासंसृष्टिसाधारणसोदरपरत्वेनात्रा
पि सोदरवचनं प्रवृत्तमित्यर्थः एकत्र संसृष्टसोदरासंसृष्टसोदरस्थले अन्य
त्रसोदरासोदरयोः संसृष्टिनोरित्युक्तस्थले सोदरवचनस्य सोदरत्वपुरस्का
रेण सोदरमात्रबाधसापेक्षत्वेन संसृष्टिनोऽपि सोदरस्य बाधसापेक्षत्वावश्यकत्वा
दित्यस्येति भावः। यथेति अत्रायमर्थः पौर्णमासयागे प्रकृतौ वेदिविहिता साचा
तिदेशात् विकृतौ भूदीक्षणीयेष्टौ प्राप्ता वाक्यान्तरे च सामान्यतः सोमद्रव्यकया
गे वेदिर्विहिता तत्र दीक्षणीयेष्टेरपि सोमद्रव्यकतयादियो सामान्यवचनेन तत्र व
र्तनेन तदातिदेशविधिबाधेनैव प्रवर्तते अन्यथाप्रसक्तविधित्वानुपपत्तेः॥ पार्ण

दा॰भा॰ नन्वक्तयुक्त्या नरकनिस्तारकर्त्तुः ज्येष्ठपुत्रस्य पितुः पितामहधनेऽस्वाशित्वं तदकर्तुः
॥३१॥ श्च कनिष्ठपुत्रस्य पितुस्तद्वत्पुत्रैः सह समांशित्वात्कथं वचनानां सामंजस्यादित्या
शंकते। अथेति। मध्यमादिति मध्यमादिपुत्राणामेव सांशित्वादिद्वारकत्वमत्र तत्र
ततोन्यूनस्यैकांशमात्रस्य पितुः पितृत्वेनाश्च वित्यात् भागद्वययुक्तमिति भावः। ननु
पैतामहे पितापुत्रयोस्तुल्याधिकारित्वमेवोच्यते तथापि वचनार्थस्यात् ज्येष्ठेनैव सामा
नाधिकारिता कथं न्यूनेन वमत आह। सामान्येनेति। सामान्यं न समांशित्वमित्यादावि
विशेषेणेत्यर्थः। अनुचितत्वादिति। तथा च कपुत्रस्य पितुर्द्व्यंशित्वं द्विपितृकस्य तु क्षे
त्रजादेः पितुः समांशित्वमेवोचितमिति भावः। पितुरंशद्वयविधानस्य सोपानवि
षयत्वासंभवात् पितामहधनविषयत्वमेवेत्याह। किंचेति। उपदर्शयति। स्तु कस 31
षयत्वासंभवात् पितामहधनविषयत्वमेवेत्याह। किंचेति। उपदर्शयति। स्तु कस ३१
वधनस्यात् भागद्वयवचनमयद्येकपुत्रः स्यादित्यनेनैकमूलतया एकपुत्रपितृ

विषयमितिमतमपाकर्तुं तद्वचनमन्यथा व्याख्यातुमुत्थापयति तद्वेदुत्तेर्बलत्वादिति
एकदेशलक्षणापेक्षया समुदायलक्षणागौरवयत्नत्वादिति केचित् तदसत्समुदाय
शक्त्यभावेन लक्षणायाश्च प्रसक्तेः वस्तुतस्तत्पुरुषे उत्तरपदं मुख्यमेव एवं पदं
तु संबंधिनि लाक्षणिकं बहुव्रीहौ द्वयोरेव पदयोर्मुख्यार्थत्यागात् तदपेक्षया दुर्बलत्व
मिति ऋषेरस्योसेपि पितुर्भागद्वयेक्षत्रजस्य पुत्रेण सह तुल्यांशित्वाश्चितो नाद्विषय
तया सहांशसाम्यमिति वचनस्य मुख्यत्वसंभवे त्वनाधिकविभागनिषेधे न लक्षणा
अन्याय्येत्यभिप्रेत्याह तस्मादिति द्विपितृकमाह क्षेत्रजादीति मृतस्येति मृतस्य
क्षेत्रे अन्येन प्रसुत उत्पादितः क्लीबादेः क्षेत्रे तदनुमतोऽन्योनोत्पादितः इत्यर्थः अ
थैकदेशेन भागद्वयविधानात्तद्विसंभयत्ववत्तद्देकत्ववद्वाउद्देश्यविशेषणान
या एकत्वमविवक्षितं किंतु पक्षप्राप्तानुवादमात्रं अतः सर्वेषामेव भागद्वयमित्याशंक्या

Indira Gandhi National
Centre for the Arts

दायभाग हतनश्चेतिकर्त्तृविशेषणात्पेतिएकपुत्रत्वरूपात्मसंबंधिभागद्वयस्यविधेयतया
॥३२॥ एकपुत्रत्वेविधेयविशेषणमेवनतूद्देश्यविशेषणंयेनाविवक्षितंस्यादितिभावः के
चित्तुकर्त्तुराख्यातवाच्यत्वेनविधेयतयातद्विशेषणस्यैकपुत्रस्यद्विपित्रकव्यावर्त्त
कत्वेनैस्वप्रयोजनतयाविवक्षितत्वमित्याहुः स्वधनातिरिक्तधनेपितुर्भागद्वययुक्ति
दार्ढ्यार्थमाहतथेतिपुत्रवित्तार्जितादितिद्यंशहरत्वाद्यन्वयानुरोधात्कद्विद्विभावोद्वय
वत्त्वेकांशतेइतिव्युत्पत्तेः पुत्रार्जितवित्तादित्यर्थः नचेतितथाचपुत्रार्जितवित्तेनपितु
र्द्व्यंशित्वंयनदृष्टांतेवत्वात्स्वकृतदार्ढ्यंस्यादितिभावः पितापुत्रयोःपितापुत्रपदयोः न
नुविभागोर्थस्यद्व्येवपितापुत्रपदसंबंधिमात्रोपलक्षणंसामान्यकल्पनायांलाघव
स्यमूलत्वादतआहकिंचेति विप्रलिप्सिद्धविरुद्धतथाचार्जनेसत्वमापादयेदित्यर्थःअ राम:
भिधानात्स्वाम्येरितिशेषः दर्शितमितितत्रपुत्रदाननिषेधस्यस्वत्वाभावेनन्यायमूलत्वादिति ३२

संभवतीति सकृदुच्चरितःशब्दःसकृदर्थंगमयतीतिन्यायात्युगपद्वृत्तिद्वयविरोधाच्चेतिशेषःते
ननद्वंद्वगर्भतत्पुरुषःसंभवतीतिभावः द्व्यंशप्राप्तेरिति अर्जकोद्व्यंशमाहरेदितिवचनात्पितुर्भा
गद्वयंस्वहस्तीतांशद्वयंइतिसामान्याभिधानादितिभावः अनर्थकमितिअर्द्धहरत्वाभिधानमन
र्थकमित्यर्थः इदमुपलक्षणंप्राग्विद्विष्टद्व्यंशहरत्वमादायविरुद्धार्थकत्वमपिबोध्यंभागद्वयस्या
प्राप्तेरितिद्व्यंशाद्वयरूपद्विविधभागस्याप्राप्तेरित्यर्थः तथाचमयोर्जितवत्सर्वत्रैवसाम्याद्भूरिष्टग
हणस्यापिप्राप्तेर्नियमार्थंपक्षद्वयमुक्तमितिशेषः विरुद्धार्थकत्वंचेतयोर्विषयभेदस्यवक्ष्यमाण
तयानिरसनीयमिति ननुपुत्रेसत्वमस्त्येव अन्यथाविक्रयंचैवदानंचननेयास्युरनिच्छवःदा
राःपुत्राश्चसर्वस्वमात्मन्येवनियोजयेत् आपत्कालेचकर्त्तव्यंदानंविक्रयमेवच अन्यथा
नप्रवर्त्ततइतिकात्यायनेनविरोधःस्यात् अतएवमातापितृदत्तवि
क्रीतोपुत्रौदत्त्रिमक्रीतकौमनुरादस्वयत्नपुत्रदारोपक्रमेनारदेनोक्तेआपत्स्वपिचकष्टासुवर्त्त

Indira Gandhi National
Centre for the Arts

दायभाग मानेनदेहिना अदेयान्यादुरन्वार्थायश्चान्यस्मै प्रतिश्रुतमिति तत्सुताद्दी नामनिच्छाविषयमि
॥३३॥ तिन विरोधः न च मन्वादिभिरर्जनगणमध्ये अपत्योत्पादनस्य गणनात् कुलःपुत्रेमत्वं कात्या
यनादिवचनस्यैव तस्य सत्वे हेतुत्वे प्रमाणत्वात् सर्वस्वदाने तु वचनबलादेव पुत्रस्यादा
नं अत एव स्वकुटुंबाविरोधेनेदयं दारसुतादृते इत्युपपद्यते अन्यथा स्वत्वाभावादेवत
दुप्राप्तेस्तदनर्थकं स्यात् अत आह किंचेति नियमार्थत्वपक्ष इयनियमार्थत्वं उक्तं तस्य वि
स्वेति स्वल्पेन वा विभज्य भूयिष्ठमादाय वसेदित्याभ्यामिति शेषः तथा चानायत्याप्युत्रार्जितविष
कदेशिनः यत्वं वचनस्येति भावः एकदेशत्वेनैव संबंधिलक्षणस्य ननु तयोः संबंधिको मोक्ष त्व पितृद्धंश
स्य पुत्र विभक्तरूपसंबंधिना अर्हस्य तु द्वंशरूपसंबन्धिना अन्वयोस्त्व इत्यत आह पुत्र चेति
तथा च गुणानां च परार्थत्वाद संबंधः समत्वः स्यादिति ज्ञेमित्युक्तन्यायेन द्वयोर्विशेषणा ताम:
योः परस्परेनान्वयसंभव इति भावः वित्तार्जनादिति पंचम्यंतेन द्व्यंशरूपैकदेशस्य योन्वयः तद ॥३३॥

थोंपादानेह्यतदर्थं द्व्यंशोपादानस्याविवादादाह भवतोपि संमतत्वात् अर्हं पदेनापि तदन्वयोपुक्त
इत्यर्थः द्व्यंशस्य तु पंचम्यंतानुपस्थित्यात तदन्वयो न युक्तः इति शेषः पंचम्यंतत्वे नेति पाठे वित्तार्ज
नादित्यंतरामिति षष्ठ्यंतः तत्परामर्शनीयस्योपादानेनान्वयः आसत्तिबलात् पंचम्यंतेन सह प्रथमे
अर्हस्यैवान्वयो न द्व्यंशस्यासत्तिविलंबादित्याह वित्तार्जनेति अत्र चानन्वयिव्यवधानाभावस्यैवास
त्तिघटकतयाह पुत्रविभक्तपदैर्व्यवधानेपि नासत्त्यनुपपत्तिरिति ध्येयं न पुनरितितस्यान्वयि
नाहरइत्यनेन व्यवधानात् पंचम्यश्रवणाच्चेति भावः द्व्यंशेनान्वये तात्पर्याभावमाह स्वायत्ते इति
अवाचकपदेति एकांशत्वेना वाचकात् पदस्यार्थः अन्याय्यत्वादिति तथा च तदन्वयतात्पर्यमि
ति भावः द्व्यंशार्हयोर्विषमवशिष्टतयाविषयैकवाक्यविरोधाद्व्यवस्थितविकल्पमाह तत्रेतिन
मन्वत्राप्यर्हपर्यवसाने द्व्यंशाभिधानमनर्थकमत आह यद्वेति इदं च पितुर्गुणवत्वनिर्गुणता
भ्यां अर्हहरत्वाभिधानं अंशिन्यनेकस्मिन्पुत्रे वेदितव्यं एकस्मिंस्तु अत्र पुत्रमात्रे अंशितः
ति चक्षमाणान्यूनाधिकविभागकारं गुणवतिपितरि द्व्यंशित्वं निर्गुणे अर्हमिति वेपरीत्यं नेया

Indira Gandhi National
Centre for the Arts

घ्यभागाधिकं सुधीभिर्भाव्यं दत्वादत्वा वेति ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिन इति वक्ष्यमाणवच
॥टीका॥ नादित्याशयः पितामहधने पितुरिच्छया न्यूनाधिकदाने निरासे पितुः स्वार्जितमात्रपर्यवसायित्व
॥२६॥ हमाणान्न्यूनाधिकविभागकारणमाह स्वोपार्जितधनादिति धर्मकारणेति तथा चतुक्तान्यतम
कारणं विना स्वार्जितधने पुत्राणां विषमविभागो न धर्म्य इति भावः विनेयादृशाः पैतामहे वर्थे
त्विति यद्यपि पितामहसर्वधनप्रभुत्वमपि पितुरक्षतमेव तथापि प्रभुत्वमिह न स्वामित्वं किं तु यथे
ष्टविनियोगयोग्यत्वं सर्वस्मिन् पैतामहे पितुर्न तथात्वमिति भावः याज्ञवल्क्ये न्यूनाधिकविभा
गवचनं विभागं चेत् पिता कुर्यादिति वचनं च स्वार्जितो पितामहधने वा सामान्यत एव सोद्धाररूप
श्रेष्ठभागविषयमित्यभिप्रायेणाशंकते नन्विति श्रेष्ठमात्रावगतेः समभागावगतेश्च कथमिति तदीयेत
द्वचनेनैव तस्य प्राप्तत्वात् विधानानुपपत्तिरिभावः अमरएव वैयर्थ्यं स्यादतः [illegible] एव न तदर्थमित्या
हउच्यत इति वचनानर्थक्यादिति भ्रातृकृताविभागापेक्षयापितृकृते शेषाविभागेन न्यूनाधि रामः
के विभक्तानामिति वचनानर्थक्यादित्यर्थः नयात् तद्वचनेन सोद्धारानुद्धाररूपाधिकन्यूनबो ३७

धकं किं तु पितुरिच्छाकृतस्यान्यस्यैव न्यूनाधिकविभागस्य बोधकमिति भावः प्रयोजनांतरदर्शनेन व
चनस्यार्थवत्तामाशंकेतेत्यथेति धर्म्यत्वार्थमिति तद्वचने धर्म्य इत्येनेन धर्म्यत्वप्रतिपादनादिति भा
वः न्यूनत्वमेवेति भ्रातृकृतसोद्धारापेक्षयापितृकृतसमभागस्यैव न्यूनत्वादिति भावः अधिकप
पदत्वादिति सोद्धाररूपाधिकभागस्य भ्रातृकृतस्यापि धर्म्यत्वेन पितृकृतविशेषेऽधिकपदोपादा
नेवैयर्थ्यादिति भावः अथ पितृकृतसमभाग एव सोद्धाराभागपेक्षया न्यूनकनिष्ठानामर्थादधिको
भवतीति स एवैको भागो न्यूनाधिकपदाभ्यामुच्यते न पृथगिति नाधिकपदवैयर्थ्यमाह किं चेति इति
केचित् च्छामणिस्तु अधिकपदमिति ज्येष्ठस्य विंशोद्धार इत्यनेन सामान्यत एव प्राप्तेरनर्थकमित्य
र्थ इत्याह वस्तुतो न तु समभागमात्राभिधानेन पितृकृते तु निमित्तविशेषाभिधानेन सामान्यप्राप्त
धिकाशंकाबाधा पत्तिरतोऽधिकपदं सोद्धारभागप्रापकतयासार्थकं वाच्यं तथा च सति ज्येष्ठं वा श्रेष्ठ
भागेनेत्युक्त्या याज्ञवल्क्यवचनांतरं व्यर्थं न्यूनाधिकवचनेनैव हि तदुक्तद्विविधभागावगतेरतो व

दा॰भा॰गू॰ टीका ॥३५॥ स्वचनमेव तद्विषयान्तराभिधायकतया सार्थकमिति किं चेति अनर्थकमिति भागद्वैयर्थ्यविषयमात्राभिधा
नेन तत्रेच्छाया अप्रयोजकत्वादिति भावः वक्तव्यस्य भागद्वयस्य तपस्य कथं तर्हि वचनस्यार्थवत्त्व
मत आह अस्मादिति स्वोपात्तविषयमिति पितामहधनपरत्वे वैयर्थ्यापातादिति भावः न किमपीति
न्यूनाधिकवचनस्य स्वोपात्तविषयाविभागं चेदित्यस्य च पितामहधनगोचरतया वचनयो
रर्थवत्त्वादिति भावः नन्वीच्छया विभजेदिति समग्राह्यांशविषयकमेवाच्युतस्वल्पेन वा विभज्याभ्युपि
क्षमादाय वा वसेदित्येकस्तलकत्वात् तत्कथमनर्थकमत आह किं चेति विशेषेण स्यादिति था च व
चनवैयर्थ्यं तादवस्थ्यात्तलतथार्थसंभवदिति भावः यद्यप्ययं दोषस्तद्वच्यते इत्यादिना प्रागेवोक्तस्तथा
पि तस्य दार्ढ्यप्रतिपादनार्थं पुनरभिधानमिति बोध्यं ननु न्यूनाधिकवचनस्य सोद्धारानुद्धारभाग
द्वयस्य नियामकत्वेपि ज्ञायेषामिति प्रतिकं व्यर्थं स्यात् भ्रातृविभागेपि द्वैविध्यसत्त्वात् यतो न्यूनाधि राम:
कविभागः सोद्धारानुद्धाराभ्यां अन्यत्र वेत्यत्र प्रमाणान्तरमप्याह तथेति याहृशेति एतस्य समं ॥३५॥

रमात्राभिधायकत्वे विभजेत्तथा सुस्थितइति पूर्वश्रुतौ केनैव समं स्यादशक्तत्वात् विशेषस्येति
न्यायात् समांशप्राप्ते वैयर्थ्यं स्यादिति भावः व्याकुलचित्ततया कर्तव्याकर्तव्याविवेचनात्मन्यत
या पूर्वोक्तकारणाभ्यन्तत्वबहुपोष्यत्वाभि दे कारणादिति यदुक्तं तत्र प्रमाणमाह यथेति कारणं
विनाऽन्यस्यासंभवात् नैकं पुत्रं विशेषयेदित्यन्वयः निर्भाजयेदित्यत्र कारणं विनापातित्या
दिकं विनेत्यर्थः ननु कारणं विनाइत्यस्य गुणं विनेत्येवार्थः तथा च कारणं गुणं विना न विशेष
येत् नोद्धारादिना विशेषयेदिति वचनार्थः तत्कथं पूर्वोक्तकारणाद्विशेषं ब्रूषे इत्यत आह उद्धा
रादिविशेषो हीति बहुवचनमेवेति विंशमदद्दूत तु ब्रीभागरूपाणामुद्धाराणां बहुषेव उद्दिष्टत्वा
दिति भावः नैकस्येति तथा च एकस्य विशेषो न तु गुणाह्कतो ह्यारूपः उद्धारस्य सर्वपुत्रसाधारण
तया एकपुत्रस्य विशेषत्वासंभवात् किं तु कारणं तारकते नन्वेकुप्यणात् कारणं विना वहुनो
विशेषः स्यादित्याह एकस्यापीति न्याय्यादप्यवद्दोहर्नव्या इति भावः इच्छाकृत एवेति स्वार्जितमात्रे

Indira Gandhi National
Centre for the Arts

दायभाग
॥३६॥ एवोक्तकारणसहकारेण इच्छाकृत एवेत्यर्थः अन्यत्र एवेति भावः यद्यपि ज्येष्ठस्य गुणत्वे इतरे
षां चानिर्गुणत्वेन कस्याप्युद्धारकृतविशेषः सम्भवत्येव तथापि समविशेषो न वचनार्थः पितुः पाद
नेवेत्यर्थात् भ्रातृविभागेपि तथाविधाविधविशेषासम्भवादिति बोध्यं उत्थानं विभागो यम
उत्थानमर्जितं सह युगपत् तथा च सर्वेषामर्जितेन विषमविभाग इति कुल्लूकभट्टव्याख्या
नेन तदसत् तत्र विषमविभागाभावस्य समविभागस्य च न्यायत एव प्राप्तेर्वचनानर्थक्यात्
विभागरूपत्वाभावादिति एवं समुद्धारे समानांशान्प्रकल्पयेदित्यादिना अविभक्तेद्रव्यात् एष
कृतस्यैवोद्धारतया तस्य भागाभावादिति भावः पितृकृतविभागं निरूप्य भ्रातृकृतनिरूप
णार्थं संबोध्यावधानाय प्रतिजानीते इदानीमिति पितृकृतविशेषनिरूपणानन्तरमित्यर्थः सोपि
भ्रातृविभागोपि धर्म्यो नेति तथा च विभागसिद्ध्यैव किंतु स धर्म्यो नेति भावः अत एवोक्तं सत्य
पीत्यादि विभागाधिकारज्ञापनार्थं नन्वेवं पितृसत्वे इव मातृसत्वेपि विभागासिद्धेरपि वचनार्थसं राम: ३६

---

भवे धर्म्यत्वेनाकिमीत्यदृष्टकल्पनागौरवमंगीकरोषि न तत्वापि तदानीं तेषां धनस्वामित्वात् मा
तृसत्वे विभागाभावस्य वाचनिकत्वेनादृष्टकल्पनाया आवश्यकत्वात् हि गमनाज्जतेषां पितृसत्वे अस्वा
मित्वाद्युक्तविभागासिद्धिः मातृसत्वे तु तेषां स्वस्वधनस्वामित्वात् विभागे बाधकाभाव एवेति विभा
व्यज्ञापनान्मनुनेति शेषः ननु मातृमातुरूर्ध्वमित्यस्य पितृधनविषयत्वेऽदृष्टकल्पनाया मानमत
आह किं चेति पुनरुक्तमिति द्वयोरपि मनुवचनत्वादिति भावः उक्तार्थे याज्ञवल्क्यवचने स्फुटं प्रमा
णयति पुनरुक्तत्वे ऽपी पूर्वार्द्धे पित्रोरित्यत्रैकशेषकल्पनया मातृविभागे मातुरूर्द्ध्वमिति प्राप्ते पुनर्न
मातुर्द्धनमित्यस्य पुनरुक्तत्वापत्तेरित्यर्थः इदमुपलक्षणं उत्तरार्द्धे दुहित्रभावे सुतस्याधिकारप्रतिपा
दनात् विरोधोपि द्रष्टव्यः अथ पूर्वार्द्धे मातुरयौतुकधनविषयं उत्तरार्द्धे यौतकधनविषयं अत्र प्र
थमं दुहित्रधिकारस्यैव वक्ष्यमाणत्वात् अतो न पौनरुक्त्यं न वा विरोध इति चेन्न अयौतुके स्त्रीधनेपु
त्रकुमार्योर्युगपदधिकारस्यैव वक्ष्यमाणत्वेन केवलपुत्राधिकारप्रतिपादने विरोधतादवस्थ्यात्

Indira Gandhi National
Centre for the Arts

दायभाग ॥३७॥ नच सुताइत्येकशेषकल्पनया कन्यापुत्रयोर्युगपदधिकारस्यैव वक्ष्यमाणत्वेन के
वलपुत्राधिकारप्रतिपादने विरोधतादवस्थ्यात् न च सुताइत्येकशेषकल्पनयाक
न्यापुत्रयोर्युगपदधिकारप्राप्तिरितिवाच्यं पितृधनसमयव्याहारात् केवलस्यैवाधिकारस्यैवावग
ते अन्यथापितृधनेतयोर्युगपदधिकारापत्तेः साहित्यमिति पितृमातृपरमयोः साहित्यमित्यर्थः
विवक्षितमिति तद्वचनस्थचकारेण द्वंद्वसामानार्थकेन साहित्यावगमादिति भावः अत्रच साहि
त्यं विभागक्रियापेक्षया साहित्यं तु तुल्यरूपाणां परस्परसापेक्षाणामेकक्रियान्वयित्वं तत्र तु
ल्यरूपाणां विशेष्यविशेषणभावेनोपन्नानां ते नर्मस्त्रिकोधर्ममाचरेदित्यत्र साहित्यव्यु
दासः पत्युर्विशेषणत्वेनैव पत्न्या आचारक्रियान्वयात् परस्परसापेक्षाणां परस्परनैरपेक्षेण
तत्क्रियान्वयिनां युगपत्तत्क्रियान्वयिनामिति फलितार्थः तेनधवखदिरौछिनत्तीत्यत्र राम: 
च्छिदाक्रियाव्यक्तौ क्रमेणान्वितयोर्धवखदिरयोः साहित्यव्युदासः युगपदन्वितयोरेवसा ३०

हित्यप्रतीतेरिति अत्र संवादं दर्शयति तथा चेति स्वेवेथ तिहिर्देतो यच्च व्यवस्थलं गार्हस्थ्यं अतोऽस्वा
तंत्र्या व्ययानधिकारिणः इतरथा सर्वैरेव स्वेच्छया धनव्यये कृते धनविलयापत्त्या कुटुंबरक्षान
स्यादिति भावः अत्रैव शब्देन मातुरवस्थानेन अस्वातंत्र्यस्य स्फुटमेवाभिधानमिति भावः नचास्य
वचनस्य भार्यापुत्रश्चेत्यनेन एकमूलत्वात् स्वार्जितेजीन धने अस्वातंत्र्यपरमस्त्विति दायप्रकरणाम्नाना
त् ग्वतस्त्वदवृदमस्पष्टमेव अतः स्पष्टमाहव्यासइति विधानमुखेन प्रतिपादनमुखेन सहवासस्य
जन्मप्रभृति प्राप्ततया तद्विधानासंभवात् पृथग्भावेतिपृथग्भावनिषेधस्यैव सहवासएवेति नियमे
नपरिसंख्यायावा वचनार्थत्वादिति भावः अत्रजीवतोरिति द्विवचनावगते साहित्यस्य विवक्षितत्वेन
कमात्र जीवने सहवासः स्योसे प्राप्तामातरिजीवंत्यां विभागः स्यात् मातरिमृतायां पितरिसत्वेपि विभा
गआपद्येत अतस्तदविवक्षामाह पित्रित्यादिना जीवनतदृत्येनाविवक्षितत्वे उद्देश्यविशेषणत्वं साहित्य
प्रतिपादनं जीवनवृप्तिकमुद्दिश्य विभागाभावस्याविधेयत्वात् यद्यपिपितृसत्वेनैव विभागाप्राप्तेः पितु

Indira Gandhi National
Centre for the Arts

 पादानवैयर्थ्यंतथापिदृष्टांतार्थंतदुपादानंअतएवप्रागुक्तमातुरप्येवमवस्थितायाइत्यत्रएवंशब्दःयथा
 पितरिजीवतिविभागास्वातंत्र्यंतथामातरिजीवंत्यामपीतिदृष्टांतार्थकःप्रयुक्तइतिउभयोरभावेअ
न्यतराभावेएवंचजीवतोःसाहित्याविवक्षायामुपरमसाहित्यंस्फुटमुक्तमितिभावःमातृधनगोचर
त्वानुपपत्तेरित्यस्यमातुर्निधनत्वापत्तेरितिशेषःउभयाभावेतिपितामहधनस्यापिपितुःसत्ववत्का
[redacted]त्तेतिउपस्थितविभागात्तुसंगेनैवशास्त्रत्वान्वयसंभवेविभागांतराध्याहारकल्पनायांगौरवा
दितिभावःअपितृधनगोचरएवेतिपितामहधनस्यापिपितुःसत्ववलात्पितृधनत्वेनसंग्रहःपितृधन
विभागप्रकरणेएवकारेणमातृमात्रधनव्यवच्छेदःतन्नास्यवचनस्यप्रागुक्तपितामहधन[redacted]
गोचरत्वविरोधःमातृप्रधानकंमातृधनकंमातृसंवधित्वेननिर्देशएवंकअत्रापिपितृधनेस्वस्वत्वास्य
दीभूतेऽपीत्यर्थःउक्तप्रागितिपितृधनेविभागप्रकरणेएकस्यापिस्वधनेस्वाम्यादिनेत्यर्थःअशानव्यवहा 
राधनीकाःपंचदशवर्षानधिकवयस्काःप्रोषितानामितिअत्रतदनुमतिंविनाविभागस्फुटएवेतिभा 

वःयतएवप्रपौत्रपर्यंतानांतुल्योपकारताअतएवप्रपौत्रपर्यंतानांतुल्यापासनेत्याहअतएवेतित
त्तिंदास्यतिजनयिष्यतिप्रपौत्रपर्यंतपुरमितिपार्वणकर्तृसपिंडत्वेनलक्षणयेत्यर्थःअतएवधनाधि
कारस्योपकारनिधनत्वादेवपितृभागस्यैवोत्तरकालेतद्गामित्वान्ननिरंतरानेतिवोध्यंपिंडदातृत्वादिति
अत्रपिंडदानयोग्यतयैवविवक्षितानतुतद्रूपधानेनथात्वेदेवादकृतपार्वणस्यपुत्रादेरनधिकारापत्तेःस्व
रूपयोग्यतापौत्रादेर्मृतपितृकपौत्रादिनैवेतितथोवशास्त्रेणागमादितिध्येयंउपकाराविशेषाद्
हूनांमृतपितृकपौत्राणांप्रत्येकपितृतुल्यभागमाशंक्याहयद्वेतितावत्येवेतितथाचरत्नाकरेत्या
येनःअविभागमृतेपुत्रेतत्सुतंरिक्थभागिनंकुर्वितजीवनंयेनलब्धंनैवपितामहात्लभेतांशंसपि
त्र्यंतुपितृव्यात्तस्यावासुतात्यत्रवाशस्तःसर्वेषांभ्रातृणांन्यायतोभवेत्लभेततत्सुतोवापिनिवृ
त्तिःपरतोभवेदितिअत्रन्यायतइत्यस्यस्वपित्राधिनजन्ममूलत्वादित्यर्थःअतएवपार्वणपिंडदातृत्वे
पित्रोहित्रस्यनाधिकारःमातुलादिसत्वेनमातुरेवाधिकारात्प्रपौत्रपुत्रस्यतुपार्वणपिंडदातृत्वाभावान्न

Indira Gandhi National
Centre for the Arts

द्यभाग: धिकार: अत्रैवविषयेयत्केनचिदिदंवचनंसाधकतयाउपन्यस्तंतद्दूषयितुं एतद्वचनमाहयस्येतिअ
३८ यंपितृव्यभ्रातृपुत्रविभागेपितृतोभागकल्पनेत्यस्यकिंपित्रंशएवपुत्रस्यभागइत्यर्थः पितापुत्रव
द्भागोवार्थः तत्रनाद्यइत्याहपितृव्यपितुरेवेतिद्वितीयमाशंक्यनिषेधयतिपितृतइतिस्वमतमाह
अस्यपुनरिति यत्रेतितथाचवीभिन्नपितृकाणांपौत्राणांपितामहधनविभागेस्वपित्रनुसारेण
भागकल्पनेतिवचनार्थः इतिभावः पुत्राइत्युपलक्षणंपौत्राअपिबोध्याइदानींकालविशेषतः भ्रातृवि
विभागनिरूपणानंतरंविकल्पोद्विप्रकारः निरूप्यतेइतिशेषः अत्रसोद्धारः श्रेष्ठस्याविंशोद्धारइत्यादि
नाप्रागेवउक्तः सम्प्रतिसमंसाधयतिउद्धारमंतरेणापीतिसामान्यतः सम्यत्वेनत्वाप्याविशेषणे आनु
लोम्यानांअनुलोमजातानांब्राह्मणादेःक्षत्रियादिपुत्राणामित्यर्थः एकजातीयानामेकजातीय
मातृजातीयानामित्यर्थः दायादस्येदंदायाद्यंतस्मिन्दायाद्येविभागेंशः समइतिअर्थः विभागोविभा रामः
ज्योमानदायः समानइतिवार्थः अथविभागद्वैविध्यतः द्वीकारस्य्यत्योव्यवस्थितः नवैकल्पिकः इस्म ३८

शिष्टत्वात् व्यवस्थितत्वे व्यवस्थापयितुमाशंकृतेनचेति जित्यवदिति समभागस्यापिशास्त्रीयत्वे
मोद्धारेवलवद्देषादितिभावः ननु ज विद्यागुणज्येष्ठइत्यनेनगुणस्यैवाधिक्यांशप्रयोजकत्वंउक्तंनतु
मज्ञातिशयस्यापिप्रमाणाभावात् अतआहउद्धाराहेइतिवेदविद्यावैदिककर्मानुष्ठानकनिष्ठाव
चनादिगुणवतएवउद्धारार्हत्वयाकलौनाहराज्येष्ठस्यप्रायेणासत्वादितिभावः विकल्पोपिगु
णतदभावाभ्यांव्यवस्थितइतिद्रष्टव्यंकिंचिदितिकिंचिद्गृहीत्वानिवृत्तिस्तस्यान्यत्रापेक्षयाव्यंजिका
इत्यनन्तदुपादानंएवमेवमेवमितीक्षराकृतशूलपाणिहलायुधप्रभृतयः प्रकाशकारादयस्तुभागे
पुत्राप्रिय यमाणेषुआलस्यादिनायोनव्याप्रियतेसनिर्भाज्यमूलाधारोदेशमात्रंदत्वाअर्जितधनभाग
शून्यः कार्यइतिवचनंव्याचक्रुः तदसत्एतस्यापघातार्जितविषयत्वेसाधारणधनोपघातेनिर्वापस्या
पिसाधारणेसमभिव्यादिनाभीगावतेविरोधादितिभावः अनुपघातार्जितविषयत्वेतुअनुपघ्नन्पित्र १
हृष्यमितितदीयपरवचर्चेवैयर्थ्यापत्तादितिसोदरभ्रातृभिरितिसोदरासोदरविभागेत्वेवंतत्रैकस्याः

न

दायभाग. सपुत्रमात्रत्वाभावात् मातुरेव चांशितायाः वचनेन बोधितत्वात् स एतत्कृतस्येति युगपद्दुत्तिद्वयवि
॥४०॥ रोधादिति भावः इदं च प्राचीनैर्यमाश्रित्याभिहितं न तु नव्यानां किं तु नव्यैरपि तास्वर्यान्यथानुपप
त्त्यैव गंगायां घोष मत्स्यौ स्त इत्यादिवृत्तिद्वयागीकारात् प्रकृते न तथाविरोधोभयतात्पर्यग्राहकप्रमाण
भावेन मुख्यपरत्वेति तन्मताश्रयणेपि न वृत्तिद्वयसंभव इति भावः अत एव पितृपत्नीत्वेनोभय
साधारणरूपेण लक्षणायैवोभयबोधसंभव इत्यपि परास्तः लक्षणा हेतुत्वाभावादिति सर्वपत्नी
नामिति पुत्रहीनानामिति वक्ष्यते पुत्रेभ्य इत्यत्र दत्ते पुनरर्द्धमित्यत्र च क्रमेण वचनद्वयमाह तदाहेति
अधिविन्नेति अधिऊढा ह्यमानस्त्रियमपेक्ष्याधिकारित्वापूर्वोढ्यादितस्यै स्त्रियै इत्यर्थः अधिवेदनिकं
अधिवेदनामीमित्तं समम् उह्यमानास्त्रियै देयं सममित्यर्थः यद्यपीदमधिविन्नस्त्रीसंप्रदानकदानविष
यं न तु दत्तस्त्रीधनं यासामिति तु पितृकृतविभागविषयं तथाप्येकत्र निर्णीतः शास्त्रार्थो वाधकं विना अ राम:
न्यत्रापि तथेति न्यायात् अत्रापि तथा कल्प्यते इति तथोक्तमिति पुत्रहीनाश्चेति अत्र कश्चिदिदं पितुः प ॥४०॥

ह

त्न्य इति स्वरसात् पुत्रकृतविभागविषयं पितृकृतविभागे पितुः सपुत्रपत्नीनामेकांशित्वमित्याह तदसत् मा
त्रपदस्य सपत्नीमातृपरत्वमिति व्याख्यानविरोधात् मातृकृतविभागे पुत्रवतीनामप्यंशित्वे समांशहारिणी मा
ता पुत्राणां स्यान्मृते पताविंत्यत्र माता पितृप्रत्ते पुत्रतुल्यांशहारिणीत्यत्र च मृते पताविति पितरि प्रेते इति
ति विशेषणवैयर्थ्यप्रसंगाच्च न च पतिसत्वे तत्समांशहारिणी तदभावे पुत्रसमांशिनीत्यर्थो वाच्यो इति
वाच्यं यद्दिकुर्यात्समांशान् इत्यत्र उपस्थितपुत्रसमांशत्वा एव पत्नीनां प्राप्तेः न त्वनुपस्थितपतिसमांशि
तायाः इति तस्मात् पतिकृते पुत्रहीनपत्नीनामेवांशित्वं न पुत्रवतीनां पुत्रकृतविभागे तु मातृणामेवां
शित्वं न विमातृणामिति व्यवस्थेति पितुरूर्द्ध्वं विभजतां माताप्यंशं समं हरेत् इति पितामहपत्नीनां धनविष
यं अत्र पितामही पदं पितृजननीमात्रपरं प्राग्गुरुपत्नीरिति केचित् अपरे तु बहुवचनात् सर्वा इत्युपा
दानात् सर्वासामेव पितामहपत्नीनामंशित्वमिति प्राहुः स्वल्प धने यद्यनस्यैकपुत्र लभ्यतुरीयांशे
न कन्यासंस्कारो न भवति तदेव स्वल्पधनं तद्भ्रातृभिरेव विभजनीयं पश्चात्तैरेव स्वस्वद्रव्याद्दाकव्या
भगिनीसंस्कारः कार्य इति भावः नैव चतुर्थांशनियम इति अत एव रत्नाकरे विष्णुः अनूढा च कन्या नां

Indira Gandhi National Centre for the Arts

दाय०भा० विन्नानुसारेणसंस्कारं कुर्यादिति॥विषयेति पुत्रादि चतुरादि संख्यत्वे कन्या याश्चैकत्वे कन्यायावहु
॥७१॥ तरधनं च तस्य तु कन्याह्यु मतीषु पुत्रस्यैकस्य निर्दन्ततेत्यर्थः भ्रातृणामिति पाठे एकशेषाद्भगिनी संस्का
रस्यावस्यकता स्यात् अतस्तन्निरस्यति भ्रातृणामिति ननु भ्रातृसंस्कारार्थवद्भगिनी संस्कारार्थमपि
वचनस्य कुतो न स्यात् विशेषाश्रवणाद्तआह भ्रातृसंस्कारस्येति पुंलिंगनिर्देशेनेति नचयेषाम
पत्यानामिति नपुंसकनिर्देशेणैव कुतो न स्यादिति वाच्य।अथ साधुत्वे संभवति शब्दसाधुत्वमात्र स्यान्याय्य
त्वादित्यभिप्रायादिति वस्तुतस्तु पितृपिता महेभ्यैव भगिनी दानाधिकारितया भ्रातुरयावश्यकएव भगिनिसं
स्कारः।अथ ऋतुमती भवति दाता प्रतिग्रहीता च नरकैमाप्नोतीति श्रुतेः।अतएव याज्ञवल्क्येनापि भागिन्यश्च निजादंशादि
त्यनेन भगिनीनामपि भ्रातृवत् संस्कारार्थमुक्तमित्यतोवज्जरमात्रसंस्कार [redacted] तुरत्रानुनिर्दन्तता
वत् भगिनी संस्कारादपि निर्दन्ततानिर्दोषायेति सुधीभिर्भाव्यं।प्रकरणांतरमाह अथेति अध्याग्न्यादि
कमग्रेवक्ष्यते विवाहात्परं तदिति एतेन पितृमातृभ्रातृबंधुदत्तमिति कालांतरदत्तमात्रपरिग्रहार्थं दाय.
तिसुव्यक्तं बंधुदत्तपदेनेति लब्धं बंधुकुलात्तथत्यत्र शेषः।मातापितृद्वारेणेति मातुः पितुर्वायस्य सं ॥७१॥

बंधस्यघटकत्वं तत्संबंधवतां मातुल्य पितृव्यादीनामित्यर्थः।एवं चसाति मातृपितृभर्तृदत्तस्य अ
न्वाधेयकज्ञानं न स्यात् अत ऊर्द्ध्वं लब्धमित्यभिहितं तल्लब्धार्थमाह पित्रोश्चकाशादिति भर्तुः
सकाशादिति वचनलब्धंभर्तृकुलाद्युक्तार्थमाह भर्तृकुलाच्चेति इत्थं च विष्णुवचनोपात्तस्य सुत
दत्तस्य साक्षादेव संबंधत्वेन निरूक्तबंधुभर्तृकुलत्वासंभवादिति सुधीभिर्भाव्यं स्वपदेनेति॥
पितृमातृसुतभ्रातृदत्तमित्यत्र पित्रादिपदेनेत्यर्थः।ननु विवाहात्परं तदिति ऊर्द्ध्वं संस्कारादिति
च विहाय सामान्येनैव भर्तृतत्कुलात् पितृमातृतत्कुलाच्च लब्धस्यान्वाधेयसंज्ञा किमिति
न कृता इत्याशंकायामाह परिनयनसमयलब्धस्येति अयं भावः अन्वाधेयत्वं संज्ञायास्तावत
दुपे अप्रजास्त्रीधने वक्ष्यमाणे भ्रात्राधिकार एवफलं परिनयनसमयलब्धेति च न भ्रात्राधिका
रः ब्राह्मादिपंचसभर्तुः आसुरादि त्रिषु पित्रोरेव तेषामभावे देवरादेवाधिकारात् अतः संज्ञा
यास्तत्साधारण्ये प्रयोजनाभावः प्रत्युतस्तत्साधारण्ये तत्र भ्रात्राद्याधिकारबोधक विशेषवच
नेन भ्रात्राधिकारवचनस्य विरोधप्रसक्त्यातस्य संकोचो वाच्यः तथा च प्रक्षालनाद्धि पंकस्य दूरा
दस्पर्शनं वरमितीन्यायेन तद्व्यावर्त्तनमेव संज्ञायाः समुचितमिति नच तथापि विवाहसमया

Indira Gandhi National
Centre for the Arts

दायभागटी. दन्यत्रैस्वेवोच्यतां किं परंतइत्यादिपर्यालत्वेनेतिवाच्यं तथासति विवाहात्पूर्वं वाग्दानोत्तरंपत्ति
११४२।। त्वेभ्रात्रधिकारापत्तेरिति. एतदध्यनादिकं दायबद्धस्यसंक्रांतसंबंधिधनपरत्वशंकामपनय
तिभर्तृदायइतिमन्वादिभिरिति. आदिनाकात्यायनविष्णुपरिग्रहः प्रत्रमनुकात्यायनाभ्यांदत्तं
तच्चप्रीतितः स्त्रीयेइत्यनेन विष्णुनाचान्वाधेयमित्यनेनेतिभावः तथाचैतेः सहैकश्रुतिमूलत्वान्न
वोधाद्दायपदंदत्तपरमितिभावः नचैवैषरीत्यंचद्दुबुलक्षणाप्रसंगान्मनुस्मृतेर्बलवत्वाच्च भा
र्त्रदायंमृतेइति अत्रमृते विद्यमानेइत्यभिधानात्. नसंक्रांतसंबंधिधनपरता विन्यसेद्धिनियुंजी
तक्षपयेत्स्थापयेत् अन्यथास्वयंरक्षणासामर्थ्ये अन्यथा तद्धनेवर्त्तमानासंभवेतत्कुलेक्षपयेत्तत्
कुलमाश्रित्यकालंगमयेत्इत्यर्थः इतिकेचित् केनेत्याकांक्षायां अश्रुतकल्पनेति अनंतराधि
कारिणाभ्रात्रादिनास्वयंसर्वं गृहीत्वाद्विसद्धस्त्रपणपर्यंतं स्त्रियेदायोदयइत्यश्रुतभ्रात्रादीनां
कर्त्तव्यकल्पनेत्यर्थः एतच्चेति. मृतस्यापुत्रस्यपत्न्याः सर्वधनाधिकारित्वंचेत्यर्थः वक्ष्यतइति.
अपुत्रधनाधिकारनिरूपणेइतिशेषः आहेतिस्त्रीधनमितिप्रागुक्तेनान्वयः पित्रादिदत्तेविवाहा रामः
त्पूर्वंपरतोवाविवाहकालदत्तस्यअर्ध्याग्निपदेनैवप्राप्तेः त्वतिर्ग्रासाच्छादनावशिष्टंशुल्कंवक्ष्यमा।१४२।।

णलाभक्रमणाद्दिरद्धिः वरणप्रदानंवरहस्तेसमर्पणंप्रदर्शनार्थंउपलक्षणमित्यर्थः।।उपलक्षणत्वेहेतुमा
हदात्रमिति तथाच. अभिसंधेरावश्यकतया विवाहकालविवक्षायामदृष्टकल्पनागौरवंस्यादितिभा
वः अव्यवस्थितसंख्येति अनीयतसंख्येत्यर्थः मन्वाद्युक्तषड्विधाद्धिकस्यापिशुल्कलाभोदे
र्द्दवलादिभिरभिततादितिभावः पितृमातृभर्तृकुलेति पितृमातृभर्तारोयस्मिन्कुलेइतिव
हुव्रीहि अन्यथालब्धंभर्तृकुलान्नेथेत्यत्रैवभर्तृकुलादिपदानत्रादिपरिग्रहोनस्यात्. नापरीति
तथाचोक्तद्विविधस्त्रीधनेभर्तुरिच्छैवस्वत्वजनिकापत्नीस्वत्वनाशिकाचतदन्यधनेतुतत्रापत्तकालो
पेक्षितइतिभावः स्त्रियाअपिधनंस्त्रीसत्वास्यदीभृतमपिधनंनस्त्रीधनंनेतरनैरपेक्षेणस्त्रियायथेष्टवि
नियोज्यंअस्वातंत्र्यादिति एतच्चभार्यापुत्रश्चेत्यादिनाप्रतिपादितमेवप्राक् स्त्रियाएवेतिस्त्रीणांस्वातंत्र्ये
णविनियोज्यंयद्धनंतत्स्त्रीधनमित्यर्थः तथाचकात्यायनैकवाक्यतयाभार्यापुत्रश्चेत्यादिवचनमप्युक्तद्वि
विधस्त्रीधनविषयमेवस्त्रीधनांतरेतुस्त्रीणांस्वातंत्र्येणयथेष्टविनियोगोनिरपहएवेतिभावः अत्रसंवा
दमाह. तदाहेति नचैवंशुल्कलाभयोरसौदायिकत्वात्. तत्रास्वातंत्र्यंस्यादितिवाच्यंद्वैगोक्तकात्यायन
वचनेनान्यतोलब्धस्याशिल्पलब्धस्यचद्वयोरेवास्वातंत्र्यप्रतिपादनेनेतयोरपिस्त्रीधनमप्यपठितयोः

Indira Gandhi National
Centre for the Arts

दायभागटी-स्वातंत्र्यावगमात् स्थावरेष्वपीतियदुक्तंतस्यापवादमाह स्थावरेपीति अन्यथेति स्थावरमात्रे
॥४३॥ निषेधेइत्यर्थः संप्रतिबोधकेऽऋणार्थम्रतुमर्णेनकृतेस्नानभोजनाद्यवरोधिः विसर्गदाने ग्रा
सेतिवासोगृहं तत्रस्वमिति भ्रात्रणाम्भ्यीनांसंबंधीनांसकाशात् स्वविभागंयासाच्छादनादिरूपंआदद्या
तद्दत्यर्थः इदानींस्त्रीधननिरूपणानंतरमित्यर्थः सममितिविंशोद्धारनिषेधायभगिन्योदत्ताःसनाभ
यःसहोदराः अतएववचनेद्वंद्वश्रुतिर्नास्ति येनावगतसाहित्यबलेनभगिनीभ्रात्रोर्युगपदधिकारःस्या
त्किंतुक्रमेणैवतयोरधिकारः।क्रमश्चनपाठिकःकिंतुप्रथमंभगिन्याः ततोभ्रातुरित्येवंरूपःमातुर्दुहि
तुरभावेतदन्वयादित्यादिवचनेषुबलवत्तःश्चाद्क्रमस्यप्राप्तेरितिकेषांचिन्मतंतदपाकर्तुमाह द्वंद्व
श्रवणेपीतिननुतुल्यार्थेतिचार्थेद्वंद्वइत्युक्तेद्वंद्वसमानार्थताचकारस्यपुत्रपरमितिदुहितुःपृथगुपादाना
पुंसकस्यचाधिकाराभावादितिभावः सर्वावस्थेति ससकुलस्यचेत्यर्थः अत्रसहोदरपदाद्युपादानात्कन्या
सत्वेदत्तकादीनांनाधिकारःदुहित्रपेक्षयापंचमाद्यंशभागितापुंधनवदीतिकेचित् एतावतापिउक्तक्रमे
ग एयोगपद्यायदेमेपितद्धहेमन्तस्यैचिवादस्यचचकारश्रुतिलाभन्तयोर्विभागेसाहित्यावगमः श्री रामः
हित्यवपात्रैर्धाचेत्यादावविभिन्नकालीनयोरपिएकजातीयक्रियसंबंधमात्रेणतस्याश्रितार्थत्वात्० ॥४३॥

अनःथापत्निदुहितरश्चेत्यादौन्चकारश्रुतिबलेनपत्नीदुहित्रोरपियुगपदधिकारापत्तेरित्येवंरूपः
तत्रमन्नस्यसमर्थस्यगलहस्तसन्निरेकरइत्यर्थः तद्वचनमाहयथेति·अप्रजायामिति·प्रजासंतति
पुत्रदुहित्रपौत्रदौहित्ररहितायामित्यर्थः।सुव्यक्तमिति·सामान्यपदादितिशेषः केवलकुमार्याइति
भ्रातृसत्वेपीत्यादविशेषवचनेवक्ष्यमाणं·ननुभ्रातृभगिन्योरधिकारेभगिन्यपेक्षयाभ्रातु
रभ्यर्थीतत्वेनविंशोद्धारप्रशक्तौतन्निवर्तकतयैवसमत्वविधानंसार्थकमितियदितदाकेवल
भ्रात्रधिकारपक्षेपितुरेवसार्थकमिति कथमनर्थकत्वेत्याह·किंचेति वचनन्यायेतिवचनंसा
मान्यपुत्रकन्यानामितिन्यायः।किंचेत्यादिनोक्तयुक्तिः अन्यतरेति·भ्रात्रोरिवतुल्याधिकारादिति
भावः ऊढायाइति· नपुनर्वक्ष्यमाणयौतकधनवत्· कन्यायाअभावेवाग्दत्तायास्तदभावेऊ
ढायाइतिक्रमःप्रमाणाभावादितिभावः अतएवपार्वणपिंडदानादेवउपकारांतरमपिहे
तुमाहदौहित्रोपीति·स्वसत्वयासाक्षात्स्वजन्यसत्वयास्वपुत्रद्वारेणचोहतोयद्यपिपुत्रवती
नामपिस्वसत्त्वयापिंडदानाभावस्तथापिदृष्टांतार्थेनदुक्तिः यतःस्वपुत्रद्वारेणतस्योपकारकत्व
यादुहितॄणांधनाधिकारोऽतएवनारदेनसंतानदर्शनंदुहित्रधिकारेहेतुतयानिर्दिष्टमित्याह·अत

Indira Gandhi National
Centre for the Arts

 एवेतिपुत्रेणेति॰ एतेनयौतकधनेदौहित्रस्यैवाधिकारःसूचितः एतस्यैवाबाध्यत्वादितिबोध्यं॰
 दौहित्रपर्यंतानामिति॰ प्रपौत्रपर्यंतोपलक्षणं दौहित्रानंतरं महोपकारकत्वेनतस्येनाधिकारात्
तयोरपीति॰ तेनैवपर्वतयोरनधिकारःकथनंतदुक्तपर्यंतसद्भावेद्वयोर्यौगपद्याधिकारेकेवलक
न्याधिकारबोधकवचनविरोधपरिहारार्थंतद्वचनान्यत्वपरत्वइति ननुअत्रविनिगमनाभावःदेवला
दिवचनानांयौतकविषयकं अन्तरेणगौतमादिवचनानां॰ अयौतुकविषयत्वमित्यस्यापिसंभ
वादतोमनुवचनैकमूलकत्वंविनिगमकमाह॰ अतएवेति॰ यतएवयौतकएवप्रथमंकुमार्या
धिकारः अतएवमनुनाकुमार्याधिकारेयौतकपदमभिहितमितिभावः अस्थितिरिति॰ कन्या
स्थितिवाऽस्थित्येकतामाप्नुवंतीत्यर्थः एवमन्यत्रापि यतोविवाहसमयलक्ष्यपरमेवयौतुकं अतो
त्रवशिष्टेनापिपारिणाय्यमुक्तं अन्यथाफलांतरकल्पनापत्तेरित्याह अतएवेति॰ अतएवपारिणा
य्यपदमपिविवाहलक्ष्यपरमेव नतुकल्पतरुप्रभृतिभिरुक्तं यत्परिच्छदादर्शकंकतिकादिरूपंपारि
णाय्यंतत्परितक्त्वेऽस्मितियिककल्पनापातात्परिणायनशब्दस्यविवाहेरूढत्वाद्विवाहसमयादन्य
त्रापीति॰ तथाचपित्रादत्तंयौतुकमयौतुकंवातत्सर्वकन्यायाएवतद्बोधनार्थमेतद्वचनं॰ मातुश्चयौ

तुकंयत्स्यादितिसर्वंवचनंतुयौतुकसामान्येकन्यामात्राधिकारार्थमितिनान्यतरवैयर्थ्यमितिबो
ध्यं कन्यायाएवेति एवकारेणनिरासः ब्राह्मणीपदस्यानुवादत्वेवैयर्थ्यमाशंक्याह॰ यद्वेति॰ ननुब्रा
ह्मणीकन्यायाअधिकारावगमात् स्त्रीपदंब्राह्मणीपरमस्तुक्षत्रियादिपरत्वेकन्यापदस्यामुख्य
तापत्तेरितिवाच्यं अनुढात्वेनकन्यापदस्यसपत्नीकन्याअधिकारावगमात्स्त्रीपदंब्राह्म
णीपरमस्तुक्षत्रियादिपरत्वेकन्यापदस्यामुख्यतापत्तेः) बोधकतयाअमुख्यत्वाप्रसंगोक्तेः
तद्रूपेणेवकन्यापदस्यशक्तेः आनर्थक्यभयादिति॰ नचानर्थक्यभयात् परिसंख्यैवास्तु तथाच
ब्राह्मण्येवहरेत् नान्येति परिसंख्ययाक्षयोत्रिदोः पितदत्तयौतकेसत्यामपिकन्यायांपुत्राणा
मेवाधिकारस्यादधिकारः इतिवाच्यं॰ स्वार्थहान्यादिदोषत्रयापत्तेः एतपेक्षयाकन्यापदस्याजह
त्स्वार्थलक्षणासपत्नीकन्यापरं याज्ञवल्क्यवचनेषष्ठ्यंतविविपरिणामेनान्वयकल्पनंच दुहितु
रेवान्वयोयुक्तन्याय्यइत्यत्रआह किंचेति तथाचबौधायनस्यसंकोचकल्पनंयाज्ञवल्क्योक्तेः षष्ठ्यंताव
परिणामेनान्वयकल्पनंचापेक्ष्यततत्पदस्यानुषंगप्रयासनिरासार्थमनुवादएवन्याय्यइतिभावः यौ
तुकंसर्वंवस्तुत्वदुहितॄणामेवतदभावेपुत्रस्येत्युपसंहरतितत्तश्चेति दुहितारिसत्यामितिशेषः त

Indira Gandhi National
Centre for the Arts

दायभाग१ त्रैवदुहित्रधिकारविशेषएवक्रमार्थंकुमारीणांवाद्त्तानामूढानांचक्रमेणाधिकारार्थप्रथममिति·अप्रत्ताअवा
॥४५॥ ग्दत्ताअप्रत्तावाग्दत्ताचकारार्थःलभ्यमाहसमूढानामिति·ननुयद्वैपेगेवाप्रतादीनामधिकारस्यवचनार्थंत्वस
म्भवात् कथंक्रमकल्पनेसत्तआह·दुहितॄणामितीति·क्रमार्थत्वेनक्रमिकाविकारत्वेनयःसामान्यप्राप्ता
धिकारस्योपसंहारेवोधस्तद्रूपर्थत्वादित्यर्थःउपसंहारोर्थोयस्येतिवहुव्रीहिणाउक्तार्थलाभात्·उपकार
परत्वस्येवन्यायत्वादिति·ब्राह्मणीपदमुत्तमजातीपरंतेनैवैश्यायाअपितथाविधायाःपितृदत्तधनंक्षत्रि
यागृह्णीयादितिमिताक्षरायांव्यातंतत्प्रमाणाभावर्त्वेपेक्षणीयमिति·सकलवचनानामितिपितृदत्तसाधा
रणयोतुकधनस्यामान्येकन्यापुत्रयोस्तुल्यवदधिकारवोधकवचनानामित्यर्थःनारदादिवाक्ये·अन्वयपदंस
न्निहितत्वात्दुहित्रन्वयिदौहित्रपरं तथाचसत्यपिपुत्रेदुहित्रभावेदौहित्रस्यैवाधिकारइति·केषांचिन्मतमपा
कर्तुमाहनचवाभ्यामिति·ऽन्यविशेष्येति·विशेषःस्त्रीरूपःअनेकाक्षीतत्वात् जनकमात्राकांक्षितत्वात्·
जन्यतयोपस्थितानिराकांक्षितत्वात् अन्यांतरेणजन्यतयोपस्थितेन अन्वयपदोपात्तेनेतिपूर्वसत्वापूर्व
सत्वविशिष्टसत्वरूपयोःसाध्यत्वसाधनतयोर्विरोधेनेकस्मिन्धर्मिणिएकपदोभयसंभवा[illegible]भवादिति
भावः अन्वयपदस्यापिदुहित्रन्वयेनिराकांक्षत्वमाहसमत्वादिति द्वयोरेवजनकमाकांक्षतयातुल्यत्वादित्य

१

र्थःअभिधानेनितंतन्यत्वोशमपहायदुहितृपदस्यस्त्रीत्वेनरूपेणलक्षणयेत्यर्थःअन्वयोवाच्यइतिजन्यत्वे
नानुपस्थित्यापरस्परनिराकांक्षत्वविरहादितिभावः सर्वेषामितिदुहितृपदान्वयपदकास्यायनोक्तपु
त्रपदानामित्यर्थःमुख्यत्वस्विकारादिति·तथाचमातुरन्वयार्थमुख्यस्यदुहितृपदस्यान्वयपदान्वयार्थेनपु
नर्लक्षणयागपद्वृत्तिद्वयविरोधादितिभावः नशब्दोपात्तायाइतितदाबुद्धिस्थत्वेनैवउपस्थापितायाइत्यर्थः
दुहितृस्वरूपेणेतितथानिराकांक्षत्वनदवस्थमितिभावः ननुअन्वयपदार्थस्यमातुरिसनेनान्वयेतत्पदस्येवार्थे
नचतत्पदोपस्थितायाएवमातुरन्वयोवाच्यःमातुर्विशेषणत्वेनाप्रधानतयातदापरामर्शासंभवात्· तदानी
विशेष्यपरामर्शस्यात्कर्षितत्वात् तथाचप्रधानीभूतदुहितुरेवपरामर्शायाअन्वयेनान्वयोवाच्यःनचज
न्यत्वेनापस्थितायादुहितुर्जनकत्वान्नान्वयेविरोधःएकनिरूप्यजन्यजन्यकत्वयोरेकैकस्मिन्धर्मिणिवि
धेनभानानभ्युपगमात्·इहतुमात्रपेक्षयाजन्यत्वंअन्वयपदार्थापेक्षयाजन्यकत्वंदुहितुरितिनिरूपक
भेदात्·अतएवदुहितुश्चैवयेपुत्रादौहित्रास्तेप्रकीर्तिताःइत्यादिवचनेषुदुहितुःपुत्राइतिसंगच्छतेइत्थंचात्र
दुहित्रन्वयेनिर्णितिएतदेकश्रुतिमूलकतयायत्रमदंत्येनास्तीतत्रापिवचनेदुहित्रन्वयएववाच्यःइत्यतआहकिंचे
ति किंचेति·षष्ठ्यंतमपेक्षाषष्ठ्यंतपरिणामेनान्वयेगौरवादितिभावः अविरोधात् एकश्रुतिमूलत्वेअविरोधादि

Indira Gandhi National
Centre for the Arts

दायभागटी॰ त्यर्थः ननु तथापि नारदवचने मातुरन्वयेतत्पदव्येयर्थ्यापातात् समर्थादिति पाठे सम्यगर्थः प्रयोजनं
११५/६॥ यस्येति पूर्वोक्त एवार्थः तथा च प्रथमं कुमार्यास्तदभावे वाग्दत्ताया: सगोत्रत्वेन ऊढापेक्षया बलवत्त्वात् तद
भावे समूढायास्तत्रापि पुत्रवती संभावितपुत्रयोस्तदभावे ऽन्वयोस्येति क्रमः नच चकारश्रुतेरेतादीनां पुत्रपदधि
कारे रत्नाकरसंमतो युक्त इति वाच्यं मातुश्चयोर्नुक्तं यत्स्यात् कुमारीभाग एव सदृतिमनुवचनेनैरपेक्ष कुमारी
पदश्रवणात् एवकारश्रवणात् कुमारीमात्राधिकारात्त्र तत्तुल्योपकाराभावेन्याय विरोधाच्च सामान्येन प्राप्ति
र्याज्ञवल्क्यवचनादपि स्यात् तथेति ब्राह्म्यादिषु चतुर्षु विवाहेषु ब्राह्म्याएसह पुच सुभर्त्तुः शेषेषु आसुरादिषु
पितृगामिप्रसूता च तदुहित्राणां अर्थात् सर्वेत्यर्थः प्रथमं कन्यायाइति पूर्वोक्तवचनेकमत्वकत्वादिति भावः नचात्र
दुहितृपदं दौहित्रपरं अन्यथा मातुर्दुहितरः शेषमित्यनेन पौनरुक्त्यापत्तेः इति मिताक्षरोक्तमिति वाच्यं मातुर्दुहित
रइत्यस्याथमिविषयत्वेनोपसंहारतयातदतिरिक्तपरिणयनलब्धविषयतया च तस्यापुनरुक्तत्वात् तस्य चक्रा
णावशिष्टस्य विशेषानंतरमन्वाधिकारायस्य सार्थकत्वात् तद्वचनं कन्याधिकारार्थं इदं तु स
समूढाधिकारार्थमिति केचित् उभयत्रैव दुहितृपदमात्रश्रुतेर्विशेषादुभयाधिकारस्यै
व सिद्धेरपरवचनवैयर्थ्यस्य दुस्परिहरत्वात् दुहितॄणामेवेति नतयोर्नुक्तधनवत्पुत्रदुहि

त्रोरित्यरित्यर्थः ननु वचनबलात् दुहितृभावरवभर्तुरधिकारप्रसंगः कथमं तरापुत्रस्या
धिकारः इत्यत आह अप्रजास्त्रीधनइति नतुगोतमवचनात् यौतकधने समूढापर्यंतानां दुहि
तॄणामधिकारोक्तेः अयोतुकेतु स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी अप्रत्ता चेत्समूढा तु
न लभेत मानकं धनं इति बृहस्पतिनेकेन समूढानाभ्रात्रादिसत्वेधिकारः स्यादित्याशंकायां त
च इत्वनस्यैवार्थभेदेन न तत्र समूढाधिकारे प्रमाणमित्याह बृहस्पतिनेति अप्रत्तापदेनेति अत्रा
यं भावः अप्रदत्तापदं दुहितृपरं समूढापदेनैव दुहितुरप्रमाणत्वकाभावात् किंतु अप्रत्ता चेदर्थास्ति
तदा समूढैव न लभेदित्यर्थः तथा चाप्रत्ताभावे समूढाधिकारो बृहस्पतिना प्रतिपादितइति
अप्रत्तायादुहितुः पुत्रसमत्वात् अप्रत्ताभावेप्रतिपादिते अर्थात्पुत्राभावेपि प्रतिपादितइत्यत उ
क्तं अप्रत्तायभावे तिष्ठा ब्राह्म्यादिविवाहेन भार्यात्वं प्रत्तायाया वक्तनगोचरमेव वचनामिति मिता
क्षरोक्तमपाकर्तुमाशंकते नचेति नेदं वचनमिति किंत्वप्रजास्त्रीधनं भर्तुरिति याज्ञवल्क्य वचनमि
त्यर्थः बंधुदत्तमिति वचनस्यातिबंधुदत्तं यथाश्रुतं अन्वाधेयकमेव च अप्रजायामतीतायां बां
धवास्तदवाप्नुयुरिति वक्ष्यमाणबाधकपक्षे पात्रभ्रात्रधिकारबोधकेत्यर्थ निर्विषयतयेति तत्रा

दायभागटी॰ यनेनवचनेनभवन्मते भ्रात्राधिकारसिद्धेरित्याशयः अथतद्विरोधादस्यतत्संसर्गवचनस्यवंधु
॥५७॥ दत्तशुल्केतरविवाहपूर्वसमयलब्धविवाहोत्तरपुत्रादिदत्तविषयत्वमाक्षिपतआहमनुविरो
धाच्चेति· अनुसह्यतेइति· ननुभार्यात्वप्राप्तायाइत्यस्यतिभावः इत्यध्याहारोऽनुषंगापेक्षयातस्यगु
रुत्वादितिभावः एवंचैदेतेकवाक्यतयायाज्ञवल्क्यवचनेपिदत्तमित्यस्यैवाध्याहारोयुक्तोनतु
भार्यात्वं प्राप्तायाइत्यस्येतिभावः पञ्चकन्नविषयत्वमितियोतुकधनेभर्तृसत्वेपिपित्राद्यधिकार
स्यैवरक्ष्यमाणत्वादितिभावः योतुकायोतुकमप्रजास्त्रीधनाधिकारिणोनिरूप्याप्रजास्त्रीध
नाधिकारिणोविरुद्धः प्रतिजानीतेसम्प्रतीति ब्राह्मेत्यासुरेनेअतद्गुणसंविज्ञानबहुव्रीहिणा
देवाद्यपत्वारोधिकारसमुच्चीतेनब्राह्म्यगणसहपंचेत्यर्थः उक्तार्थकल्पनेहेतुमाहब्राह्म्येति
तथाचमन्वेकमूलतानुरोधादतद्गुणसंविज्ञानबहुव्रीह्याश्रयणमितिभावः नपुनरित्यादि
उक्तस्यापियुक्तत्वंतदभिधानायपुनःकीर्त्तनंतद्विवाहकालार्थत्वादितिनिर्देशस्यब्राह्म्यादि ॰दना
पदस्यकालार्थत्वात्विवाहस्यदानाधिकरत्वकाधेनब्राह्म्यादिकालबोधकत्वात्· गोषुदुह्य
मानासुआगतइत्यादिसतिसप्तमीस्थानेदुह्यमानासुआगमनक्रियान्वयबोधेनक्रियाकाल

लक्षणायानिरूढत्वादितिभावः ननुब्राह्म्यादिपदानांस्त्रीष्वेवकुतोनलक्षणास्यादत्राहब्रा
ह्म्यादिपदानामिति· एकत्वेनेति ब्राह्म्यादिपदंयदिस्त्रीपरंतदाअस्याइति· उत्तरवचनस्थेन
सामाधिकरण्यानुरोधोत् एकत्वेनषष्ठ्यानिर्देशःस्यादितिभावः दूषणांतरमाह विवाहका
ललक्षणायामिति· वर्त्तमानसंबंधेनेति· वर्त्तमानकालस्तत्रविवाहस्ययःसंबंधोऽधिकरण
त्वं तद्रूपेणलक्षणास्यादित्यर्थः अतिक्रांतेतिअतिक्रांतायाविवाहक्रियातत्संबंधेनतज्जन्यसं
स्कारत्वरूपेणजघन्येतिविवाहाधिकरणकालतापेक्षयातज्जन्यसंस्कारत्वस्यलक्षणावच्छे
दकस्यगुरुत्वादितिभावः उपलक्षणंचैतत् कालपरत्वेलक्षणानिरूढास्त्रीपरत्वेपुनरधुनिकी
लक्षणातासुतद्दानस्यतद्दानस्यचाधारत्ववाधोपीतिद्रष्टव्यंब्राह्म्यादिपदानांस्त्रीषुलक्षणामस
हमानमाह· नन्वेतिस्त्रीवाचत्वमिति दारादिपदवन्नियतलिंगत्वमेषामित्याशयः मातागच्छे
यादिति· एवंचशेषेषुपितृगामितदितियाज्ञवल्क्यवचनेपितृपदेएकशेषोद्रष्टव्यः यद्यपिधन
संबंधस्यप्रत्येकपरिसमाप्तत्वेनसाहित्यासंभवेपिपालिभ्यांत्पसङ्गस्यद्वन्द्वादानिवद्वंद्वलाभसहत्व
प्रतीतौयुगपदूनाधिकारएवप्रतीयतेतथापित्रोरित्यनेनापितथार्थसिद्धेर्मातापित्रोरितिक्र

४ दायभागटी माभिधानेन मातुरभावे पितुरिति क्रमिकार्थमेवेत्याह युगपदीति पित्रोरिति सकृदुच्चरित
॥५८॥ पितृपदस्य जनकत्वेन लक्षणया युगपदुपस्थितिसंभवादिति भावः ननु लक्षणायां प्रमाणा
भावात् अत्रापि प्रातिपदिक पितृपदात्प्रथमं जनकपुंस्त्वेनोपस्थितौ पश्चाद्द्विवचनोपनीत द्वित्वा
न्वयानुपपत्त्यैवैकशेषकल्पनया मातुरुपस्थितिरिति क्रमाभिधानमस्त्येव अत एव पितरौ भ्रा
तरस्तथेति याज्ञवल्क्यवचने अनयैव रीत्या पितृक्रमावगमं वक्ष्यतीति चेन्नैवं पितरौ भ्रातरस्त
थेति अत्र तदभावे मातुरिति स्फुटक्रमाधिकार इत्युक्तथाविधविशेषवचनाभावात् इत्युक्तल
क्ष्यार्थपरित्यागे हेत्वभावात् युगपदुपस्थित्यर्थं लक्षणाया युक्तत्वादिति इत्थं मातापित्रोरिषु
क्रावपि क्रमीकाधिकारबोधक तथाविधप्रमाणाभावात् वाक्यावगत युगपदधिकार एव कु
तो न स्यात् अत एव शेषेषु पितृगामित्वाद्विसेकशेषेण युगपदधिकार एव याज्ञवल्क्य
वचनेनोक्त इत्यत आह कन्याधन इति अत्रायीति तथा च दृढाद् एकशेषाद्युगपत्साहित्या
वगमोन धनं संबंधापेक्षया तस्य प्रत्येकपरिसमाप्तत्वात् किंत्वभिधानापेक्षया यु
गपद्ज्ञानं श्राद्धं निषेधादिश्रुतिर्याति क्रमीकयोरपि संभवतीति किमधिकारः क्र

मेण युगपद्वा इत्याकांक्षायामेकत्र दृष्टन्यायात् कन्याधर्मेनवत्र तथाविधोदाधाने
पि क्रमेणाधिकारः कल्प्यत इति भावः तदनेनेति नत्वेतन्निरूपणप्रकरणांतरे
पुनः करणीयमिति भावः वाग्दत्तामरणे तु वरदत्ताव शिष्टं वरेण हरणीयात्
तथा याज्ञवल्क्यः दत्ता कन्या हरेणादद्योव्ययं दद्याच्च सोदयं मृतायां सर्वमादद्
यात्परिशोध्योभयव्ययात् इति तथा चाहतीसनु दृत्तोशङ्खः स्वयं शुल्कं
वोढेति वाग्दानकाले यद्येन तदत्तं तत्तेनैव ग्राह्यमिति संप्रदायः अत्रापि यो
तकधनेपि ननु वचनाभावेपि एकत्र दृष्टान्यायादेव तथा स्यात् अत आ
ह पित्रोरेवेति एवकारेण भ्रातृत्वव्यवच्छेदः तथा च वचनेनैव तदधिका
राकाङ्क्षानिवृत्तेर्नन्यायावसरः इति भावः पितृमातृभर्तृकुलादिति अ
न्वाधेयपदार्थ उक्तः भ्रातृणामेवेति न पुनर्भर्तुः पित्रोर्वेत्यर्थः वचनानुरोधात्
प्रथमं बंधुदत्तमिति व्याचष्टे बंधुदत्तमिति कन्यादशायामित्यनुपदमेवव

Indira Gandhi National
Centre for the Arts

दायभाग टी. वक्ष्यति अत एव वक्ष्यमाणवचनैकवचनवाक्यतया पित्रोर्बन्धुपदार्थत्वावा
११८ ॥ भावाच्च वा बांधवादिति बांधवशब्दस्यानीतियोगादिति भावः बंधुपदबांधवपदयो
र्यत्कार्थत्वे प्रमाणमाह तद्धेति अप्रज्ञात्वमात्रनिमित्तत्वेनेति अत एव कन्यायामपि अ
प्रज्ञात्वाविशेषात् तद्विषयत्वमक्षतमिति बंधुदत्तपदेनेति वक्ष्यमाणग्रंथसंगतिरिति
अतो राक्षसादौ शुल्काभावादित्यादिवक्ष्यमाणपानिरासोऽस्पष्टा तत्क्रममाह सर्वैदि
ति प्रागुक्तमप्यन्वाधेयकमिति व्यवस्थितत्वादुपास्थितिसोकार्यत्वं पुनराह अन्वा
धेयमित्याहेति भर्तुरवेति शेषः गृहोपस्कारेति उपस्करः कनककुंडलहारादि
सर्वादीनि केचित् याज्ञवल्क्यवद्धादिः गृहादिकर्मभिरिति शिल्पिभिर्गृहादिशि
ल्पकरणं तन्निमित्तं शिल्पिरूपमत्रोपकरणार्थमित्यर्थः न च स्वयमेवास्त्रियागृहा
दिशिल्पार्थं न यन्मूल्यं तद्धनं तत्पर्यन्तं माकथं न व्याख्यातमिति वाच्यं तस्य प्राप्तौ शिल्पे
नैव स्त्रियन्निसंप्रस्याच्चैव दद्येन्यतः भर्तुः स्वाम्यं भवेत्तत्र शेषस्त्रीधनस्तामित्येनेनैव

धनत्वनिरासात् बंधुदत्तमिमिति वचनस्य प्रकरणात्स्त्रीधनविषयत्वादिति अ
न्यथा व्याख्या भर्त्रादिप्रेरणार्थमिति तत्संकोचः कथं शुल्कः शून्यस्येव शुल्कत्वात् अत आहत्तदे
वेति व्यासोक्तंम्वेति वा समुच्चयेत्तद्वेति एतेन वक्ष्यमाणासुरादिविवाहप्राप्तशुल्कपरत्वाभावमस्य
सूचितं वंदुश्च रादिपुरस्कृतंप्राचीनमतं दूषयति न पुनरिति आसुरादिमात्रेति तथा चासुरादसादि
नारा /क्षसपैशाचग्रहणासंगतमिति भावः आसुरमात्रे शुल्कं नेतरयोरित्युत्कार्थत्वे प्रमाणमा
ह यथोक्तमिति शुल्कसाहचर्यादासंरादरात्रिबुधद्वंधुधनं तदेव भ्रातृगामी ज्ञियतत्के श्रिदुक्तं त
दपि दूषयति अतइति राक्षसादाविवाहिनापैशाचपरिग्रहः तथा च तयोः शुल्काभावात्साहचर्येण
तदुभयसंबंधिधनस्य भ्रातृगामित्वाभिधानमसंगतमित्यादेयमित्यर्थः अथादिपदमपैशाच आ
सुरएवेति वक्तव्यमित्यत आहत्तथेति उपलक्षणमिति कन्यार्थं दारुमात्रोपलक्षणमित्यर्थः
शुल्कसाहचर्यादिति यदुक्तं तस्य राक्षसादावादिपदग्राह्ये शुल्काभावदोषे शास्यतेऽक्तो धन्या पुनरासुरा
दिसुरमात्रीयं बंधुदत्तादि धनं शुल्कसाहचर्याद्भ्रातृगामीति मतं निरस्यति अतइति यतः शुल्कं कन्यादारेन कन्या

Indira Gandhi National
Centre for the Arts

दायभागटी॰ याअतद्रूरसर्थः किंतु ते तिग्रहोस्कारइत्यादिनायदानेतुमित्यादिनाचाक्तेरसर्थ एषु शुल्कपरिभा
॥५०॥ षाया अथ तदेव प्रयोजनं प्रयोजनाल्लस्यादूत्सतादिसपि बोध्यं बाक्यादिति बंधुदत्तमित्यावाक्यादित्यर्थः
विशेषाश्रवणात् आसुरादिविशेषाश्रवणात् कात्यायनसमानार्थमितिपित्र्यांचेवयदत्तमि
त्यादिकात्यायनसमार्थः गोत्रमपवदन्नेमाह भागिनी शुल्कमिति अत्र शुल्कपदेन पारिभा
षिकशुल्कस्यैवग्रहणं शास्त्रीयपरिभाषाया अंतरंगत्वेन शीघ्रोपस्थितित्वात् नतुमूलरूपस्येति
भावः परमतमिति सोदरानंतरं पितुः तदनंतरं मातुरिति परमतमित्यर्थः स्वमतमुपसंहरति अतःत्र
थममिति एषां भ्रातृमातृपितृणां बंधुदत्तं मातापित्रदत्तं भ्रातुर्भावे भ्रातृभ्रातुभावएव पित्रोः पित्रो
रधिकारात् तयोरेकाप्रकृत्याभावे भर्त्रधिकारे तदभावस्य दंडापूपन्यायात् सिद्धत्वादिति
भावः औरसपदेनेति विशेषणीभूतलिंगपरित्यागेन कन्यापुत्रयोर्द्वयोरेव प्रकृत्यर्थत्वादिति
भावः लिंगपरित्यागे हेतुमाह तयोरिति तथा च लिंगस्य विवक्षणे पुत्रानंतरं कन्याधिकार
विधिरोधः स्यादिति भावः सपत्नीपुत्रस्येति एतच्च दत्रिमादेरप्युपलक्षणं तद्भगिन्या अपीति बोध्यं

अस्या अपि स्वपुत्रद्वारेण भ्रात्रादिपुरुषत्रयपिंडदातृत्वात् सपत्नीपुत्रस्याभावे दौहित्रस्याधिका
र इति अयुक्तमेतत् दौहित्रस्योपादिष्टप्रजात्वेन स्वभोग्यभर्तृपिंडदत्वेन च प्रागधिकारस्यैवोचि
तत्वात् वंध्याविधवादुहित्रसत्वेपि प्राग्दौहित्राधिकारस्योक्तत्वात् अत्र औरसपुत्रकन्ययोरित्यवि
शेषात् कन्यापदात् तद्भावे दौहित्राधिकारे स्वोक्तविरोधाच्च तस्मात् सपत्नीपुत्र वंध्याविधवादुहितृ
णां प्रयुक्तो दौहित्राधिकार इति बोध्यं अत एव तत्सुत इत्यत्रापि पाठक्रमो न ग्राह्यः पौत्रस्य वंध्यादिदु
हितृसपत्नीपुत्रादौहित्रेभ्यो ऽपी तु वंध्यतो प्रागधिकारस्योक्तत्वात् तन्न च दौहित्र एव वै
सत्रवाशवृन्यां जयन्नेवगमात्वाचनिकृएव सपत्नीपुत्रानंतरं दौहित्राधिकारइ
ति वाच्यं सुतपदस्य सपत्नीपुत्रपरतया भिवस्यात् सेवसिद्धप्रमाणाभावात् न चैवं सपत्नीपुत्रस
त्वेपि भगिनीपुत्रस्याधिकारः स्यादिति चेदलनात्योपित्राघुपादानाभावात् तत्रत्वेपि तर्हि कि
न स्यात् न दृष्टि तत्राधिकारानंतरं संहितायालिखनात् तेषामभावएवैषामधिकार इति चे
त्तर्हि पुत्राद्यनंतरस्यापि सुतरां प्राप्तेरनधिकऔरसाद्युपादानं तस्मादौरसादिपदं पूर्वपूर्वाधिकारिमात्रोपलक्ष
णं तेषामधिकारक्रमस्य वचनांतरेणैव प्राप्तेस्तान्यनुपतेषामनंतरं भगिनीपुत्रादिनामधिकारवे

Indira Gandhi National
Centre for the Arts

दायभागटी. चिकं वृहस्पतिवचनमित्यस्य नन्वमार्यीतानामभावइत्यादिनोक्तमुपसंहरति तदेवमिति
५१ दौहित्री तस्य स्वजोयांस्मसुरभ्रा भ्रश्वशुरादिवगणानानतेषु समुइत्युक्तं वस्तुवलमिति उ
५२ पकारकस्वरूपं वस्तुवलमित्यर्थः तद्रूपवस्तुवलस्य धनहरणप्रयोजकत्वेमानमाहत्र
त्रयाणामिति अधिक्रियते अधिकारीभवति नत्तु स्वगोत्रय पित्रादित्रयपिंड
दाता भर्त्तृभागिनेयश्वश्वशुरादीत्रयपिंडदातातथा च तुल्यपिंडदातृत्वे कथं
भागिनेयस्य स्वस्त्रीवाध्यतादृत्यत आह पुत्रादिति पुत्रत्वातिदेशेनपुत्रदेय
पिंडत्रयदातृत्वेन च स्वस्त्रीयस्य पुत्रस्थानपातिता भर्त्तृदेयपिंडत्रयदातृत्वेन
भागिनेयस्य भर्त्तृस्थानपातित्यर्थः तथा च न्यायवलेनेव भर्त्तृभागिनेयस्य स्व
स्त्रीयवाध्यतेतिभावः न च नाथापरिज्ञानेति उक्तमनुयाज्ञवल्क्यादीनां पर्यायापरि
ज्ञानकृतइत्यर्थः व्यवहारः स्वस्त्रीयाधिकारेति पाठक्रमेणाधिकारस्य व्यवहारः प्रमाणप
रतंत्रे प्रमाणैकसापेक्षः अत्र अप्रयोजककंप्रमाणमित्याचत अत्राये स्त्रीधनाधि
कारक्रमनिर्णय तत्र कन्याधनप्रथमसोदरभ्रातुस्तदभावेमातुः तदभावे पितुरधिका

तदभावे पितुरधिकारः वरदत्ता त्रिस्थिवाग्दत्तधनेष्वेवं वरदत्तधने वरस्याधिकार इति ऊढा
यायोतुकप्रथमं कुमारीतदभावेवाग्दत्ताधिकारिणी। एतयोरभावेऊढायाः पुत्रवतीसं
भावितपुत्रयोर्युगपदधिकारः। एकस्याभावे चापरस्याः एतयोरभावेवंध्याविधवयो
स्तुल्याधिकारः इति विशेषः ततो ब्राह्म्यादिविवाहपंचकसमयलब्धयोतुकधने भर्त्ता
भ्राता माता चेति क्रमः। आसुरादिविवाहत्रयसमयलब्धयोतुके माता पिता भ्राता
भर्त्तेति क्रमः तदतो देवरः ततो देवरपुत्रभ्रातृश्वशुरपुत्रौ ततो भगिनीपुत्रः ततो भर्त्तृ
भागिनेयः। ततो भ्रातृपुत्रः ततो जामाता ततः श्वशुरः। तत आनंतर्यक्रमेण सपिंडाः त
तो सकुल्याः ततः समानोदका इति योतुकातिरिक्ते पितृदत्ते प्रथमं कुमारी ततः पुत्रवती
संभावितपुत्रे ततः पौत्रदौहित्रसपत्निपुत्रपौत्रप्रपौत्राः ततो वंध्याविधवायुगपदधिका
रिण्यौ ततो ब्राह्मणादिक्रमेणैव पूर्ववत्क्रमः पितृदत्तातिरिक्ते योतुकधने तु पुत्रकुमार्योर्यु

Indira Gandhi National Centre for the Arts

दायभागीणपदधिकारः तयोरभावे पुत्रवती सैमा वितपुत्राया: ततः पौत्रदौहित्र सपत्नीपुत्रपौत्रप्र
॥१५३॥ पौत्राः क्रमेणऽधिकारिणः ततो वध्याविधवाच्युग पधिकारिणोततः पूर्वा वन्ध्रात्रधिका
रक्रमइति अथदायभागनिरूपणीयइति प्रतिज्ञायामस्या धिकारिनिरूपणमप्रस्तुतम
तआहत्तत्पर्युदासेनेति तथाचतदभिन्नाधिकारिकतयादायभागनिरूपणेतदपिप्रकृतमे
वेतिभावः।ज्येष्ठपीतिप्रतिपादयतीत्यनेनान्वयः वाननतन्नाम्नानिबंधकारेणेत्यर्थः भिन्नो
दकीकृतइति पातित्याद्विदोषेणयेनसहैकमुदकंनापायातेव्यवहारानर्हइतियावत् उत्तम
र्णाधमर्णेभ्यइतिधर्मपरोयंनिर्देशः उत्तमानादेवपितृणांअधमानाकीटादीनाऋणमव
श्यतारणीयत्वेनऋणतुल्यंतेभ्यइत्यर्थः।बहुवचनंतुपितृसंभेदात् असंस्कृतोऽनुपनीतः।
महाफलश्रुतेरित्यनंतरंमहाविष्टनिवारणाश्रुतेरित्यपिबोध्यंतेनोक्तिपुन्नामनरकत्रैणास्य
पुत्रकर्तृकत्वाभावेपिनक्षतिः विकर्मस्थाः और्द्धदेहिकस्यकर्मणोविरोधीनियानिकर्माण्य

ता।पा

गम्यागमनादीनितत्कारिणइत्यर्थः।जातपदमितिजन्मार्थकंजातिपदमित्यर्थः।तेनज
न्मानुजन्मबधिरा।वित्यर्थः तत्सुतइतिपतित्यानंतरंउत्पादितसुतइत्यर्थः यद्यपिपतितपुत्रस्या
पिपतितत्वमेवतथापितस्यपृथगुपादानतदितरेषांक्लीबादिपुत्राणांअंशित्वज्ञापनार्थ
मिति नचपातित्यानंतरोत्पन्नपतितपुत्रस्यपतितत्वेनैवप्राप्तेस्तत्सुतइति प्रागुत्पन्नपतित
पुत्रसंग्रहार्थमित्येवकिंनस्यादितिवाच्यंक्लीबादिपुत्राणामितरस्यापिनिर्दोषत्वाद्विभागार्हता
यान्याय्यत्वात् विशेषस्यवाचनिकत्वेनादृष्टार्थकल्पनागौरवापत्तेः।अचिकित्स्यरोगातइ
तिश्रुतेर्यदिविभागानंतरमौषधादिनारोगनिवृत्तिस्तदातस्याप्यंशित्वमेवेतिप्रतिपत्तव्यं अ
सवर्णजातापीतिउत्तमवर्णेनाधमवर्णायामुत्पादितोपीत्यर्थः प्रतिलोमेतिहीनवर्णेनोत्तमवर्णा
यामुत्पादितोनत्वस्यविभागोपीत्यर्थः स्वपित्र्यमिति यदाबंधुभिः स्वपित्र्यमेवधनंप्राप्तंनतु
तत्पितृधनंप्राप्तंतदातद्ग्रासाच्छादनंराज्ञाबांधवायद्दापनीयाः अपित्र्यामितिपाठेप्रतिलो

दायभागटी० मजस्यनापित्र्यसंबंधी। तिसंएवार्थः। तथाचप्रातिलोमजायग्रासाच्छादनंबंधुभिस्तस्मी
॥५७॥ तद्धनप्राप्ताविचदेयंनान्यथेत्यर्थः क्लीवादेर्दारपरिग्रहासंभवात्कथंपुत्रसंभवइत्याशंका
मपनयितुमाह अस्तुचेतितथासंभवेतिम्नकादेरौरसस्यक्षेत्रजस्यक्लीवस्यक्षेत्रजमात्रस्य
संभवइतिस्वपित्र्यानुसारेणेतिस्वपितुर्ब्राह्मणीपुत्रक्षत्रियापुत्रत्वादिनायादृशोभागस्तादृश
भागहारिणइत्यर्थः यावज्जीवमितिभर्त्तव्याइतिपूर्वेणान्वयः भर्तृसात्कृतेतितेनतासां
विवाहोपिअवश्यंकारयितव्यामितिप्रतिपन्नंसंप्रातिक्लीवादिभिन्नत्वेनाधिकारिनिरूप
णांतरमित्यर्थः पैतामहंचेतिसंबंधिधनमात्रोपलक्षणंसाधारणधनद्वारेणेतिशरीर
श्रमसाधारणस्यनापिवाच्यंतथैववक्ष्यमाणत्वात्स्वीयस्वधनश्रममात्रार्जितंअसाधार
णांम्रात्रंतरैरविभाज्यमनुविद्यालब्धस्य पृथगुपादानव्यर्थंअनाश्रित्येतिसामान्या
भिधानेनतस्यापिप्राप्तेरतस्तत्प्रयोजनमाह स्वशक्त्याप्तस्यापीतिनिराकरणार्थमि

तित्तथाचविद्यालब्धस्यन्यूनाविद्याविधेर्न्नविभागः तदन्येषांतुतथाविधानांकेनापिस
हनविभागइतिभागस्यद्वैविध्येनएकविधाभावात्तस्यपृथगुपादानं न्यासइतिभावः॥
नचसाधारणधनसंबंधेनापिविद्यार्जितविभागनिषेधार्थएवकिंनस्यादितिवाच्य
वैद्योवैद्यायेतिवक्ष्यमाणवचनविरोधात्। औद्वाहिकंजामातृतयाश्वशुरादितोल
ब्धंतत्तस्यैवेत्येवकारात्न्यूनाविद्याव्यवच्छेदकः माधुपर्किकंमर्तिज्यलब्धंभार्याधु
ब्धंतत्तस्यैवेत्येवकारात्न्यूनाविद्याव्यवच्छेदकः माधुपर्किकमर्तिज्यलब्धभार्याधनं
नस्यस्त्रीधनरत्वाद्विभागाप्रसक्तेरन्यथाव्याख्यातेभार्यालब्धप्राप्तिकालइतियतःसो
र्यभार्याधनंविद्याधनंप्रमाणलब्धधनंचएतान्यविभाज्यानिअतएतानिहित्वाअ
न्यद्विभजेदितिवचनार्थंदर्शयतिएतानीतिअन्यद्विभजेदितिवचनेनास्तिकुतोवि
वृत्तमत्तउक्तंअनुवर्त्ततेअश्रुतोमूरवः विभ्रयादित्येकेतिइतरनैरपेक्ष्येणकर्त्तृत्वेस्यएक
बचनमत्रबलेसभ्यातिभावः इतरनैरपेक्ष्येचसाधारणेनैरपेक्ष्यंतत्भ्रातुरसाधारणेनैरपे

स्यभागटीका ॥५५॥ श्यंचतेनाश्रुताभ्यां द्वाभ्यां विर्वाभरणे सर्वेषामेव तेषामंशित्वेति समाश्रित्येति एतच्च भोजना
च्छादनातिरिक्तधनाश्रयणपरं तदर्थं धनोपघातस्य गार्हस्थ्ये तेनाप्यवश्यकर्त्तव्यत्वात् साधा
रणधनपरमिति अन्यथा पितामहादिधनोपघाते विभागानुपपत्तिरितिभावः। अवैद्यायेति
विशेषणस्वरसलभ्यार्थमाह वैद्यायेति एतस्यैव विवरणं विदुषइति विद्याधनमात्रेति तद
तिरिक्तस्वयमर्जितस्य तु विद्वद्भ्योऽविद्वद्भ्यो वा अदेयत्वादितिभावः तत्राविचारितमिति सष्ठ
दुश्चरितमित्यर्थः उभाभ्यामिति समविधेस्तत्र विधेयवैसाम्यावगतेरधिके तत्रापि विधेयवा
धिक्यमवसीयते न तु धर्मांतरेण अनुषंगापेक्षया अध्याहारस्य कल्पनगौरवादितिभावः। दि
विभागे उपघातार्जितत्वस्याविभागचा
नस्येव उपघातोऽनुपघातार्जितत्वस्यैव प्रयोजकत्वात् कल्पनीयां श्रुतिमाह उपघातार्जितमिति सोर्याद्दिप
चानुपघातार्जितत्वस्य प्रयोजकत्वात् कल्पनीयां श्रुतिमाह उपघातार्जितमिति सोर्याद्दिप
दवती उपघातेन सोर्यार्जितं विभजेदित्येवंरूपा श्रुतिकल्पने गौरवान्न्यायमूलत्वमाह यद्द

तिधनसाधारण्ये वा पारसाधारण्ये वाभ्यंतरस्य विभागोक्तेरुक्तन्यानीयमव्यभिचारमाशं
क्याह सितीति तथाच्चायमुत्सर्ग इतिभावः विशेषवचनं च समविधाधिकेत्याद्याद्युक्तमेव न्या
यश्चात्र उपघातार्जिते अर्जकस्य द्व्यंशित्वाभिधानात् अनुपघाते तदधिकस्य सर्वस्यैव ग्रहणं
युक्तमित्येवंरूपः यस्य यावत्शत विभिन्नजातीयभ्रातृसाधारणधनोपघातार्जितं ब्रह्मणा
स्वपुत्रस्य चतुर्णामंशानां चत्रिद्व्येकांशानामुपघातस्तत्र वा स्वस्वांशसमसंख्यमेव तेषामंश
कल्पनमित्यर्थः। कात्यायनवचने एकत्रप्रतिवासिन इति श्रुतेरेक एव स एव नियामकोनसा
धारणधनार्जितत्वं तथाच कथं न्यायमूलत्वमित्याशंकास्यापि न्यायमूलत्वं व्यवस्थापयति
किंचेति विभक्ता इति एकत्र प्रतिवासिनो यदा विभक्तजेषु तद् यत्नात् तस्मात् एकत्रप्रतिवासिनो
भ्रात्रादेरूह्यः धनार्जनं स एव विभागद्व्यंशं लभते इत्यर्थः द्व्यंशवार्जित एवको द्व्यंशमर्हतीत्येक
मूलकत्वात् इतरेषामेकैको भागः एकैकस्येति शेषः मुनेः कात्यायनस्य तेनैकत्र प्रतिवासित्वोक्ता

Indira Gandhi National
Centre for the Arts

साधारणधनोपघातेनद्यंशित्वस्यप्रतिपादितत्वात्।अनुपघातार्जितेभागानभिधानान्नत्वाख्या
नःस्वीकारस्यतेनतथैवस्फुटमाख्यातत्वात्अभिप्रायश्रकाशयतिअनुपघेपेतइतिएवंचेदुपघा
तार्जिताभिप्रायकंचेत्तत्तथात्वद्यंशित्वअविभक्तविभागप्रागभावः।संसृष्टत्वेविभागप्रध्वंसःए
कत्रप्रतिवासस्याभिन्नधनसंबंधस्याननुवचनबलात्संसृष्टप्रतीतिस्तद्विरोधात्कुतो।वि
भक्तकल्पनमतोवचनमन्यथोपपादयतिसाधारणेत्यादिनकेवलमित्यत्रहेतुमाहहोलाके
तितथाचयथाहोलाकानुष्ठानार्थहोलाकाकर्त्तव्येतिश्रुतिःकल्प्यातेनकर्तृबोधकप्राच्यादिपद
तीतथासाधारणधनोपघातेनार्जितेअर्जकोद्यंशंगृह्णीयादिपश्श्रुतिःकल्प्यतेनत्वर्जकवि
शेषणत्तयासंसृष्टपदवती।।तिभावःतथापिरपदवैयर्थ्यरूपबाधकाभावात्सामान्यश्रुतिक
ल्पनास्त्सम्भतोतुतथात्वेविशेषणवैयर्थ्यमितिविशेषकारश्रुतिःकल्प्यतइत्यतआहकिंचेति
किंत्वधिकमितिभागद्वयादधिकमित्यर्थःआधिकस्यैवद्वैविध्यमाहसर्वमेववेतिकिंचिद्दूषणमि

---

तिशेषःतदभावेभ्रात्रंतरभागनिर्गमहेतुत्वेनसाधारणधनोपघातभ्रात्रंतरव्यापारयोरभावेम
नुअर्जकोद्यंशमर्हतियेनचेषाउत्पादितस्यात्सद्यंशमेवहरेद्द्विसादासामान्यतयावअर्जकत
याद्यंशएवार्जकस्यास्तांअतआहद्विवर्जयेत्तुरितिएतस्यएतदर्थकस्यअर्जकोद्यंशमर्हती
त्यादेर्न्यायमूलत्वंयत्रैकस्यधनद्वारेणापरस्यधनशरीरायासाभ्यामिस्फलत्वयुक्तिमूलत्वअन्यथा
न्यासमूलत्वेनअर्जकत्वानुप्रवेशोवाइतिपितागृहितांशद्वयंस्वयमितिमूलश्रुतावर्जकविशेष
णप्रवेशइत्यर्थःनन्वेवंअर्जकःपिताद्यंशंगृह्णीयादितिश्रुतौकल्पनेपीतुरनर्जकस्यद्यंशानु
पपत्तिरर्जकस्यभ्रात्रादेर्द्यंशानुपपत्तिश्चेत्यतआहपृथग्वेतिपितृत्वादिरपेक्षःपृथगर्जकएवाधि
कारीकल्प्यस्यात्तथाचोभयथैवश्रुतिकल्पनेगौरवात्न्यायमूलत्वमेवयुक्तमितिभावःउपसंह
रतितस्मादिति।ननुन्यायमूलत्वेअर्जकस्यव्यापारता[illegible]रतम्येनविभागतारतम्यंस्यात्तथा
।चसामान्यतएवतस्यभागद्वयाभिधानमयुक्तमतो।विभक्तार्जितेअर्जकस्यभागद्वयमितर

Indira Gandhi National
Centre for the Arts

षां मेकैको भाग इति सामान्यश्रुतिमूलत्वमेवोचितं अर्जकद्वांशस्य असत्त्वानुपघातार्जितेऽपि
प्रतिग्रहधने अविभक्तार्जितत्वमात्रे सर्वेषां विभागो लोके दृश्यत इति श्रीकरमतमुत्थापयति
रिणो भ्रात्रादयः तेषामिति तेषां धनाधिकारप्रतिपादकवचनस्य स्त्रीधनगोचरत्वादित्यर्थः
ननु प्राप्ते शिल्पेस्तु यद्वरेदत्तं प्रीत्यावैव यदन्यतः॥ भर्तुः स्वाम्यं भवेत्तत्र शेषस्तु स्त्रीधनं
स्मृतं इति कात्यायनवचनात्तदपि स्त्रीधनं भवत्येव इत्याशंक्याह कात्यायनेनैवेति न पुन
रुक्तेति तथाच दायाधिकारवचनस्य पुनरुक्तत्वापत्त्या दायो न स्त्रीधनमिति भावः॥ तथा त्वेण
कस्यैव मुनेः स्त्रीधनेति रुद्धाधिकारिद्वयकथनेन विरोधोपि द्रष्टव्यः। न च गोहबन्याया
दायस्य तदितरस्त्रीधनानां त्वेवं स्वामेदो वचनाभ्यां भविष्यतीति नो क्तदोष इति वाच्यं दायस्य

स्त्रीधनवचनानांदायेतरत्वेनसंकोचापेक्षयाशेषस्तुस्त्रीधनमिगात्तंस्त्रीधनेवचनानंदी
स्यत्रैववचनेशेषपदस्यैवमुनिपरिगणितस्त्रीधनपरतयासंकोचस्यन्याय्यत्वात्॥दा
यस्यकेनापिमुनिनास्त्रीधनमध्येगणनात्॥अतएवविनियोगेसइश्वरइतिनापहरेत्स्त्रि
यःकुर्युरित्यादिनादायेतस्याःस्वातंत्र्याभावउपपद्यते॥चूडामणिस्तुदायपदस्यस्त्रीधना
धिकारिभ्रात्रादिपरत्वेदोषांतरमाहपुनरुक्तत्वापत्तेरितिव्याचष्टेस्वेऽपसंहरत्विअ
तइतिप्रागभावेइतिपूर्वोक्तार्थकंयुक्तिमाहतदानीमितिइतिपत्नीमरणोत्तरमित्यर्थः॥ननु
दानाधानेतियदुक्तंतत्रप्रमाणमाहतथेतिक्षानेतिपूर्ववचनस्वरसात्व्याचष्टेउप
भोगेपीतिएवंचभर्तुरुपकारस्यापेक्षणीयत्वेचऔर्ध्वदेहिकक्रियात्वोर्थपारलौकि
कोपकारार्थविनियोगेदाविति॥एवंचतद्धनदाधानेप्रतिपक्षपरंतेत्रतायदितदातदा
स्यस्वमेवतदत्तुमत्याकदाचित्पितृपक्षेभ्योपिदानमिति॥एवंचेतिदुहितृतोऽभ्यर्हिता
याःपत्न्याएवंभागावशिष्टधनेयद्धनंतदधिकारिणामधिकारस्तदासुतरांदुहितृत्वनंतरंतद रम
५४

भावोक्तानंतराधिकारिणामधिकारइतिभावः॥पितृधनाधिकारिणःस्वपुत्रपितामहाद
यः॥दुहितृत्रधिकारिणस्तदुहितृत्रभावेदौहित्रादयः॥दंडापूपायितमितिदंडापकर्षतत्संबं
धस्यापकर्षेःतथापुत्रसंक्रांतधनस्यपत्नीगततयापकर्षंतत्संबंधस्यकन्याधनावशिष्ट
विशेषणस्यापकर्षइतिभावः॥दुहितृत्रधिकारोनिरूप्यतेइतिशेषः॥विशिनष्टिसंतानच
तुष्टयाधिकारित्वेनअन्यसंतानादिति॥अन्यस्यसंतानोयथानपिंडदत्तपाऽयमपी
त्यविशेषः॥असंतामानाध्वरादेः॥ततपुत्रीदौहित्रपुत्रीविपर्यस्तपुत्रविपरीतापत्या
॥उन्मादादिदोषग्रस्तावाइतिकेचित्॥तदसद्दुहितृप्रसूत्यादिनेतिहेत्वनुपपत्तेः॥कन्ये
वेतिनतुदत्तयासहेत्यर्थः॥पूर्वोक्तविशेषोऽविपर्यस्तपुत्रपरंनग्निकानागतत्रत्तु
कानाग्निकानागतार्तवाइत्यमरकोषात्॥परिणीतायाअनंतरेविवाहितायाःपुत्रद्वा
रेणेतिदुच्छायाएतदुपकारविशेषेपिधनाभावेनापरिणीतायाअतुमत्तयासंभाविन
स्यभविष्यतोनरस्यप्रतिकर्तृत्वमेवकुमार्याःप्रथमंधनग्रहणेनिमित्तमितिबोध्यं॥स

Indira Gandhi National
Centre for the Arts

दृशेनोढाया अपि न धनाधिकारित्वमित्युक्तं कृता पुत्रिका अकृता नं दन्या अपुत्रस्येति। अ
पत्नीकस्येत्यपि बोध्यं॥ पत्न्यभाव एव कन्याधनाधिकारावगमात्। निषेधादिति। निषेधस्त
स्मादेव विशेषणात्। कन्यनीयइति कृताकृतावेत्येकवचनोपात्तत्वात् पुत्रिकाया अपि प
त्नीकुमार्योरनंतराधिकारः स्यादित्याशंकामपनेतुमाह पुत्रिकापुत्रस्य त्विति। अनेन द्वार
तोत्कर्ष उक्तः स्वतोप्युत्कर्षमाह पुत्रिकाया इति तुल्यत्वे च पुत्रिकायां कृतायां त्विति॥
अनेन मनुनासमविभागोक्तेरिति॥ पुत्रादिति॥ आदिना पौत्रप्रपौत्रपरिग्रहः॥ एवं
तर्हि मधुपकार एव प्रयोजकस्तदेत्यर्थः॥ यतइति अत एव। विधवासधवयोः पुत्रव
त्योः विधवाया एव प्राक् पुत्रद्वारणापि उंदात्त्वात्प्रथममधिकार इति निरस्तं॥ भर्तृशुश्रू
यापि नु उपकारत्वाभावात्। धनग्रहणप्रयोजकत्वमाशंक्याह॥ भर्तृशुश्रूषापरत्वेति पू
र्ववचनेति॥ अंगादंगात्संभवतीत्यादिवचनोपात्तेत्यर्थः तस्यैव दृहस्ततेरेव सामान्य
प्राप्तेरिति यद्यपि विशेषकत्वेपि सामान्यवचनवैयर्थ्यं तथापि सामान्यवचनभावे कुमा राम

८६

रीणामनूढात्वोत्पन्ननधिकारप्रसक्त्या न वैयर्थ्यं दुढायास्तु दुहितृत्वपुरस्कारेणासामा
न्यवचनादधिकारप्राप्त्या विशेषकस्य पुनरुक्तैवेति भावः तस्याः पितृधनं त्वन्यः क
थमित्यनेनान्यबाधार्थत्वेनावैयर्थ्यमिति केचित्। विपर्यस्तपुत्रीयाः पुत्राभावेनाभावव
त्यासत्वं नं स्याह्यमिति तदपि पत्न्यभावे कुमार्यादीनां पत्नीबाध्यत्वादिति वाच्ये अतइ
त्युक्तोभयस्त्राभ्यां विपर्यस्तपुत्रिकायामरणे मरणे कुमार्यादीनामधिकारे प्राप्ते भ
र्तुरधिकारस्य व्यावृत्तिरिति समस्तोपसंहारः॥ प्रांचस्तु यतः पुत्रिकाया एव विपर्यस्तपुत्रा
यामरणे तत्संक्रान्तदाये भर्तुरधिकारो न त्वधिकारेऽन्यासां दुहित्रादीनामप्यधिका
रे अनंतरं विपर्यस्तपुत्राणां तासां मरणे भर्तुरधिकारस्य व्यावृत्तिरेति व्याचक्रुः तदविप
र्यस्तपुत्राया इति एतस्यैव विवरणं उत्पन्नमृतपुत्राया इति अत्र पक्षान्तराभावाच्चका
रः क्वचित्कः पाठः न प्रामाणिकः अथात्र खल्विति विहितादिवचनमेव वचनमेव ड
...वैपरीत्यमिति वंनकुतः॥
स्तत्र मृतविषयं॥ मनुवचनं त्वत्पन्नपुत्राविषयमिति

Indira Gandhi National
Centre for the Arts

अनुत्पन्नपुत्राया इवाविपर्यस्तपुत्राया अपि पित्रुपकाराभावेनाविशेषादिति चेन्नस्व
पिर्यस्तपुत्रायाः पुत्रोत्पत्त्यैव पितुः पुन्नामनरकनिवर्तकत्वेन कृतोपकारकतयास्वा
मित्वे निर्व्यूढे पितुरितरापेक्षया तस्या एवाधिकोपकारत्वादधिकारो युक्तः। अत ए
व दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसीत्यनेन दौहित्रमुखदर्शनस्यापि नरक
निस्तारकतेति॥ पुत्रानुत्पत्तौ तु पित्रुपकाराभावात् तस्या एव न स्वामित्वं कुतस्तत्स
सुरिति तत्पितृधनाधिकारिणो कन्यादो नामेव तद्दानो तत्राधिकारस्यान्याय्यत्वा
त्। यद्यपि वंध्यात्वेनावधृतायां जीवेत्यामप्येवमुचितं तथापि प्रेतायामिति प्रेतपद
महणान्न जीवेत्यां तस्यामन्यदुहित्रादेर्नामधिकार इति परे तु नेदं वचनं पुत्रिका
पितृदायपरं किं तु तद्दोयसौदायिकादिधनांतरादिविषयं। पुत्रिकायाः पुत्रत्वेन
तस्यास्तद्धनेपित्रधिकारे प्रसक्तौ तदपवादकमित्याहुः॥ दौहित्राधिकारार्थमाह
पिंडदानमेव चेति चकारो युक्त्यंतरसूचनाय एवकारश्चोपकारस्य प्राधान्यार्थः। राम
६७

एतेन विपर्यस्तपुत्रायाः पिंडदानायोग्याया दुहितुः सुतरां नाधिकार इत्यपि सूचितं॥ य
थेत्यस्य विवरणं येनेत्यादि तथैवेत्यस्य विवरणं तेत्यादि॥ न च पुत्रिकापुत्रे तथा व दौ
हित्रसामान्याधिकारे नेदं वचनं किं तु पुत्रिकापुत्राधिकार एवेति॥ एतेनोक्तवचनस्य
पुत्रिकाविषयत्वे तस्या एवाधिकारे पिंडदानोपकारस्य हेतुतयानिर्देशात्॥ अपुत्रिका
णां दुहितृत्वपुरस्कारेणैवाधिकारात्॥ तादृश्या विपर्यस्तपुत्राया अपि धनाधिकार
स्य निर्व्यूढत्वात्॥ तदनंतरं तद्धेतुरेवाधिकारेऽन्याय्यः। इति पूर्वोक्तपूर्वपक्षोपि सूचि
तः॥ परमार्थादिति॥ एतद्वचनांतरमेवैतस्मै वचनस्य दृढसंततिनाअभिहितत्वान्नाइ
ति भावः। प्रत्यासत्त्येति कृतापेक्षयाऽकृतायाः पश्चान्निर्दिष्टनाम्निमत्तस्या इत्यनेनदृ
ष्टा एवान्यवधानातिरेकादिसमर्थः। अत एवेति। निर्दिष्टतोसमेलान्वयः। नह्विति एतेन
एतद्वचनं न पुत्रिकापुत्रविषयं किं तु दौहित्रसामान्यविषयं॥ देहसत्त्वस्य हेतुत्वेन नि
र्देशादित्यतोपि सिद्धं॥ ननु पौत्रीमातामहस्तेनेत्यभिधानात्॥ अकृतापरमभिसंधिकृ

Indira Gandhi National
Centre for the Arts

नापरं॥ अपुत्रिकापुत्रस्य मातामहपौत्रत्वानुपपत्तेः॥ अभिसंधिमात्रात्पुत्रिके-
ष्यामिति॥ गौतमदर्शनात्। अभिसंधिमात्रेणापि पुत्रिकासंभवात्॥ तथा चाकृतेस-
र्थान्नैतद्वचनमपुत्रविषयमत आह किं चेति॥ अन्यं दौहित्रमिति। एतेनाकृतेति व-
चने पौर्वापर्यानुवादादस्तु पुत्रिकापुत्रपरं। दौहित्राद्यखिलं त्वाकल्पमिति वचनं तु दौहि-
त्रपरं श्रवणात्। अपुत्रिकापुत्रपरत्वे त्वकृतापुत्राधिकारः सिद्ध एवेति दर्शितः॥ अ-
भ्युपगम्य पुत्रिकात्वेन स्वीकृतस्य अत एवेति यथापितृधने स्वाम्यमिति वचनस्य कृताज-
त दौहित्रविषयत्वादेवेत्यर्थः॥ बृहस्पतिवाक्ये पौत्रादिपदाभावात् कृतापुत्रिकेत्येवा-
र्थः इत्याशयेनाह सदृशेनेति। विरोधादिति॥ एतेन पुत्राभाव एव दुहितुरधिकारस्य प्र-
तिपादनात्। सुतं एव दौहित्रः तदनंतरत्वादित्यर्थः प्रागुक्तरूपायाविपर्यस्तपुत्रयोः
दुहितृवद्भागविधानात्॥ तत्तुल्याभिधानात्। जघन्यत्वावगतेरित्यस्य गोरुत्वयः॥ अ... एम
तुःउपमेयस्य उपमानापेक्षया हेउत्कर्षबोधस्य सार्वलौकिकत्वमिति। हेत्वंतरमाह ता ९८

सुतेपि तिचकारो भिन्नक्रमे। यथर्थेन याप्यर्थोन्नित्यार्थबोधकत्वसुतोपीति शङ्कार्थ
नेयानि द्दीशाख्येत्यर्थः। अत एवानंतरमिति॥ यथापितृधने स्वाम्यमित्यनंतरमित्यर्थः॥
ननु श्री नेति अन्यथापि त्वोरसूचने दौहित्राभाव एव भ्रात्रधिकारे पितरौ भ्रातरस्त-
थेत्यादिना याज्ञवल्क्यादिविरोधः स्यादिति भावः॥ स एव दद्याद्द्वौ पिंडाविति मनुवच-
नं पुत्रिकापुत्रपरमेव पितृधनग्रहणपक्षे उभयपक्षपिंडदानविधायकं पितृधना-
ग्रहणे तु केवलमातामहपक्षस्यैव पिंडदानमिति अपुत्रिकापुत्ररूपदौहित्राद्यधि-
कारस्तु पत्नी दुहितरश्चेत्यादिना निर्दिष्टाधिकारिणामनंतरमेवेति वाल्लोकतमंतरद्या
कर्तुमाह। यत्विति बृहस्पतिवचनेति। तथैव तत्सुतोपीष्टेमातृमातामहधनेइस्ये नेत
कर्तुमाह। पत्विति बृहस्पतिवचनेति। तथैव तत्सुतो पीष्टेमातृमा मातामह धनेइस नेन
॥ थं: वाल्न वचनमिति शिशोरि वानभिसंहित तात्पर्यस्य वचनमित्यर्थः॥ नन्वेवं या
ज्ञवल्क्याद्युक्तक्रमविरोधः। ते दुहितृनेतरं दौहित्रस्यानिर्देशादत आह वृद्धवचने
त्ति दुहितृरूपानूयमेदेनद्वैविध्यादुद्ववनान्वयानुपपत्त्या तथैव तात्सुतोपीत्ति

दस्यत्ति नादौहित्रस्य दुहितृधर्मातिदेशेन चा॥ दत्तस्यार्थे लक्षणया दुहितृपदस्य दु
हितृदौहित्रोभयपरत्वादिति भावः॥ लक्षणतावच्छेदकन्तु अनूढोढदौहित्रान्यतमत्वा
दिकमिति बोध्यं॥ असगोत्रत्वे सति साक्षात्परम्परासाधारणपार्वणकर्तृत्वमिति कश्चि
त्। प्रपौत्रपर्यन्तपरमिति। अत्र लक्षणतावच्छेदकसति पार्वणकर्तृत्वं वक्ष्याम इति संक्षे
पवचनस्यावसरेऽइत्यर्थः। दुहितृपदस्य दौहित्रपर्यन्तपरत्वाभावे दोषमप्याह किं
चेति॥ दौहित्राधिकारं निरूप्य कन्याधिकारे विशेषमाह यदेति। केचित्तु पुत्रिकाया विप
र्यस्तपुत्राया अभावे न तत्पितृधनं न भर्तुः किं तु किं तु पितृधनाधिकारिणमित्युक्तं॥ अपु
त्रिकायास्तथात्वे किं स्यादत आह॥ यदेति इत्याद्युः म्रियेत इति। पुत्रमनुत्पाद्येत्यादि तस्येति
तस्याधिकारार्थवचनस्येत्यर्थः॥ आदिना पितृमातृभ्रातृणां ग्रहणं॥ उक्तार्थे युक्तिमाह
भुक्तेति। अधिकारे अधिकारसाधारणे अयमर्थ इति ज्ञाताधिकाराभावे अनन्तरा
धिकारिणामूढादीनामधिकार इत्सौ वेरूपोऽर्थ इत्यर्थः॥ ननु यावद्वचने हि वाचनि

राम
१९

कमिति न्यायात्यत्यधिकारएव तथात्वे अन्यथा तत्र पत्नीपदोपादानवैयर्थ्यापत्तेः अ
तः पत्नीपदस्य स्त्रीमात्रपरत्वमाह यद्वेति पत्नीति पत्नीति भुक्तेतामरणक्षान्ताइत्यत्र
परं स्त्रीमात्रोपलक्षकमित्यर्थः। ननु किमत्र स्त्रीमात्रोपलक्षकत्वे बीजमिति चेदत्रा
यं भावः स्त्रीसंज्ञातधनस्य स्त्रीधनत्वाभावादधिकारिविशेषस्यात्र वचनादप्राप्त्या का
द्र्यायकत्येनेसाद्दृश्यात् स्त्रीसङ्क्रान्तधनमात्रस्य पूर्वस्वामिदायादरूपोधिकारीक
ल्पनीयइसेतदर्थे पत्नीपदस्य स्त्रीलक्षकत्वमिति॥ अथैवं पत्नीनोऽभ्यहितोयाः पु
त्रिकायास्तथादर्शनात्। पुत्रिकौरसयोः साम्यात्पुत्रादिरहितस्यानंतरं तदृद्धनेत
त्पत्न्या न स्यात्। स्याच्चेदायादानां दुहित्रादीनामिति चेन्मैवं पुत्रस्य जन्मनैव कृतो
पकारतया तत्र तस्य स्वामित्वे निर्व्यूढे तदनन्तरं तदुत्तराधिकारिणां तत्तुल्यदी
नोतत्राधिकारस्यान्याय्यत्वात्। विपर्यस्तपुत्रायास्तु पुत्रिकायाउपकारलेशाभावात्त
दधिकारस्यैव निर्व्यूढतया तदनंतरं दायाधिकारस्यैवान्याय्यत्वदिति॥ ॥ दौहित्रा

Indira Gandhi National
Centre for the Arts

धिकारं निरूप्य तदनन्तरं पितुरधिकारमाह दौहित्रस्याभाव इति न मातुरिति पितुः
पूर्वमिति शेषः धातृवचनवचनेपि पितुरपि विद्वदनिर्देशात् यौगपद्याधिकारमाशं
क्याह नापि युगपदिति॥ तदभाव इति एतेन तदभावे मातृगामि तदभावे पितृगामीति
रत्नाकरादिमित्तिखित पाठो वक्ष्यमाणविरोधाद्भ्रम एवेति ध्वनितं नतु पितृपर्यन्ताभा
व इति वक्ष्यमाणन्यायोपलब्धविष्णुवचने न मनुवचने अपत्यपदस्य पत्न्यादेरिह
स्पति वचने च भार्यासुतपदयोः पौत्रादेरुपलक्षकत्वस्यावश्यकत्वात् पितुरुप
लक्षकत्वयुक्तत्वादिति भावः न्यायमाह न्यायागतेत्यादि दौहित्राभावतोऽधिका
रो हेतुमाह मतपिंडेति मातृतः पूर्वं अधिकारे हेतुमाह मात्रादिभ्य इति युगप
दधिकाराभावे हेतुमाह पितर इति स्तत्रापि पितृक्रम एवेति पितुः प्रतिपादित
त्वादिति भावः प्राकृत्पत्तिं दर्शयति तथाहीति तथा च पितराविति पितृक्रमा रा म
भिधानपरमेव तत्मात् पक्षं तूक्तन्यायोपबृंहितविष्णुवचनमेवातो त्वद्विवच २०

नमेवातो त्वद्विवचनावच्छिन्नसाहित्यमभिधानक्रियापेक्षयैव गर्गो भुज्यतामिति
वदिति केचित्॥ केचित्तु पितराविति अत्र युगपदेव पित्रोरन्वयबोधं तथा च क्रमिका
न्वयबोधस्य क्रमिकपदार्थस्मरणव्यापकतया प्रकृते व्यापकस्य क्रमिकान्वयबो
धस्याभावेन व्याप्यस्य क्रमिकपदार्थस्मरणस्याप्यभावात् युगपदेव द्वयोरुपस्थि
त्या युगपदेवाधिकारः पित्रोरिति वदन्ति तन्मतं दूषयति अत इति उक्तमेव क्रमेण क्रमि
कोपस्थितेरावश्यकत्वादित्यर्थः क्रमज्ञानं क्रमिकपदार्थस्मरणक्रमिकाभिधानं क्र
मिकान्वयबोधस्तद्व्याप्यमित्यर्थः॥ ननु क्रमिकाभिधानं इत्यनुमानमिति इति व्याप्ते
हेतोर्यदनुमानं व्याप्याभावसाधने व्यापकाभावरूपं लिङ्गं प्रमाणं अर्थासाधनं क्र
र्यासाधने स्वरूपासिद्धिहेतुमाह व्यापकनिवृत्तेरिति तथा च तयोरन्वयबोधः क्र
मेणैवेति भावः॥ ननु द्वेहस्थ त्वेसाहित्ये न युगपदन्वयबोधान्न तु क्रमिकस्तथा च कथं
व्यापकनिवृत्तेरसिद्धित्वमत आह॥ विष्णुवचनेति तथा चान्वयबोधस्य यौगपदिके

Indira Gandhi National
Centre for the Arts

त्वेपि नाधिकारयौगपदिकः। विहमुविरोधात् किंतु क्रमिक एव यथा पत्नीदुहितर
श्चैवेत्यत्र सर्वत्र दुहितृणामेकान्वयविशेधकत्वविषयत्वेपि वचनोत्तरवल्लात्
कुमार्यादिक्रमेणाधिकार इति॥ पितुरनन्तरं मातुरधिकारमाह पितुरिति अस्यन्या
यमूलत्वमाह युक्तं चैतदिति। भ्रात्रादिभ्यः पूर्वमिति॥ यद्यपि भ्रात्रापितृद्वोर्यान्य
पिंडदस्तथापि पिंडदस्तथापि गर्भधारणाद्युपकारकत्वेपि न भ्रातुर्मातृसंवंधीनस्वा
म्यान प्रथमं मातुरेवाधिकारः इति गौरवातिरेकेति। सहस्रं तु पितुर्माता गौरवेनाति
रिच्यत इत्यादिनेत्यर्थः। उपसंहरति अत इति पितृतः इति भ्रात्रादिभ्यः पूर्वमित्यादि परतः
बोध्यं॥ पितृसंतानाद्भ्रात्रादेः पितामहसंतानास्थितव्यादेः अन्यथेति उक्तक्रमेणाधि
कारकाल्पनेइत्यर्थः। क्रमविरोधादिति ननु वाचनिकएवपितरौ धातरस्तथा इति क्र
मः स च पितामह्याः कल्पनां विना कथमनुपपन्नः मैवं मातुः प्रदस्यरयापिंडत्रयस्य राम
धनिभोग्यस्य दानेपि साधात्वात्तत्पिंडत्रयदातृतया श्रेष्ठत्वात् भातृतः पूर्वमधिका २२

रो गर्भधारणाद्युपकाराद्वेवदृतिभिरुक्तः एवं पितामह्या अधिकारोपि यदि सा स्यात् तद्वो
ग्यपिंडद्वयदातुः पितृव्यादन्यद्वारा नाहशापेडंदायापितामास्याधनिपितृजनेनपितृव्य
धनसंवंधमूलनया चाधिकोपकारकत्वेन पितृव्यं वाधित्वा धनाधिकारो न भवेत् दोक्त
रूपस्याप्रयोजकत्वात्। मातृभ्रात्रोः क्रमाभिधाने मुनीनां न स्यातिभावः केचित्तु तिता
महोपि तृव्ययोः पर्यौकि नापि नो क्रमतः कल्प्यं तथा चान्यथा कल्प्यने मातृभ्रातृस्थ
लोक्तस्य उपकाराधीनाधिकारक्रमस्य विरोधादित्याहुः अपि शब्दस मुच्चितताइतिव्या
ख्यानवाक्यस्यापि शब्दसमुच्चिताइत्यर्थः एतच्चापि तरौ भ्रातरस्तथा इति मातृगामि स
भिधायतदभावे भ्रातृगामित्वाद्येकधुश्रुतिमूलत्वादुक्तं॥ मातुरनंतरं भ्रातरधिका
रं वक्तुं षेनिरूपयति मातुरभावे इति तथा भ्रातृपुत्रोपोति तथा च भ्रातृतत्सुत्रयोर्युगप
दधिकारः स्यादिति भावः। तत्स्थानपादिति धानिकार्यकारित्वेन धनिस्थानपादित्यर्थः
अनेवेरूपादिमृतभोग्यपिंडत्रयदातृभिन्नादित्यर्थः नन्वेवं भ्रातुर्बलवत्वान्मातृतः

Indira Gandhi National
Centre for the Arts

प्रागधिकारः स्यात्॥ अत आह मातृमातृमूलत्वाच्चेति॥ अथापकारकत्वेपि भ्रातृस्त्र
भ्रातृसुत इत्यनेनान्यथासिद्धवचनवलाद्युगपदधिकारी स्तु इत्यत आह किं चेति अन्यत्रा
पि भ्रातृपुत्रयोरधिकारेपि॥ एवं चेत् तदितिउपकारक्रमेणैवाधिकारे दुपकारता
रतम्येन क्रम इति स्थिते चेदित्यर्थः अत एव भ्रात्रनन्तरं भ्रातृपुत्रस्याधिकारे देवबृ
वौक्तेति तदभावे भ्रातृपुत्रगामीति विष्णुवचनेत्यर्थः॥ अन्यथा पुत्रत्वातिदेशवले
नैवाधिकारः स्यादिति अधिकारस्तु विशेषः॥ भ्रात्रधिकारविशेषमाह तत्रापीति प्रथ
मं सोदरस्याधिकारे प्रमाणमाह तदुक्तमिति॥ किं च एकमातापितृजन्यपुरुत्वमेव भ्रातृप
दशक्यतावच्छेदकं तथा च सोदर एव भ्रातृपदवाच्यः वैमात्रेयादौ च पूर्वरूपसंज्ञानत्वे
न रूपेण गौण एव भ्रातृपदप्रयोगः॥ एवं च सति सोदराभावे भ्रातृत्वस्याधिकारेयुक्तः त
दभावे भ्रातृपुत्रगामीति विष्णुवचनात्तत् कथं सोदरात् परतः सापत्न्यभ्रातुरधिकारेव ए म
बृषेइत्यत्राह एकप्रभवत्वेनेति तथा च मातापितृत्वानि वेशेन एकशरीरजन्यपुंस्त्वमेव २२

भ्रातृपदशक्यतावच्छेदकं लाघवादिति भावः वैमात्रेयस्य भ्रातृपदवाच्यत्वे मुनेः स्वरस
माह तथा चेति संसृष्टिन इति संसृष्टिनो ज्ञातस्य संसृष्टिनाऽदत्तस्य पुत्रस्यापरः संसृष्टिर
घातृदर भ्रातृपुत्रयोरनन्तरे इत्यर्थः सोदरादिति संसृष्टसंसृष्टि साधारणोक्तिः जघन्यत्व
मिति सोदरस्य तु सोदर इत्यनेन सोदरस्यैवाधिकार प्रतिपादनादिति भावः न वेति एतद्वच
नस्यासोदरेण संसृष्टिना सोदरस्य तुल्याधिकारकर्तृपक्षे जघन्यत्वकोटिः नान्योदर्यधनस्
स्यार्थमाह न पुनरिति अन्योदर्यमात्र इति संसृष्टसंसृष्टि साधारणार्थः॥ प्रथमे संसृष्टिवैमात्रे
यात्तु॥ सोदरपदमिति सोदरस्य तु सोदर इति पूर्ववचनस्य सोदरपदमित्यर्थः नान्यमातृ
ज इति तथा च पूर्वापरविरोधभयादेवकारोऽध्याहार्य इति भावः॥ अनुषंगकल्पने गौरवा
दाह संसृष्टपदमेवेति अभिधत्ते इति गर्भसंसृष्टार्थकत्वादिति भावः॥ अत एव संसृष्टप
दस्य सोदरार्थकत्वादेव पूर्वार्द्धस्येति तथाचान्यमातृजसंसृष्टः केवलो न गृह्णीयादित्यु
त्तरार्द्धार्थः॥ निर्गलितार्थमाह तेनेति अपि चशब्दमिति तयोः समुच्चयार्थकत्वादिति भावः॥

Indira Gandhi National Centre for the Arts

अथेदं चिन्त्यते संसृष्टसोदरासंसृष्टिसोदरयोर्विभज्यग्रहणेन युक्तिवचनप्राचीनस्वरसासि-
द्धं॥ तत्राहि संसृष्टित्वं विनिगमकं तदभावेऽविनिगमकं॥ अन्यथा पितृव्ये संसृष्टिनि
वैमात्रेयस्याधिकारो न स्यात्॥ न वैतद्वचनं भ्रात्रधिकारमात्रविषयं सामान्ये बाधकाभावा
त्। पितृव्यादि संसर्गविषयत्वस्य वक्ष्यमाणत्वात्। वचनस्य यथोक्तरीत्या व्याख्यानेव।
॥इत्यादिति क्रियानुषंगः नान्योदर्य इत्यस्य वैयर्थ्यं मात्रपदाध्याहारश्चेति दूषणं निप्राचो
नाश्च श्लोकार्द्धयोर्युगपद्विभागं तयोर्निषिद्धवन्तइति तस्माद्वचनस्यायमर्थः संसृष्टी चेन्ने
दातस्य धनं अर्थादपरः संसृष्टी अन्योदर्यो नैव हरेत् दद्यान्न हरेत्तदा कोगणयादिति अन्वाद्यंस
ष्टीपोति॥ अपि नासंसृष्टसंसृष्टी वा सोदर एव गृह्णीयात्॥ अन्योदर्यस्याहरणे हेतु
माह॥ अन्यमातृज इति अन्यमातृजत्वेन षाट्पुरुषपिण्डदातुः सहोदरस्य धन्यत्वप्र
तिपादनात्। यतोऽन्यमातृजो न गृह्णीयादित्यर्थः। इत्थं च व्याख्याने संसृष्टसोदरासं
सृष्टिसोदरयोस्तुल्यवद्ग्राह्यत्वयुक्त एवेति सुधीभिर्भाव्यं॥ श्लोकस्मतं दूषयितुमुत्थाप्य राम
२३

यति यद्वेति असोदरसंसृष्टिमात्रेति असोदरः संसृष्टी केवलो यत्र तद्विषयत्वेत-
स्मिन् विषये तस्याधिकारबोधकत्वे रस्यार्थः केवलत्येनेन सोदरसत्वव्यवच्छेदः॥
न्यानपेक्षणाद्वितीयान्तरानपेक्षग्रहणत्वात्। विध्ये नए विषयविषयत्वदिति
यावत्। सोदरमात्रेति सोदरः केवलो यत्र तद्विषयत्वे तस्मिन् विषये तस्याधि
कारबोधकत्वे इत्यर्थः। अत्र केवलत्येनासोदरसंसृष्टिव्यवच्छेदः॥ निरेक्ष
त्वादिति पूर्वोक्तार्थः कंडभयोस्तथाविषयोः सोदरासोदरयोः प्राप्तौ प्राप्ति-
मितं॥ द्वयमेवेति संसृष्टिनस्तु संसृष्टीति सोदरस्य तु सोदरः इति च विधिद्वय
त्यर्थः॥ अन्योन्येति संसृष्टिनस्तु संसृष्टीत्येतत्सापेक्षं सोदरस्य तु सोदर इत्यस्य विधा
यकत्वात्। सोदरस्य तु सोदर इत्येतत्सापेक्षं संसृष्टिनास्तत्सस्य विधायकत्वमित्यर्थः। नि
रपेक्षत्वं चेति॥ अस्य विषयः प्रागेव दर्शितः॥ विधिवैषम्येति संसृष्टी कचिदन्यनिरपेक्षः
स्वयमेव गृह्णीयात्। सोदरेऽसंसृष्टिनि सति तु तत्सापेक्षस्तेन सहेत्यर्थः इति संसृष्टीस

Indira Gandhi National
Centre for the Arts

स्यविधिभेदरूपं वैषम्यं॥ एवं सोदरो संसृष्टी कश्चिदनिरपेक्षः स्वयमुत्तराणीयात्। सतिसं
सृष्ट्यसोदरे तत्सापेक्ष्यत्वेन सहेति सोदरस्य तु सोदर इति अस्य च विधिभेदरूपं विधिवैषम्यं त
त्प्रसंगादित्यर्थः। विधिवैषम्ये दृष्टान्तमाह द्वयोः प्रणयन्तीति॥ पर्वेच तु ष्टयेति॥ चातुर्मास्यया
गप्रसंगे वैश्वदेव वरुणप्रघास शाकमेध शुनाशीरीयाख्याश्चत्वारो यागाः। चातुर्मास्यसाध्या उक्ताः
तत्र उपाद्वंति न वैश्वदेवे उत्तरवेदिमुपकिरंति॥ न शुनाशीरीये उभयत्र एतौ यज्ञस्य यद्वरुणप्रघा
सः शाकमेधश्चेति द्वयोः प्रणयन्तीति श्रुतिरास्ते॥ अस्यार्थः अत्र पर्वसंज्ञके यागे चतुष्के उत्तरवेदिं
अग्निप्रणयनोपयाग्निपात्रे विशेषं उपवंतिनिर्मांति संपादयन्तीत्यर्थः। उत्तरवेदिरग्निप्रणय
नार्था॥ अत्रोत्तरवेदेः पर्वत्वेन यागचतुष्टये सामान्यविधिः अत्र प्रकृतीभूतदर्शपौर्णमासो यस्या
ग्निप्रणयनस्याग्निदेव प्राप्तेस्तदंशेन विधिः॥ किंतु तदर्थे उत्तरवेदिमात्रं विधीयते इत्यर्थ च द्व
योः प्रणयंतीति न्यायागमे बोध्यं॥ अग्निप्रणयनार्थकात्तरवेदे यागद्वयविधाने अग्निप्रणय रम
नस्यापि यागद्वयोपत्वस्य सिद्धत्वादिति। न वैश्वदेवे न शुनाशीरीये उत्तरवेदिमुपकिरंति। अत्र २८

यागद्वये वैश्वदेवत्वादिन्या विशेषविधिद्वयं यागद्वयोरेवाग्निप्रणयनस्यावास्तविकत्वात्। त
द्वेतुभूतं यागद्वयप्रशस्य,माह॥ उरूवेति सत्ता नाविरित्यर्थः यज्ञस्यायज्ञानां मध्ये अन्तौ द्वयोः प्र
णयंति अग्निमिति शेषः॥ अतो विशेषविधिद्वयस्य निषेधरूपत्वे निषेधविधेः सामान्यविध्यप
ओवकतया उपजोव्यवाधायागात्सामान्यविधिरपि निषिद्धसानयागद्वये प्रवृत्तौ सान्यविधेरपिनि
षेद्धमानयागद्वये प्रवृत्तौ सामान्यविधेर्निरपेक्षविधायकत्वं शाकमेधादियागद्वये विकल्पसा
पेक्षविधायकत्वे च वैश्वदेवादियागद्वये॥ तथा च शाकमेधादिद्वयोः सदेव एव वेदिं वपेति वैश्व
देवादिद्वयत्विच्छया वपंतीति। विधिभेदरूपं वैषम्यं स्यत्त तस्मादत्र पर्युदासलक्षणया वैश्व
देव शुनाशीरीयभिन्ने पर्वाख्यमार्गे उत्तरवेदिं वपन्तीत्येक एव विधिर्द्वयोः प्रणयन्तीत्यधिकरणीय
थाविधिवैषम्यं तथा प्रकृते प्रीतिपूर्वेणान्वयः॥ यत्रैवेति सोदरासत्त्वस्थले असोदरे संसृष्ट
सत्वस्थले च संसृष्टिने तु संसृष्टीत्येतत्रये विपक्षविधायकत्वं बोध्यं॥ उभयोः संसृष्टिनन्तु
संसृष्टीति सोदरस्य तु सोदर इत्येतयोः। आपततीति विशेषवचनाभावादिति शेषः॥ इत्थेनि

Indira Gandhi National Centre for the Arts

रपेक्षयापेक्ष्यविधानेन दोषमुपन्यस्य स्वयं विधिद्वयमुत्सर्गापवादभेदेन व्यवस्थापयति। त
स्मादिति। असंसृष्टस्यवेति। न त्वापि सोदरपदार्थत्वेनापवादविषयत्वादिति भावः। इत्यन्त
मिति श्रीकरमिश्रैरुक्तमिति पूर्वेणान्वयः॥ नहीति द्वयोर्विध्योः॥ उभयत्रोदाहरणद्वयोः
एकैकशः प्रवृत्तयोः परस्परनैरपेक्ष्येण प्रवृत्तयोः विधिवैरूप्यमिति॥ सापेक्ष्यनिरपेक्ष्यो
दासीन्येन संसृष्टिनस्त्वित्यादिना संसृष्टिमात्राधिकारविधाने सोदरस्येत्यादिना सोदरमात्रा
धिकारविधाने च परस्परापेक्षा नास्ति युगपदुपस्थितौ तु उभयोरेव युगपत्प्रवृत्तिरिति न वा
क्यार्थवदक्तरीत्या प्रसक्तं विधिभेदरूपं विधिवैषम्यमिति भावः। अत्र प्रतिवधिमाहके
वलोड्रात्रिति ज्योतिष्टोमे हविर्द्धानो साम गृहमेके॥ अपरं वहिस्पवमानास्ये तत्र च यथो
क्तक्रमेण हविर्द्धानीगृहात् ऋत्विजो वहिस्पवमानास्यं गृहं गच्छन्ति गच्छतां च मध्ये
उद्गाता ऋत्विग्यदि रवलेत् तथा सर्वस्वं दक्षिणाविधिः यदि प्रतिस्तोता ऋत्विक् स्खल
ति तत्रासर्वस्वदक्षिणाविधिश्चेति विधिद्वयमस्ति एतयोश्चैकैकस्य स्खलनस्य लेए राम

२९

केकशः प्रवृत्तत्वात् युगपत्स्खलने नैकस्यापि प्रवृत्तिः स्यात्। भवत्य तु विधिवैरू
प्यात्। तथा चात्र प्रथमं मंः प्रतिस्तोत्रे ऽसर्वस्वं किंचिद्दक्षिणां दत्त्वोद्गात्रे सर्वस्वं दायते
इति युक्तिसिद्धः पाक्षिकरणेन सिद्धान्तो भवन्मते व्याहतः स्यादिति भावः। अपच्छेदनतिस्ख
लनेनेत्यर्थः॥ अत्रैव प्रतिबन्ध्यन्तरमाह॥ यथेति। अयमर्थः दर्शपौर्णमासयागे श्रूयते
चातुर्होत्रा पौर्णमासीमभिमृशेत्यं च होत्रामावास्यामिति॥ अत्र चातुर्होत्रपदेन सप्तिथिवो
होत्रे से को मंत्रच्यते तस्य यत्र नियोगस्तच्चातुर्होत्रा पौर्णमासीमिति च स सम्यर्थेद्धि
या तेन पौर्णमास्यामिति। तदर्थः। चातुर्होत्रामिति च परिभाषा प्राप्तिः पृथिवी होत्रेत्या
दिमंत्रस्य करणताप्राप्तये न तत्र पौर्णमास्यां पृथिवी होत्रेति मंत्रेणाभिमृशेत्स्पृ
शेदिति विधिप्राप्तो किमिति स्पर्शकर्मापेक्षायां वाक्यान्तरोपस्थितानि ऐन्द्रे दध्या
दीनि हवींषि प्रकर्मत्वयान्वीयन्ते॥ चूडामणिस्तु पौर्णमासीपदेन कुर्मीधीयतेभि
कर्मीणरन्तु स्पर्शाभावात्। कालेन मुख्यं हविरेवोपांसुयागीयऐन्द्रे दधिरूपं प्र

Indira Gandhi National
Centre for the Arts

त्याप्यन्ते एवमग्निमवाक्येपि अमावास्यापदेनापि तदानीकर्तव्याग्निसोमीयस्थपयो
रूपंचमुख्यंहविः प्रसाध्यते इतिव्यावष्टे॥ एषचविधिर्दर्शपौर्णमास्यन्तर्गतपौर्ण
मासीकर्तव्यस्योपांशुयागस्य केवलदधिरूपहविःस्पर्शनोधस्यन्तरनिरपेक्षः प्रवृ
त्तिः उपांशुयागस्य केवलदधिकरणकत्वात्। तथा पंचहोत्रामावास्यामित्यत्र पं
चहोत्रपदेन अग्निहोत्रे त्यादिको मन्त्र उच्यते तस्य यत्र विनियोगस्तत्पंचहोत्रो अ
मावास्यामिति सप्तम्यर्थे द्वितीया पंचहोत्रामिति तन्मन्त्रस्य करणत्वेनाभाय॥ ते
नामावास्यामिति मखेद्विविधिः अत्रापि कर्माकांक्षायां पूर्वोक्तानिरूढां ध्येवाग्नीयं
ते अयं च विधिर्दर्शपौर्णमास्यन्तर्गतस्य दर्शकर्तव्यस्याग्नीसोमीययागस्य केवलने
नैन्द्रपयोरूपद्रव्यस्पर्शनिरपेक्षप्रवृत्तिः॥ अग्नीसोमीयकेवलपयोद्रव्यकरणक
त्वात्। आग्नेये च दर्शपौर्णमास्यां च कर्तव्यो दधिपयोरूपोभयद्रव्यके हविर्द्वयस्पर्श
र्धविध्योर्युगपत्प्रवृत्तौ भवन्मते विधिवैषम्यपातात्॥ न कोपि प्रवर्तेत॥ तथा चार्थ एम २६

द्वयोरेव विषयसत्वात्स्यामन्त्रद्वयेन हविर्द्वयस्य दधिपयोरूपस्य स्पर्श इति
॥ सिद्धान्तापि भवन्मते आह तेति॥ इदं च न सम्यग्युगपत्। प्रवृत्तावपि सामान्य
विध्योर्बाधाभावात्। तद्रूपविधिवैरूप्याप्रशक्तेः ततः प्रागुक्तप्रतिबन्धिमात्रं सा
धीय इति धीमद्भिर्विभावनीयं॥ अथैवं विधिवैषम्यलक्षणं किमित्याकांक्षा
यामाह तस्मादिति उपात्तेति उपात्वपत्नीतियेवेदिविधिस्तत्सापेक्ष इत्यर्थः। त
द्बाधं विनेति वेदिविधिबाधं विनेत्यर्थः विधिरेव न स्यादिति सामान्यविध्यैवेष्टदे
वादियागद्वयाविषयकत्वे तत्र विध्यमावादेव वेधकरणस्य प्रापकत्वाभावे
न विधिनस्यादित्यर्थः इतीति हेतो यतो निषिद्धमानयोगयोरपि सामान्यवि
धिविषयत्वेन तद्बाधेनैव वैकल्पिकस्य निषेधस्य प्रवृत्तिरित इत्यर्थः॥ ननु निषे
धविधेर्विषयत्वेन वलवत्वात्। सर्वदेवसामान्यविधिमुन्मूलयेत्। तथा च सामा
न्यविधेस्तत्राप्रवृत्त्या कथं तद्बाधेन वैकल्पिकनिषेधविधौ नमित्याशंकते

Indira Gandhi National Centre for the Arts

नचेति तस्य सामान्यविधेर्विफलत्वइति नित्यवदेव बाधे सामान्यविधेस्तदितरविष
यत्वमेव वाच्यं अन्यथा तदंशे तद्विधेरनुष्ठानलक्षणप्रामाण्यापत्तेः। तथा च विध्युभा
बादेव निषेधस्य सिद्धत्वात्। निषेधविधिर्विफलः स्यादित्यर्थः एतदेवोक्तं निषेधं वि
नापीति वेदिकरणस्येति सामान्यविधेर्निषिद्धमानयागद्वयाविषयकत्वे चेद् इत्यर्थः। नि
षेधविधिबाधेति॥ विशेषे न निषेधबाधं विना सामान्यस्य प्रवृत्त्यसंभवादिति भावः॥
विधिवैषम्यमिति एकस्यैव वेदिविधेः पर्वद्वये नित्यवद्बाधकत्वं पर्वद्वये च निषेध
बाधसापेक्षविधायकत्वमिति विधिवैषम्यादित्यर्थः विकल्पश्चेति निषेधाङ्गीका
रे निषिद्धमानयागद्वये वेदिकरणाकरणयोर्विकल्पश्चेत्यर्थः॥ अयं च विकल्पो न व्य
वस्थितः नाहरणविकल्पस्यत्ते करणे फलाधिक्यादधिकफलकामपरत्वस्याधिका
रिणो भेदात् किन्त्वैच्छिकः तथा चाष्टदोषोपनतो बाकुमदश्चेति गौरवमतो लाघवा राम
त्पर्युदासलक्षणया वे॰द्वेखादिभिन्ने पर्वाख्ययागे तत्रैव वेदिं वरयत्लो का एवं वि २७

धिः कल्प्यत इति भावः॥ ननु चैवं न कलञ्जं भक्षयेदित्यादौ रागप्राप्तो निषेधो विकल्पः
स्यात्। रागस्योपजीव्यत्वेन निषेधेन नित्यवद्बाधायोगात् अत आह रागप्राप्ते त्विति॥
केचित्तु कलञ्जेतरभोजनकलञ्जभोजनेतरयो रागप्राप्तत्वेन कलञ्जातिरिक्तेषु
ञ्जो न कलञ्जभोजनेतरत् कुर्वीतेति पर्युदाससंभवात्॥ निषेधो विकल्प एवेति
भ्रमनिरासार्थमाह॥ रागप्राप्तेत्विति नीत्याहुः कदाचित्। करणस्येति न हि निषिध्यमान
मनुतिष्ठन्। यावज्जीवमहर्निशं तदनुतिनिषिध्यानुष्ठानस्य रागाधीनत्वेन रागस्यानि
यतत्वात्। सहकयोन्तरविलम्बाच्चेति भावः तथा च निषेधविधिवैयर्थ्यापत्त्या विकल्पो।
न किन्तु नित्यवद्बाध एवेति भावः॥ अत एवेति यत एव सामान्यविशेषयागविधिनि
षेधयोः क्वचिदेकत्र प्रवृत्तौ सामान्यविधेर्वैरूप्यं न तु एकविशेषनिष्ठयोरेव एवेत्यर्थः
षोडशीति तथा च श्रुतिः अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति
॥ अतिरात्रस्यागविशेषः। गृह्णातीति लिङ्दर्शनं अत्र विधिनिषेधयोर्द्वयोरेवातिरात्रा

Indira Gandhi National
Centre for the Arts

स्य यागरूपविशेषनिष्ठत्वेन विधेः क्वचिन्नित्यवद्विधायकत्वाभावे न विधिवैरूप्याभावा
त्। निषेधाविषयविषयकत्वाभावेन पूर्वोक्तन्यायेन पर्युदासासंभवाच्च विकल्प इत्यर्थः। अ
त एवोक्तमेवाष्टदोषोपि यद्यपि हि यववाक्ययोर्विकल्पः संश्रितस्तत्र गतिरन्या न विद्यते इ
ति अन्या गतिः पर्युदासरूपा गतिः विकल्पः स्यादिति रागाप्राप्तिदेशयोरपि निमित्ताविशेषा
दिति भावः। ननु प्रमाणयोस्तुल्यबलत्वे हि विकल्पः। अत एव गौतमोपि तुल्यबलविरो
धे विकल्प इत्याह तथा च षोडशिग्रहणाग्रहणयोर्द्वयोरेव वैदिकप्रमाणत्वाविशेषात्तुल्य
बलतया विनिगमनाविरहेणैकेनापरस्य नित्यवद्बाधायोगात्पक्षतो बाधेन विकल्पो युक्तः
इह तु रागस्य शास्त्राद्दुर्बलतया विकल्पासम्भवात्। निषेधेन नित्यवद्बाधः एवमतिदे
शस्यापि सामान्यविधितया विषयान्तरे चरितार्थत्वेन पर्युदासासंभवात्तुल्यबलत्वाभावेन
नित्यवद्बाध एवेति कथं विकल्पापत्तिरत आह किं चेति प्राप्तेरिति प्रापकविधिरित्यर्थः। प
रमतन्निराकरणमाह येनेति।। याहृच्छिकेति स्वारसिकीच्छा यासा हृच्छा रागइतियावत्।। राम
२८

---

तथा प्रोक्तं यद्ग्रहणं तद्विषयं निषेध इत्यर्थः प्राप्तीत्यस्य कृद्विहितभावत्वेन प्राप्त्यर्थमाह।।
नन्विति तथा च वैधग्रहणनिसमेवेत्याशयः युगपदिति यौगपद्येऽपसंहारस्याविरोधस्या
सम्भवादित्यर्थः उपसंहारसंभवादिति पाठे युगपदेकदोपसंहारस्यैकत्रावस्थानस्यासम्भ
वादित्यर्थः विकल्पाभावेति।। तथा च विरुद्धयोरेव भावाभावयोर्विकल्पत्वं इह ग्रहणवैध
ग्रहणयोरविरोधात्। विकल्पाभावप्रसक्तेरित्यर्थः न तु विकल्पो नाश्रितः किं तु कल्प्यः
अस्य चाष्टदोषग्रस्ततया गत्यन्तराभाव एव कल्पना प्रकृते रग्रहणनिषेधरूपगत्यन्त
रसत्त्वात्। कथं तत्कल्पनं अतो विकल्पाभावे इष्टापत्तिरेव इत्यत आह क्रत्वर्थतया
चेति क्रत्वङ्गतयेत्यर्थः। न क्रत्वर्थः स्यादिति ननु क्रत्वङ्गतया प्राप्तस्य प्रतियोगिनो।
निषेधस्यैव क्रत्वङ्गत्वमिति। नियमे प्रमाणाभावः यागानंगस्यामिषभोजनस्य निषेधे
यागाङ्गे व्यभिचारश्चेति कथं याहृच्छिकग्रहणनिषेधस्याक्रत्वर्थापत्तिरिति वं लेनना
क्रत्वर्थत्वापादनं किं त्ववेवाक्यार्थः क्रत्वर्थतया याहृच्छिकग्रहणस्य प्रसक्त्यभावात्। तथा च नि

Indira Gandhi National Centre for the Arts

वषेध विधिनाप्रकरणोपस्थितवैधग्रहणस्य एवं च सति वैधग्रहणनिषेधस्यैव क्रत्वंगत
याविरोधित्वात्। अवैधग्रहणेन क्रत्वर्थः स्यादिति। न च षोडशिग्रहणत्वेन वैधावैधसाधा
रण्येन रूपेणैव प्रकरणादुपस्थितिर्न तु वैधग्रहणत्वेन तथा च यादृच्छिकग्रहणमप्युपा
स्थितमेवेति वाच्यं तथापि भवदुक्तावैधग्रहणविशेषाभावस्य क्रत्वर्थानुपपत्तेः ग्रहण
सामान्याभावस्यैवाङ्गतायाविधिप्रतिपाद्यत्वात्। एवं च सति विरोधादिकल्प एवेति हृदयं
॥ केचित्तु क्रत्वर्थतयेत्यादिग्रंथे अन्यथा योजयन्ति। तथाहि नातिरात्रेति वाक्ये न ग्रहणस्या
ङ्गस्याभाववाग्रहणाभावस्याङ्गत्वं पुरुषार्थत्वेव प्रत्याय्यते आद्ये तु क्रत्वर्थतयेति॥ नि
षेधो निषेधविधिर्न तु क्रत्वर्थः। न तु क्रतुविशेषः हितो ये सन्निहितवैधग्रहणस्य पहाया
सन्निहितावैधग्रहणविषयत्वकल्पने गौरवं तत्रापि प्रकरणविरोध इति तदुसत्। अ
स्मदुक्तक्रमेणैव यथाश्रुतार्थनिर्वाहे॥ आश्रयकल्पनानौचित्यात्। तस्मादिति॥ यस्मा
द्भवदुक्तं तस्मादित्यर्थः। ...नयादिति॥ अस्मादुक्तन्यायान्नित्यनिषेधे विधिनिषेधो भयवै

राम
२९

यर्थ्यात्। नित्यविधौ च निषेधवैयर्थ्यं स्यादित्येवंरूपात्। एवकारस्य भिन्नयोज
नया विकल्पनावेत्व[illegible]ः। न च भवदुक्तसमुच्चय इत्यर्थः। तदस्तु मते दूषणान्त
रमतान्तरत्नेस्य दूषणमप्यन्यदानिबन्धनमेवेति षतु किं विस्तरेणाग्रन्थकादु
ल्ये न तथावग्रन्थगौरवतयाऽडक्तार्थे दूषणाभावे मतान्तरतद्दूषणं च नोपनिब
न्धमिति भावः॥ स्वोकरमतदूषणस्यैव प्रकृतसंसृष्टिनस्त्वित्तिसोदरस्यात्विति व
चनयोस्तद्व्याख्यानमनूद्य दूषयति यच्चेति वर्णनमेवाह असोदर इति इत्यनेन
वचनेन असोदरस्य संसृष्टिनो धनसंबन्धप्राप्तो धनाधिकारप्राप्तौ तदपवादार्थं
तद्बाधार्थं विनिगमनेनेति एकतरपक्षपातिनी युक्तिर्विनिगमना तद्रूपकारण
भावादित्यर्थः अन्योदर्यः संसृष्टी यः स अन्योदर्यः धनं न होतु। सोदरे सतीत्युत्तरस्व
रसान्वय्यते तर्हि कोऽग्रस्नीयादित्यत्राह असंसृष्ट्यपीति अपिरेवार्थो भिन्नक्रमे
णयोजनीयः तेनासंसृष्टी सोदर एव गृह्णीयादित्यर्थः किं पुनः संसृष्टी सोदर इति

Indira Gandhi National
Centre for the Arts

कैन्यायसिद्धाधिकारोऽपि संसृष्टिसोदरस्थकारेण समुच्चीयत इति पूर्ववचने यत्सोद
रस्य संसृष्टसोदरापवादकत्वमुक्तं॥ तदेवद्वितीयवचनेऽपि वृत्तमिति। यदुक्तं तद
पि दूषयितुमुपन्यस्यति यच्चेति आनर्थक्यापत्तेरिति विवरणवचनादेवउक्तार्थ
स्याभेविव्रियमाणवचनवैयर्थ्यादिति भावः वक्ष्यमाणदूषणान्तरं स्पष्टयितुं तदुक्तं
वेवरणं दर्शयति किंचेति तथाऽयं वक्ष्यमाणोऽर्थः स्त्रीकारोक्त इति शेषः न पुनरुक्त
त्वादिति॥ अन्योदर्यः संसृष्टीनगृह्णीयादित्यनेनैव प्रकृतार्थसिद्धौ अन्योदर्यपदान्त
रस्य व्यर्थत्वादित्यर्थः नुनेसर्वमिहमवदुषणमकिंचित्। करं तथाहि सोदरवचनस्ये
वापवादकत्वं सोदरस्याधिकोपकारकत्वेन न्यायसिद्धं इत्यतः न तु संसृष्टिवचनस्यान्या
याभावात्॥ अन्योदर्य इति नान्यमातृज इत्यनयोर्भवदुक्तव्याख्यानेथविशेषात्॥ अ
पि शब्दस्याव्ययानामनेकार्थत्वेन एवकारार्थेऽपि वर्तमानाद एवविवादास्पदाभूमिः राम
पौरुषेणापि मुच्यते इत्यत्रापि एवार्थो दृष्ट इत्यत आह किंचेति अप्रवर्तत्वादिति अ ३९

पवादस्यउत्सर्गाविषयेऽप्रवृत्तत्वादिति भावः। तुल्यवदिति अविशेषकाभावादभ्या
न्तर इति सामान्यवाक्येनोक्तत्वाविशेषात्। द्वयोरेव युगपदधिकारः स्यादित्यर्थः न
वाकस्यचित्तिर्दिभ्रात्रधिकारबोधकसामान्यवचनस्य संसृष्टादिविषयकतायास
त्व तत्वादिति भावः। अथेति सोदरपस्य संसृष्टसंसृष्टिसाधारणसोदरपरत्वेनात्रा
पि सोदरवचनं प्रवृत्तं तइत्यर्थः एकत्र संसृष्टसोदरासंसृष्टसोदररस्यत्वे अन्य
त्रसोदरासोदरयोरयोः संसृष्टिनोरित्युक्तस्थले सोदरवचनस्य सोदरत्वपुरस्का
रेणासोदरमात्रवाधसापेक्षत्वेन संसृष्टिनोपि सोदरस्य बाधसापेक्षत्वावश्यकत्वा
दित्यस्यति भावः। यथेति अत्राऽयमर्थः पौर्णमासयागे प्रकृतौ वेदिविहिता साचा
ति देशात् विकृतौ भूदोक्षिणीयेष्टौ प्राप्ता वाक्यान्तरे च सामान्यतः सोमद्रव्यकया
गे वेदिर्विहितान्तत्र दीक्षणीयइष्टेरपि सोमद्रव्यकतया दियो सामान्यवचनेन तत्र व
र्तनेतदातिदेशविधिवाधेनैव प्रवर्तते अन्यथाप्राप्तत्वादिधित्वानुपपत्तेः॥ पार्णि

मासविहृतिभिन्नोसोमद्रव्यकयागान्तरेत्वतिदेशाभावात्तद्वाधेनेतिविधिवै
म्याद्वेदिमत्तोवाक्यान्तरप्राप्तवेदिकाभिन्नानांयागानांतत्सामान्यवेदिविधानं
दृष्टव्यमितितत्रोक्तंविधिवैषम्यंयथातथाप्रकृतोपीतिप्रोक्त्याहसोदर्यमाहृत्य
सन्नमतेत्वितिश्राकरेतिवस्तुतस्तुविधिवैरूप्यमेवनभवतीतिभावः।अन्योदर्य
वचनस्यतुल्यवदधिकारज्ञापकत्वंयथातथाव्याकरोतितथाहीतिनान्योदर्यइ
तिएतेनैकतरस्यान्योदर्यवचनस्यवैयर्थ्यमपिहृतं।असंसृष्टापीतितथाचैक
स्यैवासंसृष्टिपदस्याकांक्षिन्यायादुभयत्रान्वयइतिभावः।केवलइतितथाचसं
सृष्टान्योदर्यसोदरयोर्व्यवस्थितविकल्पेनाधिकारभ्रमनिरासायतुल्यवदधि
कारज्ञापकेनान्यमातृजवचनमपिसार्थकमितिभावः।स्वेनोक्त्याख्यानमनुसंवा
दमाहतथेतितत्तद्रूपाणांसोदराणांमध्येसोदरएवसहितोभजेरन्नूसं रम
सृष्टासंसृष्टतुल्यरूपाणांमध्येसंसृष्टाःसहिताभजेरन्नुइतिवचनार्थमाशंक्या ३७१

हसोदर्यमात्राणामितिइतरेतरावगतेःसोदरमात्राणांसंसृष्टमात्राणांचपरस्पर
साहित्यावगतेःउभयसाहित्यार्थमितिसोदरसंसृष्टसोदरसाहित्यार्थःएतच्चान्यो
दर्यस्त्वित्यादियाज्ञवल्क्यैकमूलकत्वादुक्तं॥अतइतिसहितपदादुभयसाहि
त्यश्रवणंयतोऽतइत्यर्थःअध्याहृतमितिहृहयंज्ञानेतेनवचनार्थोन
भिन्नव्याहृतमित्यर्थःननुएकस्यद्वयोर्वातद्धनाधिकारानुपपत्त्याउद्देश्यविशे
षणत्वेनबहुत्वंयथानविवक्षितंतथासाहित्यमपीत्येतदर्थसमेत्यसहिताइ
त्युक्तंनतुतेषामितरेतरसाहित्यार्थंततः।कथमितरेतरसाहित्यश्रवणमत
आह।किंचेतिचार्थेइतिचार्थेद्वंद्वइतिसूत्रेतिशेषः।अतदर्थत्वेइतरेतरयोगा
नभिधायकत्वंआपादयतीतितथाचानन्यथासिद्धचकारवत्त्वेनेवेतरसाहि
त्यावगमइतिभावः।नचैवंसाहित्यविवक्षितत्वेएकस्यसोदरमात्रस्यवातद्ध
नाधिकारानुपपत्तेरितिवाच्यं।बस्वमातृकनिरुक्तपक्षेएवतदभिधानाहि

Indira Gandhi National
Centre for the Arts

त्तिउपसंहरति तस्मादिति सोदरश्चासोदरमात्रेति द्वन्द्वमात्रपदेन संसृष्टत्व
व्यवच्छेदः केचित्तु सोदरासोदरयोर्द्वयोरेव मात्रपदार्थोच्चयमभ्युपेत्य मात्रप
दं संसृष्टत्वासंसृष्टत्वाभावपरमिति व्याचक्षुः अत एवेति उक्तमनुवचनानुरो
धादेव वचनानुरोधादेव तद्वृहन्मनुः तुल्यरूपसोदरासोदरयोरेव मध्ये सोदरस्या
धिकभरणं बोधयति न त्वसंसृष्टसोदरसंसृष्टसोदरयोः सत्वे संसृष्टसोदरस्य
अंशोनिएकर्णेतिइत्यर्थः जातीति अधिकारिणिसतइत्यर्थः एवमेवमिति स्या
वारमयिसोदरएवगृह्णीयादित्यर्थः जभतेइति सापत्न्यइत्यनुसंगे नान्वयः
सर्वेषामिति तुल्यरूपाणां सोदराणामित्यर्थः पूर्ववचने तुल्यरूपाणामित्यर्थः मे
वसंक्रान्तत्वात् सोदराणामेवेति यदुक्तं तत्र विशेषमाह सोदराणां मध्ये इति सा
पत्न्यमात्रेति तस्याप्येकोदरत्वेन भ्रातृत्वादिति भावः भ्रातर इति बहुवचनस्या रम
र्थवक्ष्यामइति यदुक्तं तत्राह अत एवेति संसृष्टिनस्त्विति वचने भ्रातृमा त्ति

३९

त्रविषयं किन्तु तुल्यरूपसंबन्धिमात्रविषयं सामान्ये बाधकाभावे संकोचस्यान्या
य्यत्वादिति व्यवस्थापयति संसृष्टिनस्त्विति विशेषाधिकारित्वे तुल्यरूपसंब
न्धिनो विवरणोति तेनेति सोदराणामेवेति स्यादित्यस्य नोभुसर्वत्र सोदरमा
त्राणामित्यादिमात्रार्थोन्तर्भावः तथा भ्रातृपुत्राणां सोदरभ्रातृपुत्राणां सापत्न्यभ्रा
तृपुत्राणां च पितृव्यादीनामित्यादित्रापि तथा वाक्यादिति संसृष्टिनस्त्विति वच
नतो भ्रातर इति श्रवणादित्यर्थः नन्वेवं वचनस्य तुल्यरूपसंबंधिमद्भाव भ्रा
तृमात्रे विषयत्वे सोदरासोदरयोरसंसृष्टिसंसृष्टिनोऽसंहारे कथमेतत् वच
नप्रवृत्तिः स्वयमुक्तासङ्गच्छतामिति चेन्न तुल्यरूपाणामिति वचनप्राप्तं किंतु
न्यायप्राप्तमेव तथा च न्यायाविशेषेणान्यत्रापि प्रवृत्तौ बाधकाभावः तुल्यरूपाणा
मितिनियमपराभावादिति संसृष्टिसोदरवचनयोरेकैकविषयत्वादित्युक्तेन
रव्याख्यानपक्षेऽन्योदर्यवचनस्याप्रवृत्तेरिष्टत्वादेति पूर्ववचने नपत्नीदुहित

Indira Gandhi National
Centre for the Arts

रइतिवचनेनसर्वेष्वेवभ्रातृभ्रातृपुत्रगोत्रजपदोपात्तपितृव्येष्वेवअपस्यभ्रा
तृपुत्रयोःपितृव्ययोर्वासंसृष्टसंसृष्टिनोर्मध्येकोग्रहणीयादित्याकाङ्क्षाअनउ
त्तपुत्रकेः॥भ्रात्रभावेभ्रातृपुत्रस्याधिकारमाहतदभावेइति॥प्रमाणमाहभ्रातृ
गामित्याभिधायइतितत्रभ्रातृपुत्राणांमध्येप्रथममितिसोदरभ्रातृव्यस्यासो
दरभ्रातृपुत्रात्प्रागधिकारबोधकवचनाभावेपिसोदरस्यतुसोदरइतिवच
नेनसोदरस्यासोदरबाधकत्वावगमात्।बाधकपुत्रेणबाध्यपुत्रस्यबाधोन्या
य्यइत्यभिप्रायः।अत्रहत्वनन्तरमप्याह।असोदरभ्रातृपुत्रोहीतिसोदरभ्रातृपु
त्रादिमतस्यधातरमादायपितामहपिडेदातुरित्यादिसपत्नीकत्वनेतिए
तच्चसपत्नीकत्वेनैवपित्रादीनांदेवतात्वमितिमतमाश्रित्याभिहितंवस्तु
तोऽसावेततेयजमानस्यपितामहेत्यादिनिरपेक्षश्रुतिबलात्।पत्नीविं एम
निरपेक्षीणोमेवपिश्राद्धीनोदेवतात्वाकिंतुतन्तु।पिडेभोगमात्रेपत्न्याःसत्व ३३

मेवेतिशूलपाणिप्रभृतयोप्येवमितिबोध्यं॥मात्रादिणीनामितिस्वेनभर्त्रास
हश्राद्धमित्यादिवचनस्थानामित्यर्थः॥आदिनापिपितामहीप्रपितामहीग्रहयो
र्ग्रहणं॥तैरेवेतिमात्रादिबोधकैःसपत्नीकपदैरेवेत्यर्थः।सपत्नीकत्वेनैवदेय
तात्वोक्तेर्यथाश्रुतासङ्गतेः।ननुपुत्रहीनानांसापत्नमात्रादीनांपार्वणनिषे
धेपिसपुत्राणांतासांपार्वणानुप्रवेशेबाधकाभावइत्यतआह।किंचेतिनित्यानि
सेतिएकस्यैवसपत्नीकाभिलापविधमोत्राघंशेनित्यवद्विधायकत्वंसापत्न्य
मात्राघंशेकादाचित्कत्वविधायकत्वइत्यतयोचितेऽधिनेत्यर्थः।नचमात्रघंश
कादाचित्कत्वेविधायकत्वमेवजीवन्मात्रादिस्थलेतदसंभवादितिवाच्यंएत
स्यश्राद्धाहेमात्रादिविधायकत्वात्।अन्यत्रसापत्नीकश्रुत्येकवाक्यत्वात्।त
थावत्रयाणामित्यस्यपुनरुक्तापत्त्यानश्राद्धपरत्वमितिभावः।नवपिहणां
सश्व्यामौगुणविधायकत्वमेवास्येतिपुनरुक्तिरितिवाच्यंतथात्वेनद्वचनोत

Indira Gandhi National
Centre for the Arts

रमेव एतन्निर्देशापत्तेः। जननक्रमेणेति अनेकजननाव्यवहितापत्यत्वेनेत्य
र्थः तथा च पौत्रादेः पूर्वं कन्यायाः पितृदौहित्रान्तस्य वै च भागिन्या इत्यादिक्रमेणा
धिकारः स्यादिति भावः। पिण्डदानानन्तर्यस्यापि वचनादवगन्तागतेस्तत्र युक्ति
माह किन्त्वितिस्वमतमुपसंहरति तस्मादिति॥ सपिण्ड इति अधिकारीति शे
षः॥ तेन पिण्डदानानन्तर्यक्रमस्य विवक्षितत्वेन मातुलानोत्यादि मातुलपुत्रपौ
त्रयोः परिग्रहः एतत्सर्वं तत्र भावे तत्रापूर्वतत्रैनाधस्तनसकुल्ययोमध्ये पिण्ड
प्रकारकत्वादिति प्रथमं पितृव्यनप्त्रोरयोऽधिकारिणा इति शेषः॥ सकुल्यपदेनै
वेति समानकुल्यो समानरूपयोगार्थस्य तत्रापि कृत्वादिति भावः। एकपदोपात्तत्वेपि न
उपकारतारतम्यात्। अधिकारक्रम इत्यत्र तात्पर्यं आचार्यः वेदाध्येता स ब्रह्म
चारीति मनुना॥ आचार्याभावे शिष्यस्योक्तत्वात्॥ याज्ञवल्क्येन च शिष्याभावे
ब्रह्मचारिणो विधानात्। आचार्यवध्यत्वं स ब्रह्मचारिणो दण्डापूपायितमि राम

३५

दायभाग

तिनिर्देशादिति॥ शिष्यः स ब्रह्मचारिण इति याज्ञवल्क्यनिर्देशादित्यर्थः। पिण्डगोत्रे
ति सपिण्डत्वसमानप्रवरत्वसंबन्धवन्धवतः॥ पाठिकक्रमेणात्र कथं हयुरित्यर्थः अ
न्यथेति॥ सगोत्रादीनामभावे राज्ञोऽधिकारो वाच्यः। न चापृथिव्यां तत्सगोत्राभावो नितैतु
शक्य इत्याशयः उपकारो धनाधिकारिप्रयोजक इत्यर्थ दाख्याह पुनराहतत्रेति॥ निय
तक्रमाणामिति॥ तदभावे सकुल्यः स्यादिति सर्वेषामभावे इति तथा च आहार्येब्राह्मण
धनमिति वचनानोमनुना क्रमेणोवाभिधाय सकुल्यादीनां क्रमेयत्वदर्शितमिति भावः॥ अ
तएवेति यात एव उपकारेणैव धनाधिकारिता उपकारतारतम्याच्च धनाधिकारक्रमः अ
तएवेत्यर्थः तुल्यवदिति उपकारतारतम्याभावाच्च क्रमिकाधिकारः किं तु युगपदिति भावः त
योरपि स्यादिति। जीवत्पितृकयोरपि पौत्रप्रपौत्ररपि अधिकारः स्यादित्यर्थः जननक्रमेणाचे
ति पञ्जानव्यवहिते तज्जननं तदुत्तरं तदधिकार इति क्रमस्य प्रयोजकत्वे चेत्यर्थः। पौत्र
प्रपौत्रयोर्मृतपितृकपौत्रप्रपौत्रयोः अयमर्थ इति उपकारिक्रमेणैव धनसंबन्धो न्याय्यः

Indira Gandhi National
Centre for the Arts

त इत्येवंरूपोयमर्थः मन्वादीनामभिमत इति मन्यते। दूरेणाविमेणान्वयः अत्र हेतू
नाह दायभागप्रकरण इत्यादि उपकारकत्वाभिधानस्येति त्रयाणामुदके कार्यमिति पुत्रेण
लोका नू। जयतीत्यादि नेति शेषः धनसंबन्धहेतुत्वेनेति॥ सप्ताभिलापस्य प्रशस्त्यभावा
दिति सोदरपितृव्यस्यपि तुःसोदरस्य अत एवोपकाराधिक्यादेव भ्रातृतत्पुत्रभातृपौत्रापु
पकाराधिक्याद्दाह मरतधनिकस्येति॥ पिडंदातृत्वाभावेमानमाह तथा चेति पितृदौहित्रस्य
ति सोदरमात्रेयभागिनीपुत्रस्यापि पितृव्यादिसत्त्वे पीत्यर्थः यद्यपि दुहितृभावे दौहित्र
स्येव भगिन्याएव प्रागधिकारो युक्तः तथापि पिंडत्वाभावान्नाधिकारः दुहितृस्तु दौहित्रात्।
सर्वेऽङ्गादंगात्संभवतीत्यादिविशेषवचनादेवाधिकार इति भावः। धनिदौहित्रस्योवेति
यथा धनिप्रपौत्राद्यनंतरं तद्दौहित्राद्यधिकारस्तथेत्यर्थः त्रयाणामित्यनन्तर इति त्रया
णामुदकं कार्यमित्यनेन पिंडदानमभिधायानंतरं सपिंडाद्य इत्यनेनानुपदं लिखि राम
ष्यमाणे नपिंडदानाधिकारबोधकेनेत्यर्थः गोत्रजपदस्य प्रयोजनानन्तरमप्याह॥ सपिंडेष्वि ३५

दा॰प॰भाग णां चेति तासां व्युदासे वचनान्तरसंवादं दर्शयति अत एवेति निरिन्द्रियाजात्यन्धादयः
स्त्रियाश्च अदायादा या न हंमताइति श्रुतेः इत्यन्तं सूत्रे चानुवर्त्तमानाइतीति क्रिया
न्वये नषिद्धस्य लयतिश्रुतेरिति श्रुतके क्त वचनस्य स्त्रीति निरिन्द्रियस्याव्युत्पन्न
त्वान्तां दर्शयति तथा च पिंडवहिर्भावेन यस्मान्निरिन्द्रियः स्त्रियश्चानदायाद्याः अतः
स्त्रीनिरिन्द्रियश्चानदायमर्हतीत्यर्थः न चैवं पत्न्यादीनामपि अनधिकारापत्तेः तासा
मपि पिंडवहिर्भावाविशेषात्। अत आह पत्न्यादीनान्त्विति॥ आदिनादौहित्रमातृ
पितामहीग्रहणं विशेषवचनात्॥ पत्नी दुहितर इति मातास्य कथ्यहारिणीति ज्ञेये
ति॥ पितुर्मुनाह रेद्धनमित्यादिविशेषवचनादेवेत्यर्थः भोग्यत्वाभावो न साक्षाद्भोग्य
त्वाभावे न तद्भोग्यपिंडदातुरभावेन परस्परया भोग्याभावेन चस मुख्यत्वात् संवन्धित
याजानातानू न दर्थे मतस्याम्यर्थे॥ मासवाराणमासिक श्राद्धादौ तन्निमित्तमित्यर्थः अं
ते वा सि। त्यापस्तम्ब वचनेभिचक्रमो वोध्यः दुहितुः प्रागधिकारात् तदनभोक्तोफ

Indira Gandhi National
Centre for the Arts

त्वमिति दानभोगफलत्वमित्यर्थः अत एवेति भोग्यदेयपिण्डदानानन्तर्यक्रमेण मातुला
दिपर्यन्तानामपि अधिकारोपपत्तेः अत एवेत्यर्थः वृद्धप्रपितामहं चेति तथा च तानु
प्रस्तुत्य विभक्तदायादान् सकुल्यान् आचक्षते इति बौधायनवचनेनैवासकु
ल्यस्य दर्शितत्वादिमावः उपन्यासक्रमेणेति आदौ सकुल्यानां ततः समानोदकाना
मिति क्रमेणेत्यर्थः युक्तं च तत्र मारुत्यादेस्येति॥ पितृहन पित्रादित्रिकान असावेत
ते यज्ञमानस्यापि त्रेइत्यादि वैमात्रेयभ्रातृपुत्रविषये प्रथमं संसृष्टि वैमात्रेयभ्रा
तृपुत्रः तदभावे वसंसृष्टवैमात्रेयभ्रातृ यदा तु सोदरभ्रातृपुत्रो असंसृष्टो
वैमात्रेयभ्रातृपुत्रश्च संसृष्टः तदा उभावेव तुल्याधिकारिणौ भ्रातृपुत्राभावे भ्रातृ
पौत्रः तत्रापि भ्रातुः सोदरासोदरक्रमश्च बोध्यः तदभावे पितृदौहित्रः स च सोदरभागि
नेयपुत्रवैमात्रेयभागिनेयपुत्रश्च दौहित्राभावे पितुः सोदरः तदभावे वैमात्रेयः तदभावे दायभा
पितृसोदरपुत्रः त्रः पितृसोदरपौत्रः पितृवैमात्रेयपुत्राणां क्रमेणाधिकारः॥ त ३६

दायभाग॥ तदभावे पितामहदौहित्रः तत्रापि पितृसोदरभागिनीपुत्रः पितृवैमात्रेयभागिनी
पुत्रश्चैव वक्ष्यमाणप्रपितामहदौहित्राधिकारेप्येवं तदभावे पितामहः तदभावे पि
तामही तदभावे पितामहसोदरभ्रातृ तद्वैमात्रेयभ्रातृ तत्पुत्रपौत्र प्रपितामहदौ
हित्राः क्रमेणाधिकारिणः तावत्पर्यन्तानां धनिभोग्यपिण्डदातॄणामभावे धनिदेयपिण्ड
दातॄणां मातुलानीनामधिकारः तदभावे धनिमातृस्वस्त्रीयस्याधिकारः तदभा
वे मातुलपुत्रपौत्राणां क्रमेणाधिकारः तदभावे चाधस्तनसकुल्यानां धनिभाग्यले
पदातॄणां पितृनप्तृप्रभृतिपुरुषत्रयाणां क्रमेणाधिकारः तदभावे पुनरूर्द्धतकुल्या
नां धनिदेयलेपदातॄणां वृद्धप्रपितामहादिसन्ततीनां आसन्नक्रमेणाधिकारः तेषाम
भावे आचार्यस्य तदभावे शिष्यस्य तदभावे सहवेदाध्यायिरूपसब्रह्मचारिणामधि
कारः तदभावे चैकग्रामस्य सगोत्रसमानप्रवरयोः क्रमेणाधिकारः उक्तपर्यन्तानां स
र्वेषां सवर्णानामभावे ब्राह्मणवर्ज्जं राजगामीति याज्ञ। ब्राह्मणधनस्तु त्रैवेद्यादिगुणयु

Indira Gandhi National
Centre for the Arts

क्ता ब्रह्मचारिणो गुरुणो युः एवं वानप्रस्थधनं भ्रातृत्वेनानुमतोऽपरो वा वानप्रस्थ एकतीर्थं
स्वे वा गृह्णीयात्॥ तथा यतिधनं सच्छिष्यः नैष्ठिकब्रह्मचारिणो धनमाचार्यः उपकु
र्वाणस्य ब्रह्मचारिणो च नैयित्यादि गृह्णीयात् इति संक्षेपः॥ ॥इति महामहो
ध्याय श्रीयुत कृष्णतर्कालंकार भट्टाचार्यविरचिता दायभागटीका समाप्ता॥ ॥

दायभागटीका पत्रे ६९
३७
१०६

२६
Indira Gandhi National
Centre for the Arts